ात्वेनार्थः तज्जनकत्वं अनुमितिजनकत्वं अनभिमतं चाचार्याणामभिमतं अमथापक्षतावच्छेदकादीनामनुमितिजनकत्वस्याचा
र्याभिमतत्वेव्यर्थविशेषणोपि सा ध्यस्यानुमितिजनकत्वस्यापि तुल्यपु॰ तदभिमतत्वेन साध्यविशिष्टानुमितेः साध्याजन्यतया व्यभिचारवारणा
योंऽत्रविशेषणसमानकालत्वयेति व्यर्थस्यादिति भावः व्याप्तीति सामान्यमुखव्याप्तीत्यर्थः तथा च। धूमविशेषणकत्वे च हेतुसत्वेन। हेतुसत्वता
में न विशेषणात्वस्य विशेष्यान्वयिनान्वयित्वरूपतया धूमविशेष्ये पर्वते न्वयिनि वह्नेः समानकालीनत्वाधूमस्यान्वयित्वेन धूममादाय तत्समान
कालीनत्वावगाहित्वसत्वस्य भादिति भावः धूमसमानकालेति। धूमवान्वह्निमानितीत्यादिः इत्येवपाठ इति तथा च धूमवानित्यादीत्यादीत्येव
वक्तुमुचितमिति भावः आर्थेति। धूमसमानकालीनवह्निविषयत्वस्य धूमविशेषणकत्वप्रयोज्यत्वेनेत्यर्थः व्याख्यातं। मं च रमपठितमपि धू
मविशेषणकेति प्रथमं दर्शितं। अत एव। आर्थक्रमानुरोधादेव। धूमवान्वह्निमानित्याकारस्य तत्प्रयोज्यधूमसमानकालीनवह्निविषयत्व
स्यव धूमविशेषणकत्वप्रयोज्यत्वादेवेति यावत्। धूमवानित्यादीति विषयं तमिति शेषः तज्ज्ञानस्यापीतीति। तथा च ज्ञानस्य लिंगरूपवि
शेष्यान्वयिनाजन्यत्वेनान्वयित्वरूपविशेषणत्वं न तु कारणतावच्छेदकत्वमपीति लाभाये व साध्ये ज्ञायमानत्वविशेषणमिति भावः साध्ये
ति। न च पक्षतावच्छेदकमादाये व्यभिचारः कुतो नोक्त इति वाच्यं मतश्च पक्षतावच्छेदकस्य हेतुत्वमिष्टमेवेति वक्ष्यमाणादि शाकदा
चिदिष्टापत्तेः संभवात् धूमजन्यानुमितेर्धूमवान्पर्वतो वह्निमानित्याकारकतया तादृशाकाराभावेन धूमजन्यत्वाभावस्य स्फुटत्वादा

॥८

राम॰

हा। अनिसकुरत्वार्थमिति यथाश्रुतस्येति मूले विशेष्यविषये इति पाठस्तत्र सप्तम्यर्थो विषयत्वं। स च वृत्त्यन्वयी तथा च विशेष्यरूपो यो वि
षयस्तन्निष्ठविषयकत्वं यथाश्रुतोऽर्थ इति भावः सत्वादीति तथा च व्यभिचार इति भावः आचष्ट इति मूले विशेष्यविषये विशेषणासमानकालयेति
तिं योजनासमर्थस्य निरूपितत्वं विशेषणतावान्वयीत्याशयेनेत्यादिः विशेष्य इति विशेष्यतानिरूपितविशेषणतापन्नमित्यर्थः विशेष्ये यदे
ति विशेषणतानिरूपितवर्त्तनिष्ठविशेष्यतानिरूपितविशेषणतेत्यर्थः क्वाप्यभावादिति इदमुपलक्षणं। यत्रैव विशेषणतापन्नस्य स्वस्यापि समा
नकालीनत्वे न संभवासने यथा मिसाधयिषया साध्यस्य हेतुत्वेन तत्र स्वजन्यत्वमप्याष्टमेवेत्यपि द्रष्टव्यं यद्धूमस्य पक्षे विशेषणत्वं न तद्धूमसमा
नकालीनत्वस्यैव साध्यविषयत्वमित्यर्थः दर्शयितुमिति। तथा सत्येव पक्षतावच्छेदककोटौ कालीनत्वप्रतियोगितया धूमसमानमादाय वि
शेष्यविशेषणतावच्छेदनेत्यादिवक्ष्यमाणविवक्षायां यथाश्रुतस्य मुख्यविशे+ या व्यावृत्तिसंगतेरिति भावः तदानीमित्यादि। धूमकाली
नो धूमवान्पर्वतः पक्ष इत्यर्थः मुख्यविशेष्यविशेषणतावच्छेदेनेत्यादिवक्ष्यमाणविवक्षायां विशेषणत्वस्य रक्षणाय धूमवानिति पक्ष
विशेषणं। साध्यतावच्छेदककोटावपि कालीनत्वप्रतियोगितया धूमभानमादाय धूमवान्पर्वतो धूमकालीनवह्निमानित्यानुमितौ
व्यभिचारवारणाय वक्ष्यमाणविवक्षा वश्यकीति सूचनाय धूमकालीनवह्नित्वेन साध्यता। तथा च दीधितौ तदानीमित्यादिना तदानीं धू
मवान्पर्वतो वह्निमान् धूमवान्पर्वतो धूमकालीनवह्निमानिति स्थलद्वयमुक्तं वेदितव्यं। पक्षविशेषणीभूतेति। साध्यविशेषणीभूत
स्यापि कालस्य परंपरया पक्षविशेषणत्वात् द्वितीयस्थलसंग्रहः। यत्किंचिदित्यादि यत्किंचिन्निष्ठविशेष्यतानिरूपितविशेषणतायत्नस्य
कालीनत्वप्रतियोगितया भानविवक्षायामपीत्यर्थः अत्र तदानीमित्यादिनोक्तस्थले। दोष इति। व्यभिचार इत्यर्थः तथा चैतादृशविवक्ष

यामुख्यविशेष्यविशेषणत्वरूपायथाश्रुतार्थसहितयापर्वतो धूमकालीनवह्निमानिति व्यवहितोक्तस्थले व्यभिचारवारणेऽपि न व्यवहितोक्ततदानी
मित्यादिस्थले व्यभिचारो दुर्वार इति भावः। उक्तस्थले धूमस्य कालरूपविशेष्ये विशेषणतापन्नत्वादाह मुख्यविशेष्यार्थकमिति। तदर्थमेव। मुख्यवि
शेष्यार्थकविशेष्यपदसार्थक्यार्थमेव तदानीमित्यादीति शेषः। विशेष्ये। मुख्यविशेष्ये। एवमग्रेऽपि। विशेषणमिति। तथा च व्यभिचारस्तदवस्थ
एवेति भावः। विवक्षितमिति। तथा च मुख्यविशेष्यतानिरूपितविशेषणत्वावच्छिन्नकालीनत्वप्रतियोगितया पक्षविशेषणतानतच्छलितं
हेतोर्निविष्टं पक्षविशेषणतालाभाय हेतौ विशेषणपदमिति भावः। स्वातन्त्र्येणैवेति कालपारतन्त्र्येणैवेत्यर्थः। एवकारेण मुख्यविशेष्यपारतन्त्र्य
वच्छेदः एकविशिष्टेऽपरवैशिष्ट्यमितिरीत्या धर्मितावच्छेदकद्वयविषयकज्ञानस्यैकत्र द्वयमितिरीत्या तादृशज्ञानवैलक्षण्येन विशिष्टस्य वैशिष्ट्य
मितिरीत्या प्रकारतावच्छेदकद्वयविषयकज्ञानस्य तत्र विशेष्ये विशेषणमितिरीत्या तादृशज्ञानवैलक्षण्येन च क्रमेण यत्र यद्धर्मितावच्छेद
कत्वं यत्प्रकारतावच्छेदकत्वं च यस्य यद्धर्मिविशेषणतापन्नस्य तत्र तस्य तद्धर्मिपारतन्त्र्येणाविशेषणतया तदानीमित्यादिनोक्तस्थलद्वये पक्ष
तावच्छेदके साध्यतावच्छेदके च वह्निधर्मितावच्छेदके पर्वतप्रकारतावच्छेदके काले धूमः प्रकारः साध्यस्य वह्नेर्धर्मितावच्छेदकः प
क्षस्य पर्वतस्य प्रकारतावच्छेदक इति वह्निधर्मितावच्छेदकस्य पर्वतप्रकारतावच्छेदकस्य कालविशेषणापन्नधूमस्य वह्नौ पर्वते च काल
रूपधर्मिपारतन्त्र्येण भानस्यावश्यकतया कालविशेषणत्वावच्छेदेन कालीनत्वप्रतियोगितया धूमस्य भानमावश्यकमित्याशयः। यथाश्रुते
विशेषणे विशेषणतापन्नस्यैवेत्यादिदीधितिग्रन्थात् कालपारतन्त्र्येणैव धूमस्य भानलाभेन स्वातन्त्र्येणैवेत्यस्यासंगत्यापत्तेः। न चैवमपि धूम
स्य कालपारतन्त्र्येण भाने धूमस्य स्वातन्त्र्येणैव भानमित्युक्तिरसंगतैव कालपारतन्त्र्यस्य स्वातन्त्र्यशरीरार्थत्वाभावेन स्वातन्त्र्येणैवेत्यस्यका

लपारतंत्र्ये गौणोवेति व्याख्यानस्यासंभवादिति वाच्यं। स्वातंत्र्यस्य पारतंत्र्याभावरूपतया प्रकृते ऽपि धूमभाने पारतंत्र्ये सामान्याभावरूपस्य तस्यासं
भवेपि मुख्यविशेष्यपारतंत्र्याभावरूपस्वातंत्र्याभिप्रायेणैव स्वातंत्र्येणैवेत्युक्तेः संगमनीयत्वात् वस्तुतस्तु। स्वातंत्र्येणैवेत्यस्य मुख्यविशेष्यतानि
रूपितविशेषणतानवच्छेदकेनैवेत्यर्थः एवकारेण तादृशविशेषणतावच्छेदकव्यवच्छेदः विशेषणेविशेषणतानापन्नस्यैवेत्यादि ग्रंथादेवकारबले
न तादृशविशेषणतानवच्छेदेन धूमस्य भानलाभादिति यथाश्रुतमेव सम्यगिति ध्येयमिति संप्रदायः वस्तुतस्तु यद्धूमेत्यादि। धूमध्वंसस्य
हेतुतयातीतधूमस्य साध्यघटकत्वेन तस्यैव पक्षघटकतालाभापत्तदानीमित्युक्तमिति भावः तदानीं धूमवानिति। अत्र तदानीमिति धूमवि
शेषणं अतीत ~~धूमवान्पर्वतोधू~~ तं च तदर्थः पक्षविशेषणीभूतेति पक्षं परपापक्षविशेषणीभूतेत्यर्थः कालरूपे। साध्यघटककालरूपे। तथा च
दीधितौ तदानीमित्यादिनातीतधूमकालीनवन्हिमान् धूमध्वंसादित्येकमेव स्थलमुक्तं शेषं पूर्ववदिति सारं। व्यत्यासेनेति तथा सत्येवोपदर्शिता
र्थलाभसंभवादिति भावः दीधितौ धूमकालीनेति। धूमवान्पर्वत इत्यादि। व्याख्यायां। विधेयतावच्छेदकेति। विधेयतावच्छेदकता
पर्याप्त्यधिकरणेत्यर्थः भासत एवेति तथा च यद्धर्मविशिष्ट इत्यस्योपादानेपि व्यभिचारो दुर्वार इति भावः मुख्यविशेष्यतावच्छेदकत्वेन
विषयतेति तथा च यद्धर्मसमानकालीनत्वविषयतानिरूपितविधेयतावच्छेदकतापर्याप्त्यधिकरणावच्छिन्नविषयतायां यद्धर्मावच्छिन्नमुख्यवि
शेष्यतानिरूपितत्वं निवेशनीयमिति नोक्तस्थले व्यभिचार इति भावः एतदेवोपपादयति। उद्देश्यविधेयभावेति। विषयमात्रानन्नुभवादिति।
उद्देश्यतावच्छेदकघटकविशेषणानां मुख्यविशेष्ये एकत्र द्वयमितिरीत्यैव भानोपगमेन विशिष्टवैशिष्ट्यमितिरीत्या भानानंगीकारादिति
भावः अत एव तादृशविशेषणानां परस्परं विशिष्टवैशिष्ट्यमितिरीत्या भानेनोक्तस्थले व्यभिचारवारणाय विशेष्यतायां मुख्यत्वनिवेशः अ

119

६०

मा० टी०

विषयत्वादिति प्रकृते वन्हेः पक्षतावच्छेदकत्वेन पर्वतांशे विषयतातादृश एव धूमसमानकालीनत्वस्य विषयत्वादितिभावः विषयतावच्छेदेनेति।
विवक्षितमिति स्यात्तु प्रसंगेनान्वयः नदोषः। न व्यभिचारः साध्यीकृत इति आलोकस्य हेतूकृत इति शेषः धूमवानपमिति। कालीनत्वसंबंधे
नेति शेषः अत्रापि। द्वितीयकल्पेपि। एतस्य व्यभिचार इत्यनेनान्वयः। परस्परविशिष्ट इति। मुख्यविशेष्य इति शेषः। मानांगीकार इति। अन्यथा
कांचनमयः पर्वतोवन्हिमानित्यादावाश्रयासिद्धेर्दोषत्वानुपपत्तिः निर्धर्मितावच्छेदकज्ञानस्याप्रतिबंधकत्वादिति भावः व्यभिचारस्य धूमवा
नयमित्याद्युक्तस्थले व्यभिचारः नचाश्रयासिद्धेर्दोषत्वानुपपत्त्या पर्वतत्वादेः कांचनमयत्वधर्मितावच्छेदकत्वानुरोधेनाश्रयासिद्धिस्थलेति
थाः मानांगीकारे प्युक्तस्थले धूमवानयमित्यादौ तथा मानं नांगीक्रियते अननुभवात्तत्तथा च नोक्तरीत्या व्यभिचार इत्यत आह उद्देश्यतेति वि
शेषणापदादेर्धर्मितावच्छेदकाद्यर्थत्वाभावादिति भावः सामान्यतो विलक्षणात्वस्य सर्वसाधारणत्वादाह। दीधितौ। तच्चेति। असिद्धिवारकस्य
वैयर्थ्यमाशंक्याह व्याख्यायां तद्धर्म इति एकस्मिन्धर्म इत्यर्थः अखंडत्वात्। समानकालीनत्वग्रहजन्यत्वाभावासमनेपत्येन तद्भिन्नत्वात्। अ
सिद्धत्वादिति। वन्हिरूपैकस्मिन्धर्मे धूमसमानकालीनत्वावगाहिनि धूमसमानकालीनत्वग्रहजन्यत्वादिति भावः हेत्वंतरे तोव। प्रथमद्वि
तीयकल्पयोर्व्याख्यानहेतुनैवमनेनैव हेतुना सर्वत्र लिंगजन्यत्वानुमानं स्वीकर्वतां मतमाह केचिदिति। समानकालीनत्वेति। समानकाली
नत्वविषयतानाघटितधर्मावच्छिन्नकारणतानिरूपितकार्यतानवच्छेदकमित्यर्थः। नादृशत्वान्नेः यद्धर्मसमानकालीनत्वविषयताकाधार इति नेः
वन्हिमानिति। पर्वतोवन्हिमानिति शेषः नन्वेवमेकस्मिन्निति यद्धर्मेति च व्यर्थं धूमकालीनेंधनवान्पर्वतोवन्हिमानित्याद्युक्तानुमितौ च
संबंधविधया सा ध्यांशे लिंगसमानकालीनत्वविषयतायास्समानकालीनत्वग्रहजन्यतानवच्छेदकत्वादेव हेतुत्वसिद्धेरभावादित्याशंकामिष्टा

120

रामं०

पत्यापरिहरति। इत्थं चेतित्याहुरिति। अस्वरसबीजं चैकस्मिन्नित्यस्य यद्धर्मेत्यस्य चाविवक्षितत्वे दीधितौ तदुपादानासंगतिः ननु पक्षत्रयेपि धू
मवान्पर्वतो वह्निमानित्याद्यनुमितौ हेतुत्वसिद्धिः तत्रसाध्यांशे लिंगसमानकालीनत्वस्याप्रकारत्वादत आहा इदं चेति। अप्रकारत्वादिति। अन्यथा धू
मी पर्वतो वह्निमानित्याकारः स्यादिति भावः वह्निनिष्ठेति इदं च धूमकालीनत्वान्वितं। व्यापकताघटकसंबंधेनैव साध्यस्य पक्षे प्रकारत्वादाह
धूमस्य वेति एवमिति अवच्छेदकावच्छेदेनानुमितावितिशेषः व्याख्यातमितिपक्षतावच्छेदकस्य पक्षतावच्छेदकताघटकसंबंधेन पक्षेऽ
वच्छिन्नत्वसंबंधेन च साध्ये प्रकारत्वं पक्षविशेषणतावच्छेदेनैव पक्षतावच्छेदकस्यावच्छिन्नत्वसंबंधेन साध्ये प्रकारत्वात्तत्र पक्षता
वच्छेदकीपसाध्यवानित्याकार इति भावः प्राहुरिति धूमस्य वन्हौ प्रकारत्वेपि धूमी पर्वतो वह्निमानित्याकाराभावसमर्थनं प्रकर्षः उपदर्शितरी
त्यैवोपपत्तौ पक्षतयारतं अंशालिंगस्य पक्षतावच्छेदकस्य च साध्ये प्रकारतान्तरकल्पने मानाभावश्चास्वरसबीजं समानकालीनत्वावगाहीति विशेषणे
पापामेकत्र द्रूपमितिविषयत्तोयेपाविशिष्टवैशिष्ट्यमिश्र पापक्षतावच्छेदकावगाह्यनुमितेरुपलक्षणतया तदवगाह्यनुमितिविलक्ष
णापाद्यायां विशिष्टवैशिष्ट्यमितिविषयताद्वितीयेति विषयताशालिबोधे च विशेष्यतावच्छेदकसमानकालीनत्वं विधेये भासत इत्याशयः
दीधितौ। कापिनेति। तथा च पक्षतावच्छेदकस्य सर्वत्रोपलक्षणतयैव भानमाचार्यमत इति भावः व्याख्यायां भानांगीकारादिति अन्यथात
त्रासंकीर्णावाधस्य दोषत्वं सर्वसम्मतं न स्यादिति भावः नवीननयेत्विति तीतिनुकारेणाचार्यमतव्यवच्छेदः तथा च नवीनमत एव तत्र बाधस्य
दोषत्वं नत्वाचार्यमत इति तन्मते गंधप्रागभावकालीनत्वस्य गंधे भानानंगीकारान्न व्यभिचार इति भावः तत्रेति। नवीनमतेपीत्यादि। तदवच्छि
न्नत्वं। तादृशकालावच्छिन्नत्वं पक्षस्य भासत इत्यनेनान्वयः नतु तत्कालीनत्वं। नतु तादृशकालकालीनत्वं। भासते। साध्ये संसर्गतया भासते।

121

भा०टी०

61

नन्वेवं गंधप्रागभावकालरूपपक्षतावच्छेदकमादाय व्यभिचाराभावेपि तदेकदेशगंधप्रागभावमादाय व्यभिचारोस्त्येव गंधप्रा
गभावकालावच्छिन्नत्वाभानेन गंधप्रागभावकालीनत्वभानादत आह अवच्छिन्नत्वं त्विति तादृशकालावच्छिन्नत्वं त्वित्यर्थः तद्वृत्तित्वं। तादृश
कालवृत्तित्वं। गंधप्रागभावं गंधप्रागभावमपि विवक्षायामपीति। अपिना पक्षद्वयपरिग्रहः अत्राद्यविवक्षाद्वये गंधप्रागभावमादाय न व्यभिचा
रप्रसक्तिः कालविशेषणतायास्तु गंधप्रागभावस्य कालीनत्वप्रतियोगितया भानेन मुख्यविशेष्यविशेषणत्वावच्छेदेन कालीनत्वप्रतियो
गितयाऽभानात् गंधप्रागभावविशिष्टे गंधप्रागभावकालीनत्वानवगाहित्वाच्चेति तृतीयविवक्षापुरस्कारेणाव्यभिचारो वारित इति ध्येयं। न
व्यभिचार इति। तत्कालीनत्वतत्कालावच्छिन्नत्वयोर्भेदेनोक्तानुमितौ तत्कालावच्छिन्नत्वावगाहित्वेपि तत्कालीनत्वानवगाहितया हेतुत्वस
त्वादिति भावः व्यभिचार एवेति घटजन्यत्वाभावादिति भावः न विवक्षितमिति। अभावप्रतियोगिकोटावित्यादि। ननु पक्षधर्मसमानकालीन
त्वग्रहाजन्यत्वाविवक्षणेन्यलिंगकायां धूमकालीनवह्निमान् साध्यकानुमितौ धूमकालीनत्वज्ञानजन्यायां कालिकसंबंधेन धूमप्रकार
कज्ञानाजन्यायां धूमाजन्यायां व्यभिचार इत्यत आह धूमकालीनेनेति। कालिकसंबंधेनेत्यादि इदं च विशेषणाविशेषणास्य विशेषणाघटि
तसंबंधेन विशेष्ये भाननियमेन वह्निविशेषणकालविशेषणाधूमस्य कालघटितेन कालिकसंबंधेन वह्नौ विशेषणत्वमित्याशयेन। यथा
श्रुतेऽसंगतेः नन्वेकस्मिन् धर्म इत्यस्याविवक्षणे धूमकालीनघटवान्पर्वतो वह्निमानिति धूमलिंगकानुमितावुक्तरीत्या कालिकसंबंधेन धू
मप्रकारकज्ञानजन्यत्वेन हेतुत्वसिद्ध्या धूमजन्यत्वं न सिद्ध्येदत आह। धूमकालीनघटवानिति। इत्यादाविवेति। अत्र एकस्मिन् धर्म इत्युपादाने
पि तद्घटितहेतुत्वसिद्धेः सत्वेन हेत्वंतरानुसरणस्यावश्यकत्वादिति भावः। हेत्वंतरेणैव। प्रथमद्वितीयकल्पोक्तहेतुनैव। प्रागुक्तमेणेति। पूर्वोक्त

122

राम०

केचित्त्विति मतानुसारेण कालिकसंबंधेन यद्धर्मप्रकारकज्ञानजन्यतानवच्छेदकत्वस्य यद्धर्मसमानकालीनत्वावगाहितायामिति विशेषणे नेत्यर्थः। आहु
रित्यस्वरसोद्भावनं तद्बीजं च एकस्मिन् धर्म इत्यस्य समानकालत्वस्य चाविवक्षणे दीधितौ तदुपादानमसंगतं विशेषणविशेषणस्येत्याद्युक्तनियमे
मानाभावः हेत्वंतरानुसारेण गौरवं पूर्वोक्तकेचित्त्विति मतस्य पूर्वप्रदर्शितास्वरसेन दुष्टतया तदनुसरणानौचित्यं चेति मतुबर्थः संबंधो। विशे
ष्यं मुख्यविशेष्यं पुरुषः। दुर्वचमिति तथा च दंडस्य मुख्यविशेष्यतावच्छेदकत्वाभावेन प्रथमद्वितीयकल्पे हेत्वभावान्न तादृशशाब्दबुद्धौ तत्क
ल्पे व्यभिचार इति भावः तथापीत्यादि। यद्यपि मतुबर्थसंबंधमादायैवोक्तस्थले व्यभिचारसंभवस्तथापि दंडमादायापि व्यभिचारप्रदर्श
नायेदं तत्रेति तत्र दंडस्य मुख्यविशेष्यतावच्छेदकत्वादिति भावः ननु पक्षतावच्छेदकविशिष्टे साध्यवैशिष्ट्यविषयकानुमितावितादृ
शशाब्दबोधेपि गमने दंडसमानकालीनत्वभाने मानाभाव इत्यत आह तत्रेति। भासते। असति बाधके ऽवश्यं भासते। तिलकी कर्म कुर्वीते
त्यादौ तादृशश्रुत्यनैः क्लृप्तत्वादित्याशयः एतेन गंगास्नायी स्वर्गीत्यादौ गंगास्नानादिसमानकालीनत्वबाधेनाभानात्तादृशनियमोऽसिद्धः घटचि
द्वानेपि प्रकृतासिद्धेः न च तत्रैकत्रद्वयमिति रीत्यैव बोधो न तु विशिष्टे वैशिष्ट्यमिति रीत्येति न दोष इति वाच्यं तथा सति तादृशवाक्यजन्यबोध
स्य निर्धर्मितावच्छेदकतयाऽप्रतिबंधकत्वेन तदनंतरं गंगास्नायी न स्वर्गीति बोधापत्तेरित्याशंकापि निरस्ता। मतांतरमाह। दीधितौ तुल्यन्याय
तयेत्यादिना। उपमितौ तथा भाने मानाभावादाह। व्याख्यायां संभवतीति स्मृतावितिन च तत्र समानकालीनत्वज्ञानजन्यतयाहित्वसत्त्वात्स्वरभक
ल्पेन व्यभिचार इति वाच्यं कालोपाधिविधया जनकतामादाय सिद्धिवारणाय समवायसंबंधावच्छिन्नतादृशज्ञाननिष्ठजनकताया विवक्षि
तत्वेन संस्कारसंबंधेन तत्र तत्स्य जनकत्वेपि हेतुसत्त्वानपायात् दीधितौ वदंतीति अत्रोपनीतभाने तद्ज्ञानं न सकलसिद्धं शाब्दबोधे तु तत्सकलेसि

123

भा०टी०

६८

ऽनुमितितुल्यन्यायत्वाभावोऽस्वरसः व्याख्यायां कालीनत्वावगाहीति विरोधिज्ञानाभावेन तदवगाहनेबाधकाभावादितिभावः व्यभिचारः मूलोक्त

व्यभिचारोद्दुरुद्धरः अतीतत्वाग्रहपर्यंतानुधावलफलमाह अतीतत्वादीति वस्तुतस्तु दीधितावतीतत्वावग्रह इति वन्ह्याधिकरणाका

लवृत्ति ध्वंसप्रतियोगित्वाद्यग्रह इत्यर्थः धूमेवन्ह्यधिकरणाकालवृत्ति ध्वंसप्रतियोगित्वादिग्रहे वन्हौ धूमाधिकरणाकालावृत्तित्वमपितुल्यवित्ति

वेद्यतयाभासतेतथा चतादृशातीतत्वादिग्रहे दशायांबाधवशादेववन्हौ धूमाधिकरणाकालवृत्तित्वरूप धूमकालीनत्वावगाहिन्यनु

मितिर्नोत्पद्यत इत्यतीतत्वाद्यग्रहपर्यंतानुधावनमितिध्येयं व्याख्यायांप्रकारांतरं प्रकारांतरं वदतामतं वर्त्तमानकालेतिप्रकृतवुत्त्यवच्छि

न्नक्षरोतप्यर्थः इत्याकारकानुमितिं प्रति इत्याकारकानुमितित्वावच्छिन्नं प्रति अतएवतादृशाकारकानुमितित्वस्य कार्यतावच्छेदकत्वादे

वव्यभिचारात् व्यभिचारप्रसंगात् तदनुमताआचार्यानु[illegible]: मतानचवर्त्तमानधूमकालीनत्वावगाह्यनु

मितित्वेस्य धूमकार्यतावच्छेदकतयानोक्तव्यभिचारप्रसंगइति वाच्यं तथासतिअतीतधूमकालीनत्वमासकाभावेनतदवगाह्यनुमिते

रनुत्पत्त्याव्यभिचाराभावेन वर्त्तमानत्वविशेषणस्यानर्थकत्वमित्याशयात् अतएवउक्तकार्यकारणभावानुसारादेवतादृशेलिंगजन्यत्वे

स्यविशेष्यतावच्छिदकात्मकलिंगजन्यत्वस्यतेनविशेष्यतावच्छेदकजन्यत्वस्यप्रयोजकत्वस्यवक्ष्यमाणत्वान्नासंगतिर्व्यभिचारइति

वर्त्तमानधूमकालीनत्वावगाहित्वेहेतोः सत्वादितिभावः विशेषणाभितीतितथाचोक्तस्थलेधूमस्यविशेष्यतावच्छेदकत्वाभावान्नव्य

भिचारइतिभावः अनुमितिः अतीतलिंगसमानकालीनत्वावगाह्यनुमितिः नचोक्तरीत्यातादृशानुमितौतद्भासकाभावान्नतद्भानसंभवइतिवाच्यं

राम०

असंसर्गाग्रहादिघटितसामग्र्याएवतद्भासकमित्याशयात् प्रयोजकसत्वेप्रमात्मकपरीमर्षादपिक्वचिद्भ्रमात्मकानुमितेरिष्टत्वात् धर्मांत

१२४

ना२

125

रेतुक्तौ सिसाधयिषयासाध्यलिंगकानुमितौ हेतुत्वसिद्धिरित्यत आह तद्धर्मनिरूपितेत्यादिना निरूपितांतं स्वरूपकथनं ननु विवक्षितं प्रयोज
नाभावात् लाभायेति अन्यथा पर्वतो धूमकालीनधूमवद्वह्निमानित्याकारिकायामन्यलिंगानुमितौ धूमादिजन्यायां व्यभिचारादित्याश
यः अंतरपदमिति स्वनिरूपितमुख्यविशेष्यतावच्छेदकतया स्वस्याभानेनांतरपदात्तादृशाभानलाभ इति भावः पक्षतावच्छेदकमात्रेति मा
त्रपदेनलिंगाद्यवच्छेदः तादृशांशेशाधर्मेति वर्त्तमानतद्धर्मेत्यर्थः साध्यांशेभानादिति तत्र वधूमकालीनत्वरूपधर्मांतरवैशिष्ट्यावगाहित्वा
दिति शेषः वह्नित्वाजन्यतायां व्यभिचारस्सनेत्यर्थः प्रतिज्ञायाः मूलोक्तप्रतिज्ञायाघमिति ज्ञापमानविशेषणाजन्येति साध्याविशेष
णांशवत्त्वे सति तन्मते विशेष्यतावच्छेदकार्थकत्वेन विशेष्यतावच्छेदकजन्यत्वस्य प्रतिपाद्यमिति भावः दीधितौ सूच
नायेति तथा च हेतौ न तत्प्रवेश इति भावः न चोक्तप्रयोजकत्वसूचनमेव निष्फलमिति वाच्यं तल्लिंगकानुमितेस्तल्लिंगाजन्यत्वे तत्का
लीनत्वविषयकतानियामकाभावेन तद्विषयकतानियमो न स्यादिति विषयपरिशोधकतर्कसूचनस्यैव प्रयोजकत्वसूचनफला
त्वात् व्याख्यायां तदनुमतं आचार्यानुमतं कालीनत्वविषयकतानियामकाभावेन तद्विषयकतानियमो न स्यादिति विषयपरिशोध
कनुमतं हेतुविशेषणेति वर्त्तमानेत्यादितद्विशेषणेत्यर्थः ननु परामृश्यमानत्वेन्यपरामर्शाजनकत्वेपि लिंगत्वेन परामर्शजनकता
मादाय परामर्शस्य व्यापारता संभवतीत्यत आह फलजनकतेति फलव्यापारौ प्रतिकरणस्यैकरूपेणैव कारणत्वमिति नियमादिति भावः
दीधितौ विरोधाभावादिति तादृशनियमे मानाभावात् चक्षुरादौ व्यभिचारादौ व्यभिचाराच्चेति भावः लिंगत्वेनैवेति एवकारेणैवकारणा
त्वमिति नियमादिति भावः दीधितौ विरोधाभावादिति तादृशनियमे मानाभावात् चक्षुरादौ व्यभिचाराच्चेति भावः लिंगत्वेनैव एवकारेणा

मतं५

परामर्षस्यावच्छेदकत्वेव्यवच्छेदः व्याख्यायां परामृष्यमाणलिंगत्वेनैवेति एवकारेणाऽशुद्धलिंगत्वव्यवच्छेदः लिंगस्य विशेषणात्वं स्वविशेष्य
परामर्षान्वयिनाकारेणात्वेनान्वयित्वं इति दृष्टव्यमिति इदं मुपलक्षणां वन्हिव्याप्यधूमवान्पर्वतः प्रमेयं चेति परामर्षविशेषस्यविष
यतावच्छेदकं पत्प्रमेयत्वं तदवच्छिन्नत्वं वस्तुमात्रस्यैवेत्यपि दृष्टव्यं परामर्षविषयत्वं तदवच्छेदकावच्छिन्नत्वं कश्चिदितिउक्तरी
त्यासर्वत्र वस्तुमात्रस्यैव परामर्षविषयतावच्छेदकावच्छिन्नत्वसंभवे प्रमेयपक्षकादिपर्यंतानुधावनमफलमित्यस्वारसः अत्र वस्तुमा
त्रस्यैवानुमितिहेतुत्वे हेतुत्वं अनुमिति हेतुत्वं अनुमितिहेतुत्वं दीधितावन्वयव्यतिरेकादीति तत्सहकृत प्रत्याक्षादीत्यर्थः आदिनानुमा
नादि परिग्रहः व्याख्यायां तादृशीति लिंगविशिष्टेत्यर्थः एवोक्तेति विशिष्टस्य कारणात्वं तन्मते परामर्षमित्यादीत्यर्थः इष्टापत्तिरितिपराम
ष्यमाणलिंगत्वेन हेतुत्वेति हेतौ वस्तुमात्रस्यैवाहेतुत्वादतीतादिलिंगकानुमितिस्तन्नेष्यत एवेति न तत्र व्यभिचार इति हृदयं विषय
त्वोक्तावितिन्न्चाननुगमः स्वविषयतावच्छेदकधर्मत्वसंबंधेन तादृशपरामर्षवत्वे तात्पर्यात् विषयताविशेषः व्याप्तिविशिष्टपक्षध
र्मत्वविषयताविशेषः अतिप्रसंगः प्रमेयत्वादिना ज्ञातादनुमित्यापत्तिरूपो चि प्रसंगः विनिगमनाविरहः तादृशविषयताविशेषसंबं
धेन लिंगविशिष्टत्वेन ज्ञानविशिष्टत्वेन वा हेतुत्वमित्याकारकः नस्यादित्तितथा चलिंगस्य हेतुत्वं दुर्वारमितिभावः दीधितौ नातिप्रसंगोति
अतिप्रसंगश्च परामर्षश्चान्यकालेऽनुमित्यापत्तिरूपो बोध्यः ननु परामर्षस्य हेतुत्वेऽतीतादिलिंगस्थलेप्यनुमितिस्यादत आह व्याख्यायां
हविषयस्यैतिपरामर्षविषयस्य लिंगस्येत्यर्थः तदानीलिंगस्यातीतत्वादिदशायांसर्वसिद्धत्वादितितथा चेष्टापत्तिरिति भावः संयुक्तेतिसं
योगोयलक्षितनक्षितेत्यर्थः लाघवात् शरीरलाघवात् उपस्थितिलाघवमाह आवश्यकत्वाच्चेति संयोगहेतुत्वं संयोगहेतुत्वमेव दीधितौ

126

राम०

व्यवधानमिति अन्यथासिद्धिरित्यर्थः व्याख्यायां नत्विति चक्षुराद्यभावकाले सामान्यसामग्र्यभावादेव फलाभावोपपत्तेरिति भावः इंद्रियादि
वदेव लिंगस्यापि हेतुत्वं स्यादेवं तत्राह दीधितौ नचेति व्याख्यायां संभवेपीति लौकिकप्रत्यक्षस्य विषयजन्यत्वादिति भावः तदेव तदसंभ
वमेव ग्रह। इति सतिसप्तमी अन्तीद्दि पस्यापीति लिंगस्येति शेषः परामर्श इति अनुमित्यात्मक इत्यादि अस्मन्मते तु लिंगपरामर्षहेतुतावाघस्य न
तेनु कापि कारणानां कार्यतायां चा इच्छादिसमकार्येषु ज्ञानादिसमकारणानां यथासंख्यमन्वय इत्याशयेनाह इच्छेत्यादि इत्येवंरूपेति कालिक
देशिकरूपेत्यर्थः व्यापकतैवेति एवकारोवधारणे एतेन समवायस्य कार्यताकारणताघटकत्वेन घटभिन्नवन्हि अन्यो इति अत्र भिन्नांतशून्या
नयोः कर्मधारयः एकेति वन्हिशून्यैकेत्यर्थः अपरेति वन्हिशून्यापरेत्यर्थः उपात्तमिति इदमुपलक्षणं वन्हिशून्यत्वाघटितो हेतुरप्रसिद्ध इति तदू
रित उपात्त इत्यपि द्रष्टव्यं अन्यत्रापि। अन्यसाध्यकेपि ननु लाघवात्साध्यवद्भिन्नभेद एव सर्वत्र वर्त्तमानो हेतुरस्त्वित्यत आह साध्यवद्भिन्नांत
रस्येति साध्यवद्भिन्नभेदस्येत्यर्थः क्वचिन्नयेव पाठः नित्यसाध्यके साध्यात्मकाभावस्य वर्त्तमानत्वसंभवादाह सर्वत्रेति तत्। साध्यवद्भिन्न
भेदरूपं लिंगं नोक्तमिति। घटभेदविशिष्टघटभिन्नवन्हिभून्यभेदरूपविशिष्टभेदस्य चातिरिक्ततया तस्य सर्वत्र वर्त्तमानत्वसंभवत्येवेति ह
दयं वाधके नैवेति धूमप्रागभावादेर्लिंगत्वस्येति शेषः पदापत्तेरित्यादि अत्रायमाशयः धूमप्रागभावसमानाधिकरणात्यंताभावप्रतियोगितानव
च्छेदकवन्हित्वावछिन्नवन्हेर्धूमप्रागभावोत्तरकालावछिन्नसंयोगसंबंधेन पदधिकरणांतद्वृत्तिर्धूमप्रागभाव इत्यादिव्याप्तिज्ञानादनाग
तधूमस्थलेनुमितिः एवं च तादृशानुमितौ धूमप्रागभावोत्तरकालावछिन्नसंयोगसंबंधेन वर्त्तमानवन्हिर्न भासितुमर्हतीति तादृशसंबंधे
न वर्त्तमानवन्हेरवृत्तेः व्याप्तिज्ञाने साध्याधिकरणत्वं येन संबंधेन गृह्यते तेन संबंधेनैवानुमितौ साध्यभानं नियमेन च संयोगसंबंधेन वर्त्तमा

भा०टी०

64

नवन्हेर्नानुमानसंभवोपि आचार्यमते सर्वत्रानुमितौ हेतुकालावच्छिन्नसाध्यतावच्छेदकसंबंधेन साध्यस्य भानमेव हेतुसमानकालीनसाध्यभा
नपदार्थः तथा च धूमप्रागभावलिंगकानुमितौ धूमप्रागभावोत्तरकालावच्छिन्नसंयोगसंबंधेनानागतवन्हेरेव भानं न तु वर्त्तमानवन्हेः
एवं धूमध्वंसादावपि बोध्यमिति अव्यभिचरितत्वरूपं साध्यवदन्यावृत्तित्वरूपं व्याप्तिसत्वेन। निरुक्तव्याप्तिसत्वेन। तस्या व्याप्यतावच्छेद
काघटितत्वादित्याशयः। नियतसामानाधिकरण्यस्य उक्तरूपेण पतत्वे सति सामानाधिकरण्यपदे। दीधितौ सव्यापकेत्यादि। केवलान्वयिन्य
व्याप्यपत्या साध्यवदन्यावृत्तित्वे सति सामानाधिकरण्यस्य व्याप्तित्वासंभवादिति भावः व्याख्यायां समनियतत्वेनेति इदं च धूमसंयोगोत्प
त्तेरेव संयोगेन धूमोत्पत्तिः एवं च पर्वतादौ संयोगेन धूमोत्पत्या धूमप्रागभावोपि वर्त्तत इत्याशयेन बोध्यं। यथाश्रुते संयोगेन धूमवति प
र्वतादौ धूमाववृत्ति धूमप्रागभावस्यासत्वेन धूमतत्प्रागभावसमानाधिकरणाभावप्रतियोगितात्वयोः समनियतत्वेनासंगत्यापत्तेः सं
सुखीन एव। समीचीन एव वा। नाभ्युपगमवाद इति यावत् धूमप्रागभावस्यापि तद्व्याप्तित्वेन व्याप्यत्वादाह हरीधितौ नवेति। व्याख्यायां
।धूमप्रागभावत्वमिति। ननु द्रव्यत्वादौ साध्ये घटप्रागभावत्वादिकं व्याप्यतावच्छेदकमेव घटादेः स्वप्रागभावानधिकरणेऽपि भूतला
दौ संयोगादिना वृत्तितया घटतत्प्रागभावसमानाधिकरणाभावप्रतियोगितात्वयोः समनियतत्वादिति तदसत् उक्तरीत्या भूतलादावपि
घटप्रागभावसंभवात्। वस्तुतस्तु। पर्वतादौ संयोगेन धूमोत्पत्तिप्रत्ययेन धूमावयवे धूमस्य समवायेनोत्पत्तौ धूमावयवपर्वतादिसंयो
गेनावच्छेदकतया पर्वतादौ संयोगेन धूमोत्पत्तिरविकलैव एवं च घटप्रागभावत्वादिकं व्याप्यतावच्छेदकमेवेत्यपि सम्यक् सं
योगेन चक्रादावेव घटाद्युत्पत्या भूतलादौ घटप्रागभावासंभवात् पश्चात् समवायेन धूमहेतुकास्थलाभिप्रायेणासमनियतत्वादि

मव ७ 130 पो ६ को ४ राम०

पवसंपु को २

धानं। केचित्तु संबंधभेदेनोत्पत्तिभेदात्संमवायेनोत्पत्तिराघक्षणासंबंधरूपा संयोगेनोत्पत्तिस्तु द्वितीयक्षणासंबंधरूपेवेति प्राहुः अन्यत
त्वयमूहं सुधीभिरिति दिक्। अस्ति हसमानाधिकरणाभावप्रतियोगितात्वस्य जलत्वनिष्ठाभावप्रतियोगितावच्छेदके तज्जलवत्पर्यंताभाव
प्रयोगितात्वाघभाववद्वृत्तित्वाभावादाह यत्किंचिदिति भवतीति एवं च दीधितौ लघुगुरूसाधारणास्येत्यनंतरं पारिभाषिकस्येति शेषः इति
२ + प्रतियोगितात्वस्येति· वस्तुतः प्रतियोगितावच्छेदकत्वत्वस्येति बोध्यं एवमग्रेपि· दीधितौ· अतिरिक्तत्वादिति। धूमसमानाधिकरणाभाव +
+ प्रतियोगित्वत्वाघवच्छिन्नाभावादन्यत्वादित्यर्थः तस्य न्यूनवृत्तित्वादिति भावः। व्याख्यायां अतिरिक्तवृत्तितयेति· नीलधूमनिष्ठ प्रतियो +
+ गितावृत्तित्वादिति भावः। तथा यद्धर्मविशिष्टेत्यादि· वस्तुतः प्रतियोगितात्वमित्यत्र प्रतियोगितावच्छेदकत्वं साध्यनिष्ठत्यत्र साध्य +
घु७ + तावच्छेदकनिष्ठत्वं बोध्यं २ मते नेति एतन्मते लघुगुरूसाधारणस्य पादे गुरुधर्मस्यावच्छेदकतांगीकारे योत्यर्थः उक्तरीत्योपपत्तौ
गुरूधर्मावच्छेदकत्वानुसरणमफलमित्यसरसादाह वह्नवह्नीतिधूमप्रागभावत्वादेर्व्याप्यतावच्छेदकत्वव्युदासइति धूमप्रागभाववत्
विशिष्टसमानाधिकरणाभावप्रतियोगितात्वस्य वह्निनिष्ठाभावप्रतियोगितावच्छेदकधूमसमानाधिकरणाभावप्रतियोगितात्वाभाव
वद्वृत्तित्वादिति भावः तदाशंकाग्रथेत्यादिनालिंगस्य हेतुत्वाशंका। परामर्षत्वे। लिंगपरामर्षत्वे। संभवादिति। तथा च घटत्वावच्छिन्नं प्र
तिदंडाघवच्छिन्नकालत्वादिनैव हेतुत्वसंभवे घटत्वाघवच्छिन्नं प्रतिदंडत्वादिनापि हेतुत्वविलयप्रसंगादित्याशयः धूमकालइति
तथा च धूमकालावच्छिन्नसंयोगसंबंधेन वह्निव्यापकतत्ताज्ञानकालएव धूमकालावच्छिन्नसंयोगसंबंधेन वह्निविधेयकानुमिति र्भव
वतीत्याशयः एतत्कालेति धूमकालेत्यर्थः एवमग्रेपि। तत्कालीनवत्मूर्थिनइति। एतेन इतियत्तेनमूलेयद्धूमकालीनवत्मूनुमानोपपादं

127

भा०टी०

ननु तत्रानुमितेर्लिंगजन्यत्वापत्त्या पञ्चं तदनभ्युपगमात् नापि विधेयेन हेतुः पक्षतावच्छेदकसमानकालीनत्वभानस्य शाब्दबोधादौ दृष्टत्वात् तस्य पक्ष
तायस्त्वयं लिंगस्य हेतुः पक्षतावच्छेदकत्वानभ्युपगमादित्याशंकापि निरस्ता धूमकालीनवह्न्यर्थिनः पर्वते प्रवृत्त्युपपत्तेरुपपादनस्यावश्यकत्वा
त् केचित्तु नानालिंगादेकाकारानुमित्युत्पत्तौ व्यभिचारेण धूमपरामर्शादेर्धूमकालावच्छिन्नसंयोगसंबंधेन धूमवान्पर्वतो वह्निमा
नित्यनुमितौ तेन संबंधेन पर्वतो वह्निमानित्यनुमितावेव वा हेतुत्वं वाच्यं एवमन्यत्रापि लिंगस्य परं न हेतुत्वमुक्तमुक्तेरित्याश
येन मूलेन तदुपपादनमिति प्राहुरित्यादिक् व्याप्तिज्ञानासंभव इति विशिष्टवैशिष्ट्यावगाहनस्यानुभवतत्त्वस्य वा विशेषणतावच्छेदकप्र
कारकज्ञानजन्यतावच्छेदकतया स्मरणात्मकपरामर्शस्य व्याप्तिप्रकारकज्ञानाजन्यत्वादिति भावः करणमिति करणजन्यत्वे सति
फलजनकव्यापारजनकस्य फलजनकत्वानियमादिति भावः फलेतीति तथा च मानाभावे नानुमित्यजनके प्रत्यक्षात्मकपरामर्शजन
के लिंगेंद्रियसंयोगादौ व्यभिचारयावोक्तनियमो सिद्ध इति भावः येन रूपेणेत्यादिः अत्र येन रूपेण द्वारद्वारिणोः फलजनकत्वं तेन रू
पेणानुत्योरन्योन्यं कार्यकारणभाव इति नियमोभिप्रेतस्तत्रांशद्वयं द्वारस्य येन रूपेण फलजनकत्वं तेन रूपेण द्वारिकार्यत्वमित्येकः
द्वारिणा येन रूपेण फलजनकत्वं तेन रूपेण द्वारकारणत्वमित्यपरः तत्र करणतेत्यंतेन द्वितीयांशलाभः व्यापारेत्यंतेन च प्रथमां
शलाभ इति ध्येयं अनुमितिकरणतेति प्रत्यक्षात्मकपरामर्शस्य लानुरोधेनेत्यादिः व्याप्तिविशिष्टस्मृतीति व्याप्तिविशिष्टस्मृतित्वाव
च्छिन्नेत्यर्थः दीधितौ स्मृतिहेतुत्वमिति व्याप्तिस्मृतित्वावच्छिन्नं प्रत्येव व्याप्तिज्ञानत्वेन हेतुत्वादिति भावः व्याख्यायां परामर्शेति। अनुभवा
त्मकेत्यादि। दीधितावनुमितिहेतुत्वमिति। प्रत्यक्षाद्यात्मकपरामर्शजन्यानुमितौ व्यभिचारादिति भावः व्याप्तिविषयकेति व्याप्तिवि

128

राम०

षयकज्ञानत्वव्याप्तिविषयकस्मृतित्वाभ्यामित्यर्थः। विशिष्टविषयकत्वाभ्यां वा। व्याप्तिविशिष्टविषयकज्ञानत्वव्याप्तिविशिष्टविषयक
स्मृतित्वाभ्यां वा। वाशब्दो नास्त्यां व्याख्यायां। उद्बुद्धेरिति। स्फुरपति। जन्यप्रत्यक्षं तत्त्वावच्छिन्नं। चाक्षुषादिकं वेति। तत्त्वावच्छिन्नादिकं वेत्यर्थः
अत्र विकल्पस्य सामान्यविशेषभावेन व्यवस्थितो द्रष्टव्यः एवमग्रेपि हेतुनेतिनतु तेन रूपेणानयोः परस्परं कार्यकारणभाव इति शेषः एवमग्रेपि य
थायोगं बोध्यं। तत्र फले। तद्धर्मावच्छिन्नफले। दीधितौ। जन्यत्वविशेषितेनेत्यादि। तथा च तत्तन्नियमे चरमांशनिर्वाहेपि प्रथमांशानिर्वा
हात् क्षतिरेवेति भावः। व्याख्यायां निश्चयत्वेन लक्षणेति पंचमीतत्पुरुषः। एवमग्रेपि। दीधितौ व्याप्तिविशिष्टवैशिष्ट्येत्यादि। अत्र व्याप्त्यं
शे संशयात्मकपरामर्शस्यापि व्याप्तिविशिष्टवैशिष्ट्यावगाहितया तदंशेपि निश्चयत्वनिवेशः न च व्याप्तिप्रकारकनिश्चयोत्तरं तस्यानुत्प
त्यात्तत्पूर्वं तदभावेन कथं तस्य व्याप्तिविशिष्टवैशिष्ट्यावगाहित्वमिति वाच्यं व्याप्तिप्रकारकनिश्चयोत्तरमपि व्याप्तिव्याप्यभावोभयप्रकारके
च्छाधीनस्य व्याप्त्यंशे संशयात्मकपरामर्शस्य व्याप्तिविशिष्टवैशिष्ट्यावगाहित्वसंभवात् अत एव निश्चयत्वे नेति लिंगांशाभिप्रायं नतु व्या
प्त्यंशाभिप्रायमित्यपि निरस्तं संकोचे मानाभावादुक्तरीत्या तन्निवेशस्यावश्यकत्वाच्च। व्याप्त्यंशे संशयसाधारणपरस्य संशयसाधार
णेनेत्यादिग्रंथस्य लिंगांशे निविष्टादनुमितिजनकतावच्छेदकनिश्चयत्वाद्धेलक्षणप्रवृत्त्यकत्वस्य स्वारसिकत्वाच्च। व्याख्यायां। मूलस्व
रससिद्धत्वादिति। मूलं च तदनंतरं विशिष्टवैशिष्ट्यज्ञानं पक्षे वान्हतीयलिंगपरामर्श इति प्रागुक्तं बोध्यं अत्र मूलस्वरससिद्धत्वादित्यनेना
नुमितिलक्षणोक्तरीत्या युक्तिसिद्धं व्यापकविशेष्यविशिष्टपक्षमितिविषयतावगाहिपरामर्शस्यैव जनकत्वं दीधितिकाराभिप्रेतमिति
सूचितं एतेनपदिचेत्युक्तमादीधितिकारस्यापि विशिष्टवैशिष्ट्यविषयताया एव जनकतावच्छेदकत्वमभिमतं विशेष्यविशेषणामिति वि

131

८५

रामः

भा०टी० षयता शालिपरामर्शसत्वे विशिष्टवैशिष्ट्यविषयताशालिपरामर्शकल्पयित्वा स्वरूपाविलंबेनानुमितिस्वीकारान्नत्रैते फलापलापः प्रयुक्तं चैतत्तथा 132
सति व्याप्यंशे निश्चयत्वनिवेशेन लाघवात् अत एव वक्ष्यमाणाविलंबकल्पनागौरवमपि न दोषायेति नवीनानामुक्तिर्निरस्ता। व्याप्तिविशिष्टेत्यादिदीधि
तिविरोधात् पूर्वोक्तमनुमत्यां तन्निवेशस्यैतत्वाप्यावश्यकत्वाच्च अत एवात एवेत्यादिकमपि संदर्भमेवेति दिक् हेतुतावच्छेदकादेरिति आदिना सा
ध्यतावच्छेदकपरिग्रहः हेतुतावच्छेदकादेरननुगमादाह अभावस्य चेति गौरवं। अन्यस्मिन्नफलाननुगुणात्मनिवेशप्रयुक्तगौरवं। ननु दंडत्वं
न कार्यत्वव्याप्यो जातिविशेषः हस्तादितो घटानुदयप्रसंगात् नापि पृथ्वीत्वव्याप्यो हस्तादिसाधारणाः स्वावेगवत्पयः पवनप्रेरितचक्रादुदयानु
दयप्रसंगादत आह प्रकृष्टमहत्वेति असरेणुवारणाय प्रकृष्टेति। गृहादिवारणाय वेगवदिति। तादृशेति उक्तरूपाक्रांतेत्यर्थः दंडेति। कोमल
त्यादि तत्तु अभिरूपकारी विरहयवकुत इत्यत आह। तत्र चैकेति। उभयमते हृढदंडत्वेन दंडत्वेन च हेतुतावादिमते यो भिन्नजनकत्वेनाभ्यसु
पृथ्वीयकेत्वेन। तथात्वं घटजनकत्वं एकं। दंडहस्तादिसाधारणं। कारणतेति। घटकारणतेत्यर्थः तेन। विशेष्यनिवेशेन। ननु यत्र मिलितकोमल
दंडत्रयाद्युमे घटस्याचोत्पत्तिस्तत्रैक दंडाद्यपितदापत्तिस्तस्याप्युक्तजनकाभावच्छेदकाक्रांतत्वादत आह यत्रेति क्षुद्रेति कोमलेत्यर्थः ननु
मिप्रयोजकौ वैजात्यात्मकावयवसंयोगविशेषए व परंपरया संबंधेन घटजनकतावच्छेदकः तथा च सोवर्णावेणवादि दंडहस्तजलवायुयंत्रेष्व
नुगतमेव दंडत्वं यत्र च बहुभिः कोमलदंडैस्तत्कथमापतितत्रतेषां तत्कालीनान्योन्यावयवसंयोगेषु पितादृशी जातिरस्त्येवेति नानुपपत्तिः एवं चो
क्तविशेषहेतुताकल्पनमनर्थकमत आह। इतिस्वयमूह्यमिति। इत्यादिस्वयं बोध्यमित्यर्थः अयमाशयः उक्तविशेषहेतुत्वाकल्पने कोमलदं
डैः परस्परासंबद्धैरपि भ्रमणमुत्पाद द्वारा घटोत्पादापत्तिः कारणतावच्छेदकावलीरूपस्य सत्त्वे एव कार्योत्पत्तिनियामकतयातेषां यदाकदाचित्ताद

राम०

इदमिति-अन्यथासि [illegible]या ५

ग्रसंयोगविशेषवत्वात् यतेनादिपदग्राह्यंमूर्त्तत्वमेवदंडजलादिसाधारणं घटजनकतावच्छेदकं अतिप्रसंगाभंगात्सहकारिविशेषविरहान्निवं
धनएवेतिनमोक्तंपरास्तंअसंताजनकव्यावृत्तोक्तरूपेणकारणत्वेसंभवतितत्साधारणरूपेणकारणतायाअन्याय्यत्वादिति।दंडचक्रसंयोगेवै
जात्यंस्वीकृत्यविजातीयसंयोगवत्वरूपदंडत्वंघटजनकतावच्छेदकमितिमतंदूषयतिएवमितिअन्यत्रापि।ग्रात्युवोधादावपिव्यापाराभावेनेति
तत्रत्यपक्षकपरामर्षस्यानियतस्यैवव्यापारत्वादितिभावः इदमितिअन्यथा-तत्सत्वात धूमव्याप्तिज्ञानकार्यतावच्छेदकसत्वात् तथाचत
त्रस्वजन्यपरामर्षसंबंधेनधूमव्याप्तिज्ञानाभावेनव्यभिचारइतिभावः [illegible]व्याप्तिधीत्वादीनामनुमितिजनकतानवच्छेदकत्वं।उक्तमिति
शेषः निविष्टत्त्वेतिइदंचान्यत्रक्लृप्तेत्यस्यावश्यक्लृप्तेत्यर्थानुसारेण।यथाश्रुतानुसारेणाह।स्वातंत्र्येणेति।तथाचषष्ठीपमन्यथासिद्धिरि
तिभावः तदनभ्युपगमेतु।नित्यस्येतिव्याप्तेरनभ्युपगमेतु।वाच्यमिति।व्याप्तिधीत्वादिनाकारणत्वानुरोधादित्यादि।वस्तुतस्तुकार्यत्वावच्छि
न्नकारणतावच्छेदकादृष्टत्वव्यापककालत्वेनकार्यत्वावच्छिन्नंप्रतिकारणत्वानुरोधेनतदवश्यंवाच्यमिति ध्येयं करणत्वं।अनुमिति
करणत्वं।मात्रस्यैवेति।आत्ममनस्संयोगद्वारेतिशेषः दीधितौमनोसाधारणकारणाकज्ञानेति।मनोसाधारणकारणाकत्वंचमनोनिष्ठक
रणताकजन्यज्ञानत्वानवच्छिन्नजन्यत्वं।ज्ञानत्वनिवेशान्मनोसाधारणकारणाकचिकीर्षासुखादिमुदासः व्याख्यायां।प्रत्यक्षकरणा
स्यैवेति।मनसइतिशेषः इदंचमानसप्रत्यक्षाभिप्रायेणचाक्षुषादौचक्षुरादेरपिकरणत्वादितिध्येयं लाघवादाह।आत्ममनःसंयोगे
तितत्रत्यपरामर्षोत्रेरीतिस्वसामानाधिकरण्यपत्वाव्यवहितोत्तरत्वोभयसंबंधेनतत्तल्लिंगकपरामर्षविशिष्टेत्यर्थः नष्टातिरितिअनुमितित्वा
वच्छिन्नकरणेनैवनिर्वाहादितिभावः अनुमितिमात्रकरणेनैवनिर्वाहाभिप्रायेणमहाव्वन्हिव्याप्तिज्ञानत्वेनेत्यादि।दीधितौ।बदंतीति।अ

नि१

133

134

67

मा०टी० त्वज्ञानत्वेनानेकज्ञानकरणत्वेगौरवेणालाघवान्मनस्त्वेनकरणत्वमेवोचितमित्यस्वरसः पल्लवितेनेतिपल्लवश्च जन्यज्ञानत्वावच्छिन्नेमन
सस्सामान्यकरणत्तयेवनिर्वहेऽनुमितित्वावच्छिन्नेनमनस्त्वेनापिकरणत्वंतच्छिन्नमकरणकत्वानुपपत्त्याउक्तसामान्यकरणतयेवतदुप
पत्तेः नापिकार्यमात्रवृत्तिजातेःकार्यतावच्छेदकत्वनियमानुपपत्त्याताद्दशनियमेमानाभावात् नाप्यनुमितित्वावच्छिन्नस्याकस्मिकतापत्त्या
विशेषसामग्रीणांनियामकत्वस्यावश्यंवाच्यतयातैनैवतदापत्तिवारणात्। अन्यथामनसःसर्वदासत्वेनसर्वदैवानुमितित्वावच्छि
न्नोर्दुर्वारत्वात् स्मान्मनःसाधारणकरणमेवप्रमावैजात्यंचप्रमाणभेदइतिवक्तृतस्तुमनसोप्यतिरिक्तस्याभावेनानुमितित्वाद्यवच्छि
न्नेज्ञानत्वेनैवात्मत्वेनैववाकरणत्वंतदपिवामास्तु अन्यज्ञानत्वावच्छिन्न एवरूपयोतेनरूपेणकरणतयानुमितित्वावच्छिन्नेपिनि
र्वाहादित्यादिकंबोध्यमितिदिक् इतिश्रीमन्महादेवविरचितायांसर्वोपकारिण्यांभवानंदीव्याख्यायांलिंगकरणताग्रंथव्याख्या। अत्र
तच्चानुमानमित्यादिमूले। केवलान्वयिसाध्यकेति। वाच्यत्वादिसाध्यकघटत्वादिहेतोरित्यर्थः। तुरीयतापत्तिरिति। अयमाशयः मू
लेकेवलव्यतिरेकिसिद्धान्तलक्षणोनिरूपयिष्यत्यादिनाआचार्यमतानुसारेणव्यतिरेकसहचारमात्रगृहीतव्याप्तिकत्वंकेवलव्यतिरेकि
लक्षणमुक्तंतत्रैतद्दृष्टान्तेनोभयसहचारगृहीतव्याप्तिकत्वमन्वयव्यतिरेकिलक्षणमपिसूचितं। व्याप्तिश्चोभयत्रापिअन्वयव्याप्तिर्ग्री
ह्या। आचार्यैर्व्यतिरेकसहचारेणाप्यन्वयव्याप्तेरेवग्रहांगीकारात् अग्रेन्वयइत्यादिनागृहीतव्याप्तिभेदान्तयोर्भेदइतिस्वाभिप्रायाविष्करणान
गृहीतव्यतिरेकव्याप्तिमात्रकत्वंगृहीतोभयव्याप्तिकत्वंचतयोर्लक्षणंसूचितं। एवंचात्रकेवलान्वयिहेतोरेवग्रामश्रुतकेवलान्वयित्वेनविभागेऽक राम०
स्यद्रूपएवोक्तहेतोस्तुरीयतापत्तिःतस्यकेवलान्वयित्वाभावात्। उक्तलक्षणद्वयानाक्रान्तत्वाच्चेति। एतेनान्वयव्यतिरेकिलक्षणोपिआद्यकेवला

न्वयिलक्षणानुसारेणाव्यतिरेकिपदस्य यथाश्रुतार्थकत्वयाग्रहीतान्वयित्वे सति व्यतिरेकप्रतियोगित्वमेवान्वयव्यतिरेकिलक्षणं एवं चोक्तहेतोरन्वयव्य
तिरेकित्वे पि वान्तर्भावसंभवेन कथं तुरीयतापत्तिरिति शंकानिरस्ता केवलव्यतिरेक्यादाविति आदिनान्वयव्यतिरेकिपरिग्रहः तादृशहेतोरिति केव
लव्यतिरेक्यन्वयव्यतिरेकिसाधकव्यतिरेकिहेतोरित्यर्थः तुरीयतायत्तिरित्यनुषज्यते अयमाशयः केवलव्यतिरेक्यादिहेतोरेव केवलव्यतिरेकित्वादि
नाविभागे इतरेभ्यो भिद्यते पृथिवीत्वात् वह्निमान् धूमादित्यादेः साध्यवदन्यावृत्तित्वरूपव्याप्तिमात्रग्रहे ऽन्वयसहचारमात्रग्रहदशायां चतुरी
यत्रिः केवलान्वयित्वाभावादुपदर्शितलक्षणाद्वयानाक्रान्तत्वाच्चेति आहेति मूलस्थकेवलान्वय्यादिपदानां प्रमेयत्वपक्षके चास्तित्वसाध्यसा
न्वयव्यतिरेकित्वमित्यग्रिममूलोक्तीनां केवलान्वयिसाध्यकादिपरतामाहेत्यर्थः तत्रेतीति तथा च तेष्वित्यनेनाधाया मध्ये इत्यनेन निर्धारणसप्तमीयं
नत्वाधारसप्तमीति सूचनेन चरमाया अनुपपत्तेरभावइति भावः आह। असद्विपक्षत्वस्यैवार्थमाह। अत्यन्ताभावेतीति अत्यन्ताभावाप्रतियोगि
साध्यकत्वं चात्यन्ताभावाप्रतियोगिविधेयकानुमितिकरणत्वं। एवमग्रेपि नन्वेवं प्रमेयत्वादेरपि व्यतिरेकभ्रमदशायां तत्साध्यकहेतोः केवलान्व
यित्वापत्तिरित्याशंक्येष्टापत्याय परिहरति उक्तं चेति केवलान्वयित्वमेव। केवलान्वयित्वमिष्टमेव। मूलनीतेति उपदर्शितकेवलान्वयिलक्षणा
नुसारेण मूलकृता केवलव्यतिरेक्यादेर्लक्षणाप्रणयनादिति भावः अगृहीतान्वयमिति नगृहीतोन्वयो हेतुसहचारो यत्र तादृशमित्यर्थः व्यति
रेकिभेदप्रतियोगितावच्छेदकं। तत्साध्यकं। तद्विधेयकानुमितिकरणं। अन्वयव्यतिरेकिवारणाय। अन्वयव्यतिरेकिणीति व्याप्तिवारणाय। एवम
ग्रेपि। केवलान्वयीति। प्रमेयत्वादेर्व्यतिरेकित्वभ्रमकालेपि केवलान्वयित्वोपगमादिति भावः अत्र तत्कालावच्छिन्नप्रकृतहेतुसाध्यसहचारनि
श्चयाभाववत्तत्पुरुषीयव्यतिरेकिसाध्यकानुमितिकरणं तत्कालीनतत्पुरुषीयकेवलव्यतिरेकीति लक्षणानिष्कर्षो बोध्यः अत्र कालान्तरावच्छेदेन

135

त४ त५

म०टी० दृशनिश्चयाभावमात्रायान्वयव्यतिरेकिण्यपतिव्याप्तिवारणाय भावेऽवच्छिन्नांतं विशेषणं घटपटादिसहचारनिश्चयकाले हेतुसाध्ययोः सहचार
निश्चयाभावकाले व्याप्तिवारणाय पक्षे हेतु साध्येति। अन्यहेतुसाध्यसहचारनिश्चयमात्रकालेऽव्याप्तिवारणाय प्रकृतेति हेतुसाध्यविशेषणं। केवलान्वयि
साध्यसाधनयोर्निश्चयकाले व्याप्तिवारणाय सहचारेति। प्रकृतहेतुसाध्यसहचारसंशयकालेऽव्याप्तिवारणाय निश्चयेति। तादृशनिश्चयाभावस
सद्दशत्तनयाता दृशनिश्चयकालेपि सत्वादतिव्याप्तिवारणाय तादृशनिश्चयाभावकालीनत्वं विहाय तादृशनिश्चयाभाववत्तस्वरूपीयत्वमनुमिति
विशेषणं। गृहीतान्वयमिति अत्रानुकरीत्या लक्षणार्थो बोध्यः प्रयुक्तमितिमत्रान्वयसहचारज्ञानमात्रं व्याप्तिज्ञानं तत्र केवलान्वयित्वं यत्र व्य
तिरेकसहचारज्ञानमात्राद्व्याप्तिग्रहस्तत्र केवलव्यतिरेकित्वं यत्रोभयसहचारज्ञानाद्व्याप्तिग्रहस्तत्रान्वयव्यतिरेकित्वमित्याशयः दृशाविशे
षात् अन्वयसहचारमात्रज्ञानदशायां व्यतिरेकिणि। केवलव्यतिरेकिणि तल्लक्षणं। केवलव्यतिरेकिलक्षणं। नन्वुक्तस्थले व्याप्तिग्रहात्पू
र्वमन्वयसहचारस्याग्रहान्नाव्याप्तिः तल्लक्षणेऽगृहीतान्वयमित्यस्य गृहीतान्वयसहचारमित्यर्थकरणादत आह व्याप्तिग्रहस्येवेति व्याप
कसमानाधिकरणरूपान्वयव्याप्तिग्रहस्येवेत्यर्थः अन्वयग्रहेति अन्वयसहचारग्रहेत्यर्थः तादृशान्वयव्याप्तेरन्वयसहचारघटितत्वादि
ति भावः तन्मते। व्याप्तिग्राहकसहचारभेदात्केवलान्वय्यादिभेदवादाचार्यमते मान्यास्तु व्यतिरेकिग्रंथे गृहीतसहचारभेदात्तद्गृहीतव्याप्तिभे
दाद्वा केवलान्वय्यादिभेद इति कल्पद्वयं मूलकाराभिप्रेतं तत्राद्यकल्पे वह्निसाध्यकधूमादेरपि अन्वयसहचारमात्रगृहीतव्याप्तिकस्य केवलान्वयि
तया तत्रात्यंताभावाप्रतियोगिसाध्यकत्वरूपं मूलोक्तकेवलान्वयिलक्षणमव्याप्तमतस्तत्कल्पानुसारेण मूलानुक्तमपि लक्षणान्तरमन्वयसहचा
रादिघटितमूह्यमित्यपि प्रायेणाह व्याप्तिग्राहकेत्यादीति दीधितिग्रंथमवतारयंति दीधितौ भेदादिति ल्यब्लोपे पंचमी व्याप्तिग्राहकसहचारविशे

136

68

रामं०

षमंतर्भाव्य भेदे विभजनमित्यर्थः एवमग्रेपि व्याख्यायां नन्वेति अत्र द्वितीयसहचारशब्दार्थो व्यतिरेकसहचारः सहचारमात्रं वा आद्ये दूषणमाह

प्रमेयत्वादाविति द्वितीयमाशंक्य निषेधति नचेत्यादि इत्यर्थ इति तथा चात्र व्याप्तिग्रहत्वावच्छिन्नं प्रति जनकत्वस्य निर्विषयतयाऽन्वयव्यतिरे

कसहचारज्ञानयोरेव स्वातंत्र्येण तत्प्रयोजनकतयाऽभावे हेतुसहचारज्ञानस्य चारितार्थ्यात्वान्नोक्तदोष इत्यभिमानः अव्यापकत्वादिति प्रमे

यत्वादावसंभववारणायेति शेषः तत्र साध्यकेति अत्र साध्यपदं हेतुपदं च साध्यताहेतुतावच्छेदकावच्छिन्नपरं तेन वह्निधूमव्याप्तिग्रा

हकालोकज्ञानविषयसहचारत्वस्य द्रव्यत्वद्रव्यत्वावच्छिन्नसहचारसाधारण्येपि न दोषः तादृशेति प्रकृतव्याप्तिग्राहकेत्यर्थः अन्वयेतीति

तथा चान्वयसहचारत्वेन व्यापकत्वविवक्षणान्न दोष इति भावः भावव्यावृत्ताभावत्वेन साध्यतायां हेतुतायां च समवायस्य संयोगस्य च साध्य

ताहेतुताघटकत्वासंभावादाह भावाभावेति अभावत्वरूपेति न चावच्छेदकतापर्याप्तिनिवेशान्नैव दोषः संभवतीति वाच्यं महानसीयो धू

मो महानसीयवह्निसहचरित इत्यादिसहचारज्ञानस्यापि धूमो वह्निव्याप्य इत्यादिव्याप्तिज्ञानजनकतया तथा निवेशासंभवात् साध्यतावच्छे

दकहेतुतावच्छेदकसंबंधानुधावनमिति विनिगमनाविरहादुभयानुधावनमित्याशयः तेनान्यतरानुधावनेनैवाक्तस्थलेति व्याप्तिवारणा

संभवेपि न क्षतिः जन्यज्ञानविषयत्वमव्याप्यवृत्तीत्याशयेनाह अयं जन्यज्ञानेत्यादि इत्यादाविति व्यतिरेकिणीति शेषः एवमग्रेपि सहचा

रत्वादिति अतिव्याप्तिरत इति शेषः एवमग्रेपि यद्यपि अधिकरणाविशेष्यव्यभिचारधीविरोधितयान्वयव्याप्तिग्राहकतयैव व्यतिरेकसहचार

स्योपयोगित्वेन तत्कूटकव्याप्तिकस्य च प्रतियोगिवैयधिकरण्यघटिततया नोक्तस्थले व्यतिरेकित्वसंभवः तादृशव्यतिरेकसहचाराप्रसिद्धेरस

प्यापि भ्रमरूपव्यतिरेकसहचारग्रहाधीनज्ञानविषयव्याप्तिकतया व्यतिरेकित्वसंभवो बोध्यः लक्षणेनेति तथा च तत्कालीनतत्पुरुषीयप्रकृतव्या

137

१२

वच्छेदकत्वविवक्षणान्नासंभव इति भावः। घटादिव्याप्यवगाहिसमूहालंबनात्मकप्रकृतव्याप्तिग्रहमादायासंभवतादवस्थ्यादिति चेन्न। प्रकृतव्याप्तिविषयतांतःपाति

म०टी० प्तिग्रहजनकज्ञानविषयसहचारत्वव्यापकान्वयसहचारत्वकत्वं तत्कालीनतत्पुरुषीयकेवलान्वयित्वमित्यादिरीत्या लक्षणं कर्तव्यमिति भावः
व्याप्ताविति। ग्राहकत्वादित्यग्रिमेणान्वयः। सहचारस्यापीति। अपिनान्वयसहचारसमुच्चयः तथा चान्वयसहचारस्यापि विशेषणात् तथैव प्रकृतव्याप्ति
ग्रहकतया तादृशव्याप्तिग्रहत्वावच्छिन्नजन्यतानिरूपितजनकतानिवेशो नात्र संभवतीति सूचितं तेन चात्र तादृशजनकतानिवेशेनासंभवशंकितशं
कानिराकृता। तत्र चाभावे प्रमेयत्वसहचारे च। तद्विषयकप्रतीत्यविषयत्वमिति। तत्तद्विषयकप्रतीत्यविषयो यस्तत्त्वमित्यर्थः स्वाविषयक
कप्रतीत्यविषयतात्कत्वमिति यावत्। स्वं सहचारः यौर्या व्याप्तिः इत्येवास्त्विति एवकारेण सहचारद्वयोपादानव्यवच्छेदः स दोषः। अतिव्याप्त्यापत्तिरू
पदोषः। व्याप्तिग्राहकत्वमिति। नन्वत्रोपदर्शितरीत्या व्याप्तिग्रहत्वावच्छिन्नजन्यतानिवेशासंभवेन घटादिसहचारे प्रकृतव्याप्तिग्राहकसमूहालं
बनज्ञानविषयसहचारत्वाक्रांते प्रकृतव्याप्तिघटकत्वाभावेनासंभवः न च विषयतातेन ज्ञाननिष्ठप्रकृतव्याप्तिग्रहजनकतायां विषयतया
विषयतावच्छिन्नजन्यतानिरूपितजनकताविवक्षणेन घटादिसहचारज्ञानजन्यतायाश्चातथात्वेनादोषात् अत्र साक्षात्परंपरासाधारण
जनकतानिवेशात् तेन व्यतिरेकसहचारज्ञानस्याधिकरणाविशेषीय व्यभिचारशंकानिवृत्तिद्वारा व्यापकताग्रहोपयोगित्वेपि व्याप्तिग्रहाजन
कतया व्यतिरेकिण्यपि व्याप्तिरिति शंकाया नावकाशः वस्तुतस्तु व्याप्तिग्राहकत्वं न जनकतागर्भं किंतु व्याप्तिग्रहप्रयोजकत्वं प्रयोजकत्वं च
स्वरूपसंबंधात्मकं प्रतीतिसिद्धं घटादिसहचारज्ञानस्य च न प्रकृतव्याप्तिग्रहप्रयोजकत्वं तथा प्रतीत्यभावात् व्यतिरेकसहचारज्ञानस्य
च व्यभिचारशंकानिरासद्वारा व्यापकत्वांशे तत्प्रयोजकत्वं अन्वयसहचारज्ञानस्य च साध्यसामानाधिकरण्यवृत्तिहेतुतावच्छेदकांशे तत्प्र राम०
योजकत्वमिति न कोपि दोष इति सारं। तत्पदेति। सहचारपदरूपेत्यर्थः प्रकृते चेति। व्यतिरेकसहचारस्येति शेषः। उभयव्याप्तिग्रह इति। अन्व

यव्याप्तिज्ञानेव्यतिरेकसहचारस्यैवव्यतिरेकव्याप्तिज्ञानेप्यन्वयसहचारस्योपयोगइत्याशयः। इदंचोभयव्याप्तिग्रहस्यानुमितिहेतुत्वमभ्युपेत्योक्तं
वस्तुतस्त्वाचार्यमतेन्वयव्याप्तिज्ञानमेवानुमितिहेतुरितिध्येयं। व्याप्तिप्रत्यक्षासंभवेनेतिप्राचांयेनरूपेण यस्यपक्षोपनयस्तेनरूपेणानस्यतत्रोप
नीतभानोपगमादितिभावः। यथाकथंचिदितिप्रत्यक्षानुमित्यादिसाधारणेनेत्यर्थः। व्याप्तिग्रहेति। प्रकृतेत्यादि। एवमग्रेपि। अनुमित्यात्मकेत्या
दिः। अनुमित्यात्मकप्रकृतव्याप्तिग्रहनिष्ठायाप्रकृतव्याप्तिविग्रनिरूपितव्याप्तिज्ञानद्वाराप्रकृतव्याप्तिनिरूपितसहचारज्ञानजन्यतायाः प्रकृतव्या
प्तिविषयतातः। याति प्रकृतव्याप्तिविषयतावच्छिन्नत्वात्तादृशसहचारज्ञानस्यप्रकृतव्याप्तिग्रहप्रयोजकत्वाच्चेतिभावः। अव्याप्तिरितिविशे
षाज्ञानत्वेनव्याप्तिग्राहकत्वविवक्षणेव्यापकत्वप्रवेशोव्यर्थइत्याशयः। अत्रेदंबोध्यं व्यतिरेकसहचारज्ञानस्यान्वयव्याप्तिज्ञानेस्वतंत्रान्व
स्या१ यव्यतिरेकाभ्यांतत्रैवजनकत्वंनतत्करीत्यापरंपरयेतिमतमवलंब्यसाक्षाद्व्याप्तिग्रहजनकत्वमेवलक्षणेनिवेशनीयंनतत्करीत्यासा
क्षात्परंपरासाधारणंतत्तन्नवाव्याप्तिग्रहप्रयोजकत्वात्मकंव्याप्तिग्राहकत्वंनिवेश्यंतथाचनाव्याप्तिः। व्याप्तिनिरूपितसहचारज्ञानस्य
जन१ व्याप्तिनिरूपितव्याप्तिज्ञानकत्वेपिअनुमित्यात्मकप्रकृतव्याप्तिग्रहाजनकत्वात्। शेषंपूर्ववदिति। तन्मते। गृहीतव्याप्तिभेदेनकेवला
न्वय्यादिभेदवादिचिंतामणिकारमते। प्रकृतहेत्वित्यादि। नन्वत्रवह्निनिरूपितधूमनिष्ठव्याप्तिघटनिरूपिततद्व्याप्यनिष्ठव्याप्त्योः
समूहालंबनदशायांकेवलान्वयिनिधर्मेऽव्याप्तिः तत्रवह्निसाध्यकधूमहेतुकानुमितिजनकज्ञानविषयव्याप्तित्वस्यघटनिरूपि
तव्याप्तावपिसत्त्वेनतत्रवह्निनिरूपितव्याप्तित्वाभावात् नचतादृशानुमितिनिष्ठजन्यतानिरूपितज्ञाननिष्ठजनकतायांविषयतावच्छे
दकत्वविवक्षणान्नदोषइतिवाच्यं समूहालंबनवह्निघटोभयानुमितिजनकतावच्छेदकत्वस्यघटनिरूपितव्याप्तावनपायादितिचेन्नता

ज्ञाननिष्ठकारणतायां विषयतयाऽवच्छेदकत्वस्य विवक्षणात् समूहालंबनस्थले पटव्याप्तौ मा दृशानुमितित्वावच्छिन्नजन्यतानिरूपित २

70

त५ स्थ५

मं०टी० दृशानुमितित्वावच्छिन्नजन्यतानिरूपितताद्दृशजनकतावच्छेदकत्वाभावान्न दोषावकाशः अत्र लक्षणे लक्ष्ये च पूर्ववदनुमितौ तत्कालीन
त्वं तत्पुरुषीयत्वं च निवेशनीयं जनकत्वं च फलोपधायकत्वरूपं निवेशनीयं तेन ताद्दृशानुमितित्वावच्छिन्नस्वरूपयोग्यतावच्छेदकत्व
स्य व्यतिरेकव्याप्तौ सत्त्वेऽपि न केवलान्वयिन्यव्याप्तिः यथाश्रुते न उक्तदोषतादवस्थ्यात् इह प्रथमद्वितीये चेति। व्याप्तित्वेतीति। नन्वत्र व्याप्ति 140
स्थाने लाघवेन व्याप्तिघटकीभूतव्यापकत्वस्यैव निवेशनमुचितं न तु साध्यसामानाधिकरण्यघटितव्याप्तेरिति चेन्न एवं व्यापकत्वपदे
न यदि हेत्वधिकरणावृत्तित्वादिघटितव्यापकत्वमुच्यते तदा व्यापकपदप्रकृतसाध्यपदोपादानवैयर्थ्यं तादृशव्यापकत्वसमानाधिकरण
व्यापकत्वकत्वस्यैव सम्यक्त्वात् व्यतिरेकव्याप्तिघटकव्यापकत्वस्य लक्षणाघटकत्वात् अन्वयव्यतिरेकिसाधारणव्याप्तिश्च यदि च साध्याभा
वाधिकरणावृत्तित्वादिघटितव्यापकत्वमुच्यते तदाऽसंभव इति तादृशव्याप्तित्वव्यापकत्वमेव प्रकृतसाध्यव्याप्तित्वेन निवेशितं न चैवमपि
तादृशज्ञानविषयव्याप्तित्वे तत्र साध्यनिरूपितव्याप्तित्वविवक्षणे व्यापकत्वोपादानवैयर्थ्यं व्यतिरेकव्याप्तेः साध्यनिरूपितत्वाभावा
त् अन्वयव्यतिरेकिसाधारणव्याप्तिश्च साध्याभावनिष्ठव्याप्तिविवक्षणे त्वसंभव इति वाच्यं तादृशानुमितित्वावच्छिन्नजन्यतानिरूपिततादृश
जनकतावच्छेदकीभूता या पक्षविषयतानिरूपितहेतुविषयतानिरूपितविषयता तन्निरूपकत्वेन व्याप्तिद्वयनिवेशात् व्याप्तिस्थाने
व्यापकत्वविवक्षणे तु उभयव्यापकतयोरनुगमासंभवेन तद्दोषतादवस्थ्यापत्तेः न चैवं तादृशज्ञानविषयीभूताभावादेः तादृशनिरू
पकत्वाभावादेव वारणे व्याप्तित्वनिवेशो नर्थक इति वाच्यं तादृशज्ञानविषयीभूतसामानाधिकरण्यघटकवृत्तित्वस्य तन्निरूपकत्वेन तद्वा राम०
रणायैव व्याप्तित्वनिवेशात् अत एवाभावादावित्युक्तं न चैवमपि तादृशजनकतावच्छेदकतापर्याप्त्यधिकरणत्वमेव तादृशविषयतायां

ज२

निवेश्यतां विशिष्टविषयताया अतिरिक्तत्वात् वृत्तित्वविषयतायाश्चातथात्वान्न दोष इति वाच्यं इष्टापत्तेः तादृशनिवेशे वैलाभाये वव्या
प्तित्वोपादानादितिरिक्त नास्ति व्याप्तिरिति एतेन व्यापकत्वनिवेशव्यावृत्तिस्थलं नोदर्शिताः। तत्र व्याप्तिपदं अत्र व्याप्तिरिति अयमाश
यः यत्र वन्ह्यभावव्याप्यवन्हिव्यापकीभूताभावप्रतियोगिमान् ह्रद इत्याकारके या वन्हिव्यापकीभूताभावप्रतियोगित्वावच्छिन्नेव धूमे
भावनिरूपितान्वयव्याप्त्यवगाहिना वन्हिसामग्र्यभाववान् ह्रदो वन्हिव्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्त्यवगाहिना परामर्षे
णा ह्रदो वन्ह्यभाववानिति वन्हिव्यापकीभूताभावप्रतियोगित्वावच्छिन्नलिंगकान्वयिनी वन्हिसामग्र्यभावलिंगक व्यतिरेकिणापनु
मितिर्जनिता तत्र वन्ह्यभावसाध्यकानुमितित्वावच्छिन्नजन्यतानिरूपितोक्तजनकतावच्छेदकतावत् पर्याप्त्यधिकरणा व्यतिरेकव्या
प्तौ वन्ह्यभावीयत्वाभावाद् वन्हिव्यापकीभूताभावप्रतियोगित्वावच्छिन्नेन्वयिन्यव्याप्तिः एतेन तादृशव्यतिरेकव्याप्तौ तत्कालीनवन्ह्यभा
वानुमितिफलोपधायकतावच्छेदकतापर्याप्त्यधिकरणत्वाभावात् कथमन्वयिन्यव्याप्तिरिति शंका निरस्ता हेतौ प्रकृतपदव्याव
र्तिमाह इति। अयमाशयः यद्यपि वन्हेः साध्येतद्धूमत्वेनोक्तरीत्या वन्हिमान् धूमादित्यादावेव तद्घटितत्वादिना धूमादेर्व्यति
रेकितादशायां तद्व्यावृत्तिः संभवति तथापि प्रकृतहेतुकत्वं यत्र स्वसामानाधिकरण्यस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वोभयसंबं
धेन हेतुतावच्छेदकावच्छिन्नव्याप्तिपक्षधर्मताज्ञानविशिष्टत्वं तद्व्यावृत्तिर्नोक्तस्थले संभवति तत्र व्याप्तेरनिवेशोपि तत्र तद्धूमीय
व्यतिरेकव्याप्तौ धूमत्वावच्छिन्नपक्षधर्मताज्ञानविशिष्टत्वरूपप्रकृतहेतुकत्वसमानाधिकरणानुमितित्वघटितधर्मावच्छिन्नजन्य
तानिरूपितजनकतानवच्छेदकत्वेनैव वारणात् वन्ह्यभावसाध्यकोक्तस्थले च व्यतिरेकव्याप्तिज्ञानजन्यताया वन्हिव्यापकीभूताभावप्र

श्री

71

म०टी०

142

तियोगित्वावच्छिन्नवह्निसामग्र्यभावलिंगकानुमितित्वावच्छिन्नायावह्निव्यापकीभूताभावप्रतियोगित्वावच्छिन्नपक्षधर्मताज्ञानविशि
ष्टानुमितित्वावच्छिन्नतया व्याप्तेरभिवेशेन वारणात्तन्निवेशे तु व्यतिरेकव्याप्तिज्ञानजन्यतायावह्निव्यापकीभूताभावप्रतियोगित्वावच्छि
न्नं वैवह्न्यभावनिरूपितव्याप्तिपक्षधर्मताज्ञानविशिष्टानुमितित्वं न जन्यतावच्छेदकं किं किंतु वह्निसामग्र्यभावनिष्ठवह्न्यभावनिरूपितभि
रूक्त[illegible] व्यतिरेकव्याप्तिपक्षधर्मत्वज्ञानविशिष्टानुमितित्वमेवेति भवति वारणमिति निरुक्तविशिष्टप्रकृतहेतुकत्वस्याव्याप्त्यनु
रोधेन स्थलान्तरमनुक्तमिति एतेन वह्निमान् धूमादित्यादेः केवलान्वय्यनुमानस्येव तत्प्रयुक्तित्वादिना धूमादेर्व्यतिरेकिणो दशायां सं
ग्रहाय प्रकृतहेतुकत्वस्यावश्यमुपादेयतया तद्व्यावृत्तिस्थलान्तरानुसरणमनौचित्यमिति नवीनोद्भावितं दूषणमपास्तं उक्ताभिप्राये
णस्थलान्तरानुसरणस्यावश्यकत्वात् तस्याः व्याप्तेः हेतुतावच्छेदकीभूतव्यतिरेकव्याप्तेः। प्रकृतहेतुकेति। व्याप्तिघटितनिरुक्तविशिष्ट
प्रकृतहेतुकानुमितित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकतायाः पर्याप्त्यधिकरणत्वाभावात् एवमग्रेऽपि। तादृशेति। हेतुतावच्छे
दकेत्यर्थः एवमग्रेऽपि न व्यतिरिक्तेति। अयमाशयः प्रकृतसाध्यकत्वानुपादाने यत्र गंधत्वव्याप्यपृथिवीत्वव्यापकाभावप्रतियोगिमज्जलमिति
परामर्शेण प्रकृतहेतौ निर्गंधत्वान्वयव्याप्त्यवगाहिना स्नेहादौ पृथिवीत्वाभावव्यतिरेकव्याप्त्यवगाहिना निर्गंधस्यान्वय्यनुमितिः पृथिवीत्वा
भावस्य च व्यतिरेक्यनुमितिर्जनिता तत्र पृथिवीत्वाभावानुमितित्वावच्छिन्नजनकतावच्छेदकतापर्याप्त्यधिकरणव्याप्तित्वाक्रान्ते निर्गंध
त्वनिरूपितव्याप्तित्वाभावाद्व्याप्तिस्तदुपादाने तु हेतुतावच्छेदकव्यतिरेकव्याप्तौ निर्गंधत्वानुमितित्वावच्छिन्नजन्यतानिरूपितजनकता
वच्छेदकतापर्याप्त्यधिकरणत्वाभावान्नाव्याप्तिरिति। तस्याः हेतुतावच्छेदकव्याप्तेः प्रकृतत्वादिति स्नेहादिपृथिवीत्वव्यापकाभावप्रतियो

राम०

त्रि०५

143

गिमत्वेन भयसाधारण्यापादित्यर्थः स्नेहाभावादेरिव पृथिवीत्वव्यापकाभावप्रतियोगिमत्त्वाभावस्यापि पृथिवीत्वव्यापकाभावत्वे न ताद्
श व्याप्तिघटकत्वादिति भावः रूपेणेति तत्तीयार्थो ऽवच्छिन्नत्वं एवमग्रेऽपि अनुमित्यौपयिकी अनुमित्यौपयिकव्यतिरेकव्याप्तिघटिका हेतुतावच्
छेदिका हेतुतावच्छेदकव्यतिरेकव्याप्तिघटिका अनयोः पृथिवीत्वव्यापकाभावप्रतियोगिमत्त्वाभाववत्त्वावच्छिन्नपृथिवीत्वव्यापकत्व
स्नेहाभाववत्त्वावच्छिन्नपृथिवीत्वव्यापकत्वयोः भेदादिति। व्यापकतावच्छेदकभेदेनेत्यादितथा च व्यापकताभेदान्न घटितव्याप्तेर
पि भेदेन न तस्या एकत्वमिति भावः अयमाशयः अत्र व्यापकत्वं न तद्वन्निष्ठाभावाप्रतियोगित्वमात्रं विशेष्यभयाभावादिकमादाय अप्र
सिद्धेः नापि तद्वन्निष्ठाभावप्रतियोगितानवच्छेदकधर्मवत्त्वमात्रं प्रमेयत्वादिकमादाय गन्धाभावस्यापि पृथिवीत्वव्यापकतया उक्तहेतो
र्व्यभिचारित्वप्रसंगात् किंतु तद्वन्निष्ठाभावप्रतियोगितानवच्छेदकस्नेहाभावत्वादिमत्त्वरूपव्यापकतावच्छेदकविशेषरूपघटितमे
वतद्घटकमिति हेतुतावच्छेदकव्याप्तेर्नैक्यं संभवतीति ननु व्यापकताघटकाभावे वैशिष्ट्यव्याप्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताक
त्वविशेषणे उक्तदोषाभावेन व्यापकतावच्छेदकरूपाघटितमेव व्यापकत्वं निवेशनीयमिति व्यापकताभेदाभावेन हेतुतावच्छेदकव्याप्ते
रैक्यात् लोकरीत्या प्रकृतसाध्ये तत्स्य व्यावृत्तिप्रदर्शनं विरुद्धमत आह किं चेति। एवं उक्तहेतुतावच्छेदकव्याप्तेरैक्ये ऽनुत्पत्यसङ्गत्योः तिशेषः व्या
तेरपीति प्रकृतयति शेषः कथमिति प्रकृतकत्वोपादानेनेति शेषः निरासङ्ग इति तथा च तत्र प्रकृतहेतुकत्वस्य व्यावृत्तिप्रदर्शनं विरुद्धमिति
भावः जलं निर्गन्धमित्यादेः प्रकृतहेतुकपदव्यावर्त्यत्वव्यवच्छेदस्य स्फुटप्रतिपत्त्यर्थमेह हेतुतावच्छेदिका चेत्यनितित्वर्थः अनुकारार्थव्याव
छेदार्थकः यो ऽनुपपत्तिः तथा च जलं निर्गन्धमिति ग्रन्थस्य प्रकृतसाध्यपदव्यावृत्तप्रदर्शकतया न तत्प्रदर्शनविरोध इति भावः मतान्तरमाह

हेतु २ ने २

72

म०टी०

अत एवेति उक्तरीत्या जलत्वं निर्गंधमित्यत्र प्रकृतसाध्यपद व्यावृत्त्यसंभवादेवेत्यर्थः क्वचिदत्रेत्येवपाठः। स्थानांतरं। वन्हे वह्नित्वे न साध्यत्व
इत्यादिना पूर्वमुक्तस्थलांतरं। प्रकृते वजलत्वं निर्गंधमित्यत्र चायोग्यत्वादिति। नोक्तदोष इति शेषः तथा च वारितोपि पुनर्वार्यत इति न्यायेन ज
लत्वं निर्गंधमित्यस्य प्रकृतसाध्यकपदेन वारणमिति भावः केचिदिति उक्तरीत्या जलत्वं निर्गंधमितिग्रंथसंगमनेनादृशग्रंथास्वारस्यमेवा स्व
रसः रूपेणेति अवच्छिन्न व्यापकताघटितत्वं तृतीयार्थो व्याप्यान्वयी एव मग्रेपि। प्रकृतसाध्यघटितत्वाभावादिति सावधारणा। अव्याप्ति
निरास इति। जलत्वं निर्गंधमित्यादावित्यादि तथा च जलत्वं निर्गंधमित्यादौ प्रकृतसाध्येत्यस्य व्यावृत्तिसंभवेन प्रकृतसाध्येत्यस्य व्यावृत्ति प्रदर्श
नं विरुद्धमिति प्रथमदोषो न संभवतीति भावः व्याप्तेः हेतुतावच्छेदकव्यतिरेकव्याप्तेः अनवगमादिति। वह्निसामग्र्यभाववत्त्वादिनैव व्याप्तेर
वगमादिति भावः नाव्याप्तिरिति तथा च वन्ह्यभाववानित्यादावुक्तरीत्या प्रकृतहेतुकपदव्यावृत्तिसंभवेन कथमुक्ताव्याप्तिनिरास इ
ति द्वितीयदोषो न संभवतीति भावः तदवगमेतु। हेतुतावच्छेदकावच्छिन्नाभाववत्त्वेन हेतुतावच्छेदकव्यतिरेकव्याप्तेरवगमेतु। व्या
तिरेकित्वमेव। अन्वयव्यतिरेकित्वमेव। तथा च तदानस्यालक्ष्यत्वादेव नाव्याप्तिरिति भावः उक्तक्रमेणा। पृथिवीत्वव्यापकेत्यादि र
भेदादित्यंतोक्तक्रमेणा। व्याप्तेः तादृशव्यापकताघटितव्यतिरेकव्याप्तेः। कुत इति स्नेहाभावत्वाद्यवच्छिन्नव्यापकताघटितव्यतिरे
कव्याप्तेरेव प्रकृते हेतुतावच्छेदकत्वादिति भावः तथा च तस्या व्याप्तेः प्रकृतेहेतुकानुमित्यौपयिकत्वेनेत्याद्युक्तमसंगतमित्याशयः
ननु हेतुतावच्छेदकावच्छिन्नाभावत्वावच्छिन्नव्यापकताघटितव्यतिरेकव्याप्तेरेव प्रकृते हेतुतावच्छेदकत्वांगीकारान्न दोष इत्य
त आह यथायथेति नादृशेति निरुक्तव्यापकताघटितव्यतिरेकव्याप्तेरित्यर्थः प्रयासः तादृशव्याप्तेर्हेतुतावच्छेदकत्वांगीकारः अभि

१४४

राम०

कृष्णेतिमादृशव्याप्तिरूपहेतुतावच्छेदकावच्छिन्नाभावत्वावच्छिन्नव्यापकताघटितव्यतिरेकव्याप्तेरेवहेतुतावच्छेदकत्वादितिभावः
तदप्रवेशः अग्निवर्द्धमानतादृशतादृशोत्तरोत्तरव्याप्तिरूपहेतुतावच्छेदकस्य पूर्वव्यतिरेकव्यापकताघटितव्यतिरेकव्याप्तेरेवहेतुतावच्छे
दकत्वादितिभावः तदप्रवेशः अग्निवर्द्धमानतादृशतादृशोत्तरोत्तरव्याप्तिरूपहेतुतावच्छेदकस्य पूर्वपूर्वव्यतिरेकव्याप्तावप्रवेशः अग्नि
वर्द्धमानताद्यातादृशोत्तरोत्तरव्याप्तिरूपहेतुतावच्छेदकावच्छिन्नाभावत्वावच्छिन्नव्यापकताघटितव्याप्तेरेवहेतुतावच्छेदकत्वा
दितिभावः तथा च व्याप्तेर्हेतुतावच्छेदकत्वं कुत इति दोषानिवृत्तिरेवेत्याशयः हेतुतेति। प्रकृतेत्यादिः व्याप्तिपूर्वपूर्वव्याप्तिः तत्प्र
दर्शने। प्रकृतसाध्यानुमित्यौपयिकत्वाभावप्रदर्शने। ग्रंथविरोधइति। हेतुतावच्छेदिकेत्यस्य प्रकृतहेतुतावच्छेदिकेत्यर्थकतया
पूर्वव्याप्तेः प्रकृतहेतुतावच्छेदकत्वाभावादितिभावः ननु यथाश्रुतार्थेन ग्रंथविरोधः तस्यापि हेतुतावच्छेदकत्वसंभवात् आ
ह पृथिवीत्वेति तथात्वेति प्रकृतसाध्यानुमित्यौपयिकत्वाभावेत्यर्थः अयमाशयः जलं निर्गंधमित्यादौ प्रकृतहेतुकत्वेन व्याव
त्यसंभवो यथा दकप्रकृतहेतुकानुमित्यौपयिकत्वप्रदर्शनायेव हेतुतावच्छेदिकेत्युक्तं तस्य च प्रकृतहेतुतावच्छेदिकेत्यर्थकत्व
एवतत्प्रदर्शकत्वमिति यथाश्रुतार्थमादाय न तद्ग्रंथविरोधपरिहारसंभव इति व्यापकतेति। उक्तरीत्या विशिष्टाभावादिघटना
दितिभावः उक्तव्यावृत्तीति प्रकृतसाध्यपदव्यावृत्तीत्यर्थः तथासति। व्यापकत्वस्य व्यापकतावच्छेदकामिश्रितत्वे सति अव्याप्तेः
प्रकृतहेतुकत्वोपादानेप्यव्याप्तेः तथा न्वयं केम व्याप्तिनिरासइत्युक्तदोषानिवृत्तिरेवेत्याशयः दिमितिदिनार्थस्तुविशिष्टाभ
याभावादिकमादाय व्यभिचारिचारितापत्तिप्रसंगवारणाय साध्याभावव्यापकीभूताभावप्रतियोगितावच्छेदकहेतुतावच्छेद

७३

१५

म०टी०

कसेवव्यतिरेकव्याप्तित्वंवाव्याप्तिर्व्यतिरेकव्याप्तेर्हेतुतावच्छेदकदेभेभिन्नतयानैकत्वसंभवइत्यादि।भेदादेवेति।केवलान्वयादीत्या
दिः।वक्ष्यमाणेति इतरव्यापकेत्यादिनावक्ष्यमाणेत्यर्थः इतरव्यापकत्वं।इतरत्वावच्छिन्नव्यापकत्वं।इतरसमानाधिकरणेति।इत
रत्वावच्छिन्नसमानाधिकरणेत्यर्थः।असंभवीति।पृथिवीत्वाभावादेःसामान्यतइतरत्वावच्छिन्नाधिकरणायपृथिव्यादिनिष्ठाभावप्र
तियोगित्वादितिभावः।तथा।इतरत्वावच्छिन्नव्यापकताघटितोक्तरूपेण।लिंगेतिव्यतिरेकीत्यादिःअहेतुत्वात्‌हेतुत्वासंभवात्‌ननु
क्तरीत्याइतरत्वावच्छिन्नव्यापकघटितोक्तरूपेणहेतुत्वासंभवेपियत्किंचिदितरव्यापकत्वघटितरूपेणव्यतिरेकिलिंगज्ञानस्यहे
तुत्वंसंभवत्येवपृथिवीत्वाभावादेरपियत्किंचिदितरव्यापकत्वसंभवादतआहइतरेतियत्किंचिदितरव्यापकत्वंचेत्यर्थः अनु
गतानतिप्रसक्तमितिशेषः।दुर्वचमितियत्किंचिदित्यनेनतत्तत्व्यक्तिविशेषपरिग्रहेऽननुगमःतत्सामान्यपरिग्रहेतिप्रसक्ति
रितिभावः।अव्याप्तिरिति।हेतुतावच्छेदकावच्छिन्नहेतुज्ञानस्यावश्यकत्वादितिभावः अभावेति।अभावप्रतियोगित्वरूपहेतुता
वच्छेदकावच्छिन्नहेतोरित्यर्थः तदर्थमेवउक्ताव्याप्तिवारणार्थमेव।लिंगेतिलिंगतावच्छेदकावच्छिन्नार्थकमित्यादिःउपात्त
मितितथाचाभावप्रतियोगित्वप्रकारतानिरूपितंप्रकृतपक्षविषयतानिरूपितयद्रूपावच्छिन्नविषयतासामान्यंतत्पक्षकत
त्कालीनतत्पुरुषीयप्रकृतसाध्यानुमितिजनकतानवच्छेदकंतद्रूपावच्छिन्नंतत्पक्षकतत्कालीनतत्पुरुषीयप्रकृतसाध्यकके
वलान्वयीतिपर्यवसितंअभावप्रतियोगित्वेनहेतुतास्थलेऽभावप्रतियोगित्वप्रकारतानिरूपिताभावप्रतियोगित्वावच्छिन्नविशे
ष्यतानतादृशानुमितिजनकतावच्छेदिकेतिनतत्राव्याप्तिरितिभावः तथालिंगज्ञानस्यअभावप्रतियोगित्वप्रकारतानिरूपितलिंग

146

राम०

तावच्छेदकावच्छिन्नविशेष्यत्वस्य हेतुत्वेपि हेतुतावच्छेदकत्वेपि न क्षतिः न तल्लिंगतावच्छेदकावच्छिन्नेतेन रूपेण साध्यताघंकेव
वलान्वयिमव्याप्तिः तादृशेति अभावप्रतियोगित्वेन लिंगज्ञानस्य प्रकृतसाध्यकानुमितिहेतुत्वाभावादित्यर्थः प्रकृतव्याप्तिग्राहकज्ञानवि
षयसहचारत्वव्यापकोभयसहचारत्वकत्वमित्युक्तौ तादृशज्ञानविषयसहचारत्ववति प्रसक्तौ त्येकसहचारेउभयसहचारत्वाभा
वेनासंभवः स्यादित्याशयेनाह प्रकृतेत्यादि तदुभयं केवलव्यतिरेकित्वान्वयव्यतिरेकित्वोभयं बोध्यमिति एतल्लिंगकेपि प
र्वतादृशितरीत्या बोध्यः तुरीयतापत्तिरिति तत्र व्यतिरेकसहचारव्याप्त्योरप्रसिद्धत्वादिति भावः सदितिवस्तुगत्या व्यतिरेकसहचार
व्याप्तिमतदित्यर्थः केचित्तु लक्षणेसहचारव्याप्तिविषयतानिवेशान्नोक्तदोष इत्याहुः शब्दाश्रयत्वमिति प्राचीनैराकाशपदाश
क्यस्यापि शब्दाश्रयत्वस्याकाशपदजन्यज्ञानविषयत्वोपगमादिति भावः अभिधानेपि साध्यशून्यत्वेननिश्चितत्वरूपविपक्षत्व
संभवेन विरोधासंभवादाह यथाकथंचिदिति विपक्षत्वस्य साध्यशून्यत्वरूपत्वे विरोधः संभवत्येवेत्याशयः कथमिति असतो
विपक्षत्वेन विरोधासंभवादिति भावः अभिधानेविपक्षत्वसिद्धेः स्फुटतया नभिधानेतामुपपादयति तथाचेति तस्य अनभि
हितत्वेनाभिमतस्य प्रमाणान्तराभावात् प्रमाणान्तराभावादपि विपक्षादिपदेनानभिधाने शब्दप्रमाणस्यासंभवएवानुमानादिक
मपि नास्तीति भावः यथाश्रुते प्रमाणाभावमात्रस्यैवापेक्षणीयत्वेनासंगत्यापत्तेः तस्य अन्योन्याभावप्रतियोगितावच्छेदकत्वेन
पव्यावृत्तत्वस्य गगनादेरन्योन्याभावप्रतियोगितावच्छेदकत्वे गगनादौ तत्संगतमत आह गगनवदिति गगनवद्वादेरित्यर्थः ग
गनवद्भेदस्य गगनवदादिभेदस्य अप्रसिद्धिरिति अतो गगनादेरन्योन्याभावप्रतियोगितावच्छेदकत्वासंभवादिति शेषः व्याव

तत्वमिति। निरुक्तमित्यादिः। यतः। गगनादेः। तथा केवलान्वयि। वृत्तिमत्वे सत्यत्यन्ताभावप्रतियोगितानवच्छेदकत्वादेरेव वक्तव्यत्वा
दित्याशयः। तस्य। स्वरूपसंबंधावच्छिन्नभेदप्रतियोगितावच्छेदकत्वस्य। अभावादिति। स्वरूपसंबंधेन गगनादिमतोऽप्रसिद्धेरिति भा
वः। तत्र लक्षणे। यत्त्वमिति तत्रेत्यादिग्रंथस्येत्यनुषज्यते वाच्यमिति शेषः। अप्रसिद्धि· लक्षणासंभवः। अभावादीति आदिना प्रतियो
गिपरिग्रहः। तत्तत्स्वरूपेति तत्तत्प्रतियोगिस्वरूपेत्यर्थः। परंपरेति स्वाश्रयप्रतियोगिवृत्तित्वेत्यर्थः। अनुगमः। अननुगतप्रतियोगिस्वरूप
प्रतियोगित्वानुगमाऽन्यत इति। तादृशपरंपरायाः संबंधत्वस्य सर्वसिद्धत्वाभावादिति भावः। दीधितौ। अभ्युपगमवाद इति। तादृशवि
रोधाभ्युपगमेनोक्तिरित्यर्थः। तादृशविरोधानभ्युपगमेपि न तस्य केवलान्वयित्वसंभवः ऽत्यपि प्रायेण। वस्तुतस्त्विति तथा मूले म
तले [illegible] त्यादिमूलग्रंथमिति भावः। तेन न पंचम्यनुपपत्तिः। तस्मात्तदृशगुणानाशस्य। व्याख्यायां। परंपरेति स्वप्रतियोगिसमवायेत्याश्र
यत्वेत्यर्थः। असिद्धमिति। तथा च न तस्य केवलान्वयित्वमिति भावः। लभ्यत इति। अभावाभावत्वावच्छेदेन प्रतियोगित्वात्मकभाव
त्वान्वयादिति भावः। एतावता च। एतावता उक्तव्यापकतालाभेनु अभावाभावस्यैवेति तथा च भावत्वात्मकप्रतियोगित्वे अभावा
भाभावेतरावृत्तित्वात्मकाभावाभावत्वव्याप्यत्वलाभादाकाशस्याभावत्वसिद्धिरित्याशयः। भावत्वादितीति तथा च तादात्म्यमेवा
नुकूलतर्क इति भावः। साध्याविशेष इति तथा च सिद्धसाधनमिति भावः। स्वरूपसंबंधरूपप्रतियोगित्वस्य हेतुत्वे आचार्यसंमति
रनुपपन्नेत्यत आह तद्व्यवहारेति प्रतियोगित्वव्यवहारेत्यर्थः। तथात्वात् अत्यंताभावाभावत्वात्। स्यापि प्रागभावादेः। अपितरथेति प्रति
म्येवेत्यादिमूलार्थेत्यर्थः। समनियतेति घटत्वादिलघुधर्मेत्यादिः। गुरुधर्माणां कंबुग्रीवादिमत्त्वादिरूपाणां अन्योन्येति कंबुग्रीवा

-148

राम०

वीभा४

त२

अतिरिक्तेति अत्यक्तेत्यर्थः ४

दिमदीत्यादि प्रतियोगितावच्छेदकस्यैवान्योन्याभावाभाववत्वमिति व्यवस्थापयनाय मिश्रमतं दूषयितुं शंकते दीधितावयेति साधारणा
प्रतियोगिकः एतस्य चाभावइत्यनेनान्वयः व्याख्यायां प्रतियोगिमत्तेति प्रतियोग्यादिमत्तेत्यर्थः एवमग्रेपि अभाववत्तेति प्रतियोग्यभाव
वत्तेत्यर्थः प्रतियोगितावच्छेदकसंबंधज्ञानस्य प्रतिबंधकत्वादिकल्पनामित्याशंक्याह तथा चेति क्लृप्तेति प्रतिबंधादिप्रयोजक
तया क्लृप्तेत्यर्थः प्रतियोगिविषयताकेनैव तादृशज्ञानेनैव तदुपपत्तौ प्रतिबंधाद्युपपत्तौ प्रतियोगितावच्छेदकसंबंधे इति शेषः
कल्पितइति गौरवादिति भावः परस्परस्येत्यादिग्रंथं आहुः सर्वेषामिति तादृशे भावाभाववत्ता व्यवहारे च मानाभावइति तेषां
सर्वेषां स्वाभावाभाववत्वानुपपत्तिरिति यस्य तेनुपपत्तिस्तद्भावस्यैव स्यैककेवलान्वयित्वं दुर्वारमिति प्रतियोगिसंबंधवत्वं
प्रतियोगितावच्छेदकसंबंधवत्वं धीविषयः प्रतिबंधादिप्रयोजकप्रकारताश्रयः उक्तविषयत्वाभावे हेतुमाह तत्रेत्यादिना त
त्र प्रतियोगिमत्ताज्ञाने संबंधस्य प्रतियोगितावच्छेदकसंबंधस्य संबंधविधयैवेति एवकारेण प्रकारत्वव्यवच्छेदः क्वचि
त्संबंधसंबंधस्यापि विधादोस्ति तदा तादृशसंबंधस्य तादृशविषयत्वं न संभवस्य दंततत्संबंधाभानादत आह तत्रेति एवकारोव
धारणोभानात् भानोपगमात् एवंचशंकोपपादकएवायं ग्रंथः तत्रोक्तविषयत्वाभावे हेतुस्तत्तस्य प्रकारतयाननुभवएवसंच
स्फुटतयानोक्त इति उपर्यव बोध्यः तर्हि प्रतियोगितावच्छेदकसंबंधस्याभावाभावत्वानंगीकारे हि संबंधेति प्रतियोगितावच
च्छेदकसंबंधेत्यर्थः ज्ञान इति सति सप्तमी तेनापि संबंधस्याभावत्वांगीकर्त्रापि संबंधेति प्रतियोगिपोतावच्छेदकसंबंधेत्यर्थः
एवमग्रेपि अत्र तथेति परस्परवत्ताधी प्रतिबंधकत्वे सतीति परस्पराभावव्यवहारजनकत्वाभाववत्वेनोपीत्यर्थः अभाववत्वं अभावा

149

अभावः ६   ति २   ति ५

भ०टी०

भावत्वं आहेति प्रतिबंदिमुखेनेत्यादि तत्प्रतियोगितेति अभावप्रतियोगितावच्छेदकसंबंधतावच्छेदकीभूतेत्यर्थः क्वचिच्च प्रतियो-
गितावच्छेदकीभूतेत्येव पाठः सोऽप्यवच्छेदकतावच्छेदकस्याप्यवच्छेदकत्वाभिप्रायेण संगमनीयः अनुगमइति प्रतियोगितावच्-
छेदकसंबंधत्वेनेत्यादि दीधितावनतीति प्रतियोगितावच्छेदकसंबंधमात्रेऽभावाभावत्ववारणायेत्यर्थः अत्रेष्टापत्तिमाशंक्याह
व्याख्यायां समवायेनेति अविरोधादिति तथा चाभावविरोधिन एवाभावाभावतया प्रतियोगितावच्छेदकसंबंधमात्रस्यातथात्वा-
न्नेष्टापत्तिसंभवतीति भावः प्राचां स्वत्वस्याननुगतत्वादाह दीधितौ व्यधिकरणेति व्याख्यायां एतदनुरोधात् उक्तप्रसंगवारणा-
नुरोधात् प्रतियोगिविशिष्टेति प्रतियोगिनिरूपितेत्यर्थः एवमग्नेपि अभावाभावः तदत्यंताभावेति सप्तमीतत्पुरुषेणानस्मि-
न्नतइति अभावविलयेत्यर्थः यद्वा सः पूर्वोक्तः अत्यंताभावः नद्यति अभावरूपस्तस्य विलयेत्यर्थः क्वचिन्नद्धप्यभावेत्येव पाठः
दीधितौ तदभावविलोपेति व्यधिकरणसंबंधावच्छिन्नाभावस्याभावविलोपेत्यर्थः प्रतियोगिविशिष्टतत्संबंधाप्रसिद्धेरित्याश-
यः भवतामित्युक्तेः प्रयोजनमाह व्याख्यायां स्वमतेन्विति अभावत्वेति अभावाभावत्वेत्यर्थः व्यधिकरणेति प्रतियोगिविशिष्ट-
व्यधिकरणसंबंधाप्रसिद्ध्यादिः संदर्भेति प्रतियोगितावच्छेदकसंबंधमात्रस्याभावाभावत्वसंदर्भेत्यर्थः विरुद्धमिति संबं-
धमात्रस्य प्रतियोगितावच्छेदकत्वसंदर्भे सत्येव तत्संगतेरिति भावः वस्तुतस्तु प्रतियोगिनिरूपितसंबंधस्यैव प्रतियोगितावच्छेद-
कत्वे प्रतियोगिव्यधिकरणत्वादौ सर्वत्र प्रतियोगितावच्छेदकसंबंधव्यधिकरणत्वनिवेशेनैवोपपत्तौ सर्वेषां प्रतियोगितावच्-
छेदकसंबंधेन प्रतियोग्यधिकरणत्वनिवेशोऽनुपपन्नः एवं घटो नास्तीत्यादौ संयोगादेः प्रतियोगिनिरूपितत्वाभानानुपप-

150

५८

राम०

ति: अत एव प्राचां विशेषणरूपेण संबन्धत्वानुपगमोऽपीत्येवद्दूषणं सारं [illegible] ननु
पूर्वपक्षे लक्ष्याप्रसिद्ध्या लक्षणासंभवस्योक्ततया सिद्धान्ते लक्ष्यप्रदर्शनमेवोचितं न तु लक्षणाभिधानमिति लक्षणाभित्याद्यनुपपन्न
मत आह पूर्वोक्तेति प्रसिद्धेति आकाशाभावादीत्यादितिदिति पूर्वोक्तेत्यर्थः विशेषणेति वृत्तिमत्त्वादिविशेषणेत्यर्थः विशेषणादि
नेत्यादिना प्रमेयत्वस्यानुगतत्वमेवस्यान्न परिग्रहः भाववत्तीत्यस्य भाववत्त्वेन प्रतीतत्वमर्थो वाच्यः इह तु भ्रमरूपैव प्रतीतिरस्ती
त्याशयेनाशंकते नचेत्या प्रत्यये भ्रमात्मकप्रत्यये तथा सति आकाशस्याकाशाभावाभाववत्त्वमस्तु अन्यथा भ्रमस्य कल्पनागौरवमप्र
अन्यथा यद्वत्त्वेन प्रत्यये यदसत्त्वप्रत्ययस्तस्य तदभाववत्त्वे पटवत्त्वेनेति घटविरुद्धेत्यादि: घटवति घटासत्त्वप्रतीपटस्यापि घटाभाव
त्वप्रसंगादिति पाठः अप्रसक्तेनेमेयमप्रसक्तप्रत्यये घटविरोधांशे भ्रमात्मकप्रत्यये साक्षात्संबन्धं स्वरूपसंबन्धं अभिप्रेति केवलान्वयि
तावच्छेदकमित्यादि आहेति विषयतायाः स्वनियामकत्वेन अभावप्रतियोगितानवच्छेदकत्वे ज्ञानस्य विषयतात्मकसाक्षात्संबन्धे
न केवलान्वयित्वासंभवादित्याशयं विषयत्वस्य स्वरूपसंबन्धात्मकत्वे ज्ञाननिष्ठकविषयतानिरूपित[illegible]त्वासंभवादौ विषयतेति
न [illegible] नु व्यधिकरणसंबन्धेन प्रतियोग्यधिकरणाप्रसिद्ध्या व्यधिकरणसंबन्धावच्छिन्नाभावस्य प्र
तियोग्यसामानाधिकरण्याभावेन कथं व्यधिकरणेत्यादिकमुक्तमत आह आकाशाभाववच्चेति इत्यभिप्रेत्येति तथा च स्वंडशः पारिभा
षिकं प्रतियोग्यसामानाधिकरण्यं निर्वक्तव्यं तच्चोक्ताभावेप्यस्तीति भावः तादृशाभावान्तरेति न च सर्वस्यैवाभावस्य तत्र लक्षणा
वृत्तित्वविशिष्टस्वाभावरूपप्र॰तियोगिसमानाधिकरणतया तादृशाभावाप्रसिद्धिरेवेति वाच्यं [illegible]

|5|

प४

त्वस्य समवायादेस्सत्त्वेन व्यधिकरण ५
ह ५

याद्दशप्रतियोगितावच्छेदकसंबंधेन याद्दशप्रतियोगिताश्रयाधिकरणं ॥ ० ॥ वृत्तित्वमभावस्य तादृशसंबंधावच्छिन्नतादृशप्रतियोगिताभावाश्रयस्य तादृशसंबंधेन केवलान्वयित्वमिति ॥ १

म०टी०

शयात् तद्वैयधिकरण्यादीति ॥ नादात्म्यसंबंधघटितवैयधिकरण्यादीत्यर्थः आदिना वृत्तिमत्त्वपरिग्रहः केवलान्वयित्वव्यर्थमिति घटादेर्घटत्वादिना न केवलान्वयित्वं किंतु मेयत्वादिनेति नियमोपयत्तये वक्ष्यमाणरीत्या वृत्तात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वस्यैव केवलान्वयित्वरूपत्वादिति भावः तथैव अननुगतत्वप्रयुक्तमेव दूषयति गुणोतीति न च घटादिवृत्तित्वविशिष्टत्वेनागगनाद्यभावस्य केवलान्वयितापत्तिसंभवे एतावत्यंशे तानुसरणमफलमिति वाच्यं विशिष्टाभावो विशेष[illegible]यणस्य विशेष्यस्य चाभावरूपस्तदुभयसंबंधाभावरूपो वेति मतानुसारेणोक्तापत्त्यसंभवात् तेनैवेति रूपेणेति शेषः अनवच्छेदकं तादृशाभावप्रतियोगितावच्छेदकं द्वितीयेति वृत्तिमत्त्वेत्यादिकल्पेत्यर्थः प्रथमकल्पे प्रतियोगिवैयधिकरण्यस्योभयाभावघटिततया वक्ष्यमाणापत्त्यसंभवादिति भावः प्रतियोगीति प्रतियोगितावच्छेदकावच्छिन्नेत्यादिर्यथाश्रुतस्यैव उभयाभावघटितस्यैव उभयत्वाधिकरणस्य उभयत्वावच्छिन्नस्य उभयत्वेतितभावयत्किंचिदधिकरणे तादृशधर्मावच्छिन्नाधिकरणत्वं विवक्षितमिति भावः विशिष्येति सिसाधयिषाविरहविशिष्टेत्यर्थः अर्थं साध्यसिद्धिविरोधीति मूलार्थः वहुव्रीहावुत्तरपदे पुल्लिंगत्वानुपपत्तेः कप्रत्ययापत्तेश्चेत्याशयः ~~[illegible]~~ तथा चेति घटे प्रमेयत्वं न वेति संशयस्येति शेषः अनुमानांगतेति प्रमेयत्वमित्यादिनामूले उक्तेति शेषः न च तेन मूलेन प्रमेयत्वं घटनिष्ठाभावप्रतियोगि न वेति संशयस्यैवानुमानांगत्वमुक्तं न तु घटे प्रमेयत्वं न वेत्यस्येति वाच्यं प्रमेयत्वमित्यादिमूलस्यापि घटे प्रमेयत्वं न वेत्यत्रैव तात्पर्यात् यथाश्रुतस्य

76 कः

152

ग्रमं०

इमत्नीयं प्रकृते तु केवलान्वय्यनुमानेन सिद्धैवेति केवलान्वयिनि-अत्र साध्यं न वेति संशयस्यैव साध्यसिद्धिविरोधित्वेन मूले उक्तत्वादिति ८

न ५ न ८

साध्यसंदेहत्वाभावेन पूर्वपक्षेऽनुपक्रांतत्वेन चासंगत्यापत्तेरित्याशयात् वस्तुगत्या प्रमेयत्वाभावस्याप्रसिद्ध्या कोटित्वासंभवादाह प्रमेयत्व
प्रकारेणेति अर्थभेदव्यवच्छेद्यभेदोऽपि भेदमात्रेति इदं च मात्रपदं तदन्तर्भावेन याऽप्रसिद्धिप्रायेण तदनंतर्भावेऽपि विशेषणविशेष्यभावभेदस्य विशि
ष्टाभिधानेनार्थभेदव्यवच्छेदलाभाभिप्रायेणावेति ध्येयं इत्याकारके त्वलौकिकसंशयेऽपि विरुद्धोभयेति कोटिद्वयविशेष्यकत्वेन
त्वादिसंशयत्वेति कोटिविशेष्यकस्यापि संशयस्य सर्वैरुपगमादिति भावः प्रमेयत्वप्रकारेणेति प्रतियोगितासंबंधेन अत्र समनुपपत्त्येत्या
दि किं नाहत्यमिति तथा च प्रमेयो न वेति संशयस्य एवाहरणोपपत्तिरिति भावः एतादृशेति साध्यविशेष्यकेत्यर्थः प्रमेयत्वाभाववृत्तीति कोटिता
वच्छेदकरूपेण कोटिप्रकारकबुद्धौ तद्रूपेण कोटिप्रसिद्ध्यावश्यकत्वादिति भावः तदभावेति तादृशप्रसिद्धभावेत्यर्थः वस्तुतस्तु प्रमेयत्व
मित्यादि मूलस्याप्याधेयत्वावच्छिन्नत्वरूपप्रतियोगितासंबंधावच्छिन्नघटत्वनिष्ठाभावावगाहित्वेऽपि घटे प्रमेयत्वं न वेति संशये तात्पर्य
मिति भावः तत्र साधानमिति यथाश्रुतेन पक्षनिष्ठेत्यादिना बाधकमानाभावो लभ्यते तद्भेदेन पूर्वोपस्थितपक्षनिष्ठात्यन्ताभावप्रति
योगित्वज्ञानपरामर्षतदभावस्यैव लाभादिति भावः प्रतियोगित्वज्ञानविरोधीति तथा च नञो व्यत्यासेन तदर्थस्य विरोधिनो ज्ञानानु
योगितयान्वय इति भावः यथाश्रुतार्थे साध्यसिद्धिजनकत्वरूपं पक्षनिष्ठेतीति तथा चाभावार्थकनञो व्यत्यासेन तदर्थ [illegible]
~~धिनो ज्ञानानुयोगितयान्वय इति भावः यथाश्रुतार्थे साध्यसिद्धिजनकत्वरूपं पक्षनिष्ठेतीति तथा चाभावार्थकनञो व्य~~
[illegible] स्याभावस्य ज्ञानानुयोगितयान्वय इति भावः दीधितौ साध्यसाधकत्वेनेति यथाश्रुतार्थकमनुवादः व्याख्यायां कल्प
द्वय एवेति यद्यपि द्वितीयकल्पे कर्मधारय एव सम्यक् न तु तत्पुरुषस्तथाप्यभावपदवैयर्थ्यापत्त्या तत्रापि तत्पुरुषो वलंबित इति ध्ये

153

म॰टी॰ यं तदभावस्यापि पर्वतो वन्ह्यभाववानिति निश्चयाभावस्यापि व्यतिरेकग्राहकस्येति व्यतिरेकविकलवदित्यादिमूलस्थो त्यादिग्रंथे
ति मूले त्यादित्त्वदिति धूमाभावाभाववदित्यर्थः तथात्वात् व्यतिरेकव्याप्तिग्रह प्रतिबंधकत्वात् विपक्षपदेनेति मूले ही धितौ चेत्या
दिः व्यतिरेकविपक्षएवव्यापकत्वेनाभिमत हेत्वभावाभाववानेवच्या इति इदमुपलक्षणादीधितौ हेतुशब्देनव्याप्यत्वाभिमतः साध्या
भावो वाच्यः इत्यपि द्रष्टव्यं तद्व्यतिरेकस्यैवेति साध्य हेतुरूपस्य साध्याभाववहेत्वभावयोर्व्यतिरेकस्यैवेत्यर्थः एक एवेति न चैवं व्य
भिचारस्य हेत्वाभासत्वानुपपत्तिः तज्ज्ञानदशायामपि निर्धर्मितावच्छेदकव्याप्तिग्रह सम्भवादिति वाच्यं स धर्मितावच्छेदकव्या
प्तिग्रह प्रतिबंधकतयैवोपपत्तेः व्यभिचाराद्यन्यतमत्वस्यैव हेत्वाभासत्वरूपत्वाच्च ननु पक्षता यालिंगभेदेन हेतुताभेदान्नसि
द्धधूमलिंगके ह्यालोकपरामर्शकाले धूमपरामर्शासत्त्वे धूमलिंगकेच्छां विशिष्य सिषाधयिषाभावरूपकारणावला धूमलिंगकानुमि
तिरेतन्मते तु वीराधः धूमपरामर्शसत्त्वे सिद्धिसत्त्वे धूमलिंगकेच्छासत्त्वे धूमलिंगकानुमितिजनकतावच्छेदकवन्ह्यभाववदवृत्ति
त्वावच्छिन्नवत्तानिर्णयत्वाक्रान्तस्योक्तस्थलेपि सत्वात् लिंगभेदेन परामर्शहेतुताभेदवादिनश्च धूमपरामर्शत्वावच्छिन्न
स्य धूमलिंगकानुमितिजनकस्योक्तस्थलेऽसत्वान्नोक्तापत्तिरिति चेन्न यतन्मते च वक्ष्यमाणादिशा पक्षताहेतुत्वस्यैवाभाव
त् ननु निर्णयत्वं निर्वचनानुरोधेन लिंगभेदेन परामर्शहेतुताभेदश्री वृषपकः अन्यथा वन्हिव्याप्यत्वावच्छिन्नाभावाप्रकारकत्वे
सति व्याप्यत्वावच्छिन्नप्रकारकत्वस्य निर्णयत्वेव वन्हिव्याप्य धूमवान्नवेति संशयावारणादिति चेन्न उक्तसंशयेपि व्याप्यत्वावच्छि
न्नाभावप्रकारकत्वोपगमेनतद्वारणात् तदवच्छिन्नप्रतिबंधकस्य व्याप्यवत्तानिश्चयस्यापूर्वमसत्वात् यत्र च पूर्वं तत्प्रतिबंध

154

राम॰

१५५

५१

कोऽव्याप्यवृत्तानिश्चयोऽस्ति तत्र तत्संशयस्य व्याप्यनिश्चयत्वोपगमेन तदुत्तरमनुमितिरिष्टैव वस्तुतस्तत्र पर्यावृत्ते संशयत्वाव
मानसत्वव्याप्यजातिविशिष्टनिरूपितत्वस्य संशयकोटिविषयतायामेवोपगमेन संशयत्वविशिष्टनिरूपितत्वस्य पक्षविषयतानि
रूपितव्याप्यविषयतायां निवेशात्सामंजस्येन निर्णायत्वनिर्वचनानुरोधेन परामर्शस्य लिंगभेदेन हेतुताभेद आवश्यक इति तत्त्व
यत्तु धूमत्वाद्यवच्छिन्नाभावघटिताप्रामाण्यज्ञानस्योत्तेजकत्वानुरोधेन तदभावसहकारितानुरोधेन वा लिंगभेदेन परामर्श
कारणताभेद आवश्यक इति तदसत् तत्तद्विषयतासंबंधेन तत्तदप्रामाण्यग्रहविशिष्टधूमादिप्रकारताभेदकूटविशिष्ट
त्वस्य कारणतावच्छेदकव्याप्यविषयतायां निवेशेनादोषात् आलोकादिविषयतया धूमत्वाद्यवच्छिन्ना[illegible]भावघटिता
प्रामाण्यग्रहेऽस्वातंत्र्येणाभानेऽपि तादृशाप्रामाण्यग्रहविशिष्टधूमादिप्रकारताभेदस्य तदानीं मालोकादिपरामर्शे आलोका
दिविषयतायां सत्त्वात् तदानीं तस्मादनुमित्युपपत्तेरिति दिक् अधिकमन्यत्र मत्कृतौ द्रष्टव्यं व्याप्तिर्भेदादिति वह्न्यभाववद्
संयुक्तत्वादिविशिष्टधूमादेः कालिकादिसंबंधेन हेतुमत्ताग्रहादनुमितिवारणाय वह्न्यभाववत्संयुक्तत्वादिविशिष्टनिष्ठ
संयोगाद्यवच्छिन्नप्रकारताशालिनिर्णयत्वादिनैव हेतुतावच्छेदकत्वादिति भावः नन्वाकाशमवृत्तीति ज्ञानकाले पक्षधर्मता
ज्ञानविरहादेव नानुमित्यापत्तिरतस्त्राह अवृत्तित्वज्ञानस्येति वृत्तित्वसंबंधकेति आधेयतासंयोगादिसंबंधावच्छिन्नसंसर्गके
त्यर्थः तदानीमवृत्तित्वज्ञानकाले विवादेति तथा च नेष्टापत्तिरिति भावः वृत्तिमत्त्वमिति नन्वेवं घटत्ववान् घटपटोभयत्वादित्या
दौ पर्याप्तिसंबंधेन हेतुतायामतिव्याप्तिः साध्यसामानाधिकरण्यनिवेशे च पर्याप्तिसंबंधघटितदभावान्न दोष इति चेन्न उ

ती

म०टी०

भयत्नादेः प्रत्येकमेवपर्याप्तिः प्रत्येकमात्रवृत्तिधर्मः परंनतदवच्छेदइति घटत्वाभाववति पटे पर्याप्तिसंबंधेनतादृशोभयत्वसावृत्ति
त्वेनातिव्याप्त्यसंभवात् अथ यथा साध्यसामानाधिकरण्यनिवेशे प्यतिव्याप्तेर्दुर्वारत्वात् व्यभिचारज्ञानेति अ समानप्रकारकत्वे
त्यादिः पर्याप्त्यादिरूपेति अ अस हानसीय [illegible] वह्निभिन्नवह्निमान् धूमादित्यादावतिप्रसंगवारणाय यानवच्छेदकेत्यनेन यादृश
धर्मावच्छेदेनसाध्यतावच्छेदकतापर्या [illegible]
[illegible] भिन्नादृशधर्मावच्छेदेनावच्छेदकतापर्याप्त्यभावइत्यस्यावश्यंवाच्यतयातत्परिग्रहायादिपदोपाद
नं एतेनव्यभिचारलक्षणेपि महानसीयवह्न्यभावमादायातिप्रसंगवारणाय पर्याप्त्यनुसरणमावश्यकं एवं साध्याभावव
दवृत्तित्वरूपव्याप्तावपितन्निवेशनमन्यथातादृशाभावमादायाव्याप्तेः तथा च व्यापकताघटितव्याप्तेः कथं पर्याप्तिनिवेशे
नविषयाविरोधविरहोद्भावनमितिशंकापिप्रत्युक्ता उक्तरीत्या पर्याप्तिनिवेशस्य व्यापकताघटितव्याप्तावेवसत्वात् भानादि
तिव्यापकताज्ञान इत्यादिनानु उक्तसमूहालंबनव्यभिचारज्ञानविरोधिता निवेशे गौरवेणात घटितत्वेन साध्याभाववद्वृत्ति
त्वरूपव्यभिचारज्ञानमुपादायतद्विरोधित्वेनजनकत्वोक्तौ कथंतस्याकिंचित्करत्वमत आह तद्घटितत्वेनेति तादृशेति साध्या
भाववद्वृत्तित्वेत्यर्थः नगौरवादिकमिति आदिनाविषयविरोधाभावपरिग्रहः तद्घटितत्वेनसमूहालंबनव्यभिचारज्ञानमुपादा
यतद्विरोधित्वेनजनकत्वोक्तौ [illegible] वपिगौरवादेरभावादितिभावः घटज्ञानत्वादिनेति अतिलाघवादित्यादितदेवस्थयोक्तिक
त्वमेवज्ञानादिमानितीतिपघ पिवह्न्यादिसाध्यकएववह्नित्वत्वादिनावह्न्यादेर्व्यापकतावच्छेदकत्वग्रहेवह्न्यादिमा

राम०

सेव १

नित्यानुमितेरयोगःसंभवत्तथापिव्यतिरेकिणिसाध्याभाववदवृत्तित्वधीःकेवलान्वयिनिचव्यापकसामानाधिकरण्यधी
रनुमितिहेतुरित्युक्तौवह्न्यादिमानित्यनुमितेरयोगोनसंभवतीतिकेवलान्वयिनोविषयतयाज्ञानस्यसाध्यतानुसरणंनचैव
मपिवाच्यत्वादिसाध्यत्वानुसरणमेवोचितमितिवाच्यंवाच्यत्वत्वादेरखंडधर्मत्वाभावेनस्वरूपतस्तद्भानेनतदवच्छिन्न
साध्यत्वानुसरणस्याप्यसंभवात्पदपावच्छिन्नस्येतिनिर्धर्मितावच्छेदककव्यापकतावच्छेदकत्वग्रहस्यव्यभिचारज्ञानाप्र
तिवध्यतयानुमित्यहेतुत्वादितिप्रसंगश्चेतिभावःप्रसंगादितिअथज्ञानादिमानित्यनुमितौज्ञानत्वत्वादिनाव्यापक
तावच्छेदकत्वग्रहस्येवहेतुत्वंननुजातित्वादिनेतिनोक्तप्रसंगइतिचेन्नतथासतिज्ञानत्ववत्वानित्याद्यनुमितेर्विलोपा
पत्तेःयत्तुयत्रज्ञानत्वादिकंस्वरूपतस्सामानाधिकरण्यनिरूपकतावच्छेदकतयाभासतेतत्रज्ञानादिमानित्यनुमिति
र्यत्रचज्ञानत्वत्वादिनातत्रज्ञानत्ववत्वानित्याद्यनुमितिरितिनोक्तप्रसंगइतितन्नतथासतिहेतुसमानाधिकरणाभावप्रति
योगितानवच्छेदकानुभवत्वव्यापकगुणत्वव्याप्यजातिमज्ज्ञानसमानाधिकरणाहेतुमानयमित्यादिज्ञानादपिज्ञानवानित्या
द्यनुमितिप्रसंगात्त्वन्मतेतन्मतेप्रतियोगितावधर्मिकसाध्यतावच्छेदकावच्छिन्नत्वघटितोभयाभावज्ञानस्यानुमितिहेतुतयानज्ञ
ज्ञानत्वादेर्यथाभानंतथानुमित्युक्तावुक्तप्र[struck out]मगोनेतिध्येयंज्ञानादिवेतिअनुमितिरित्यग्रिमेणा
न्वयःतदानींवह्न्यादिसाध्यस्यव्यतिरेकित्वग्रहकालेकथमितितदानींसाध्याभाववदवृत्तित्वज्ञानासंभवादितिभावःननुअभा
वप्रतियोगितानवच्छेदकंप्रमेयत्वमितिग्रहेपिसंबंधविधयाप्रमेयत्वत्वावच्छिन्नप्रतियोगिताकत्वावगाहिसाध्याभाववदवृ

157

गि १

त्वं
तावि २

79

तृ४

म०टी०

158

त्तित्वज्ञानं भ्रमात्मकं संभवत्येव समानप्रकारकग्रहस्यैव विरोधित्वादिति चेदत्र वदंति स्वप्रतियोगितावच्छेदकत्वसंबंधेनाभा
वाभाववत्त्वमेव केवलान्वयितावच्छेदकत्वं तज्ज्ञानदशायां च न साध्याभाववद्वृत्तित्वस्य भ्रमात्मकज्ञानसंभवः अभावप्रमेयत्वावच्छि
न्नप्रतियोगिताकत्वसंबंधेन प्रमेयत्वस्य प्रकारत्वे समानसंविसंवेद्यतया प्रमेयत्वत्वेपि स्वप्रतियोगितावच्छेदकत्वसंबंधेनाभावस्या
पि प्रकारत्वात् एवं च केवलान्वयित्वरूपानुपसंहारित्वस्य ज्ञानमन्वयव्यतिरेकव्याप्तिग्रहविरोधीति तस्य हेत्वाभासत्वमप्युपपन्नमिति
केचित्तु वाच्यत्वत्वावच्छिन्नस्वरूपसंबंधावच्छिन्नप्रतियोगिताकत्वसंसर्गावच्छिन्नप्रतियोगिताकवाच्यत्वाभाववस्याभावत्वावच्छे
देन ग्रहदशायां वाच्यत्वाभाववद्वृत्तित्वस्य न भ्रमात्मकज्ञानसंभवः समानप्रकारकविरोधिग्रहसत्त्वात् न च तादृशप्रतियोगि
कत्वाप्रसिद्धिरिति वाच्यं विषयतानिष्ठस्याभावनिष्ठस्य च स्वप्रतियोगिकत्वस्यैक[illegible]जातीयतया स्वरूपसंबंधेन वाच्यत्वत्वाव
च्छिन्नप्रकारकज्ञानादिनिष्ठवाच्यत्वादिविषयतायामेव तत्प्रसिद्धिसंभवादित्याहुः घटादिवृत्तित्वानुमितिरिति परे प्रमेयत्व
मित्याद्याकारकसाध्यविशेष्यकानुमित्यभिप्रायेणेदं प्रमेयत्वादेरितीत्यतिव्याप्तिश्च[illegible] प्रमेयत्वपक्षकघटादिवृत्तित्वानुमितिरेव
तत्रेति भावः सहचारस्थलाभावादिति न च साध्याभाववद्वृत्तित्वरूपव्याप्तिज्ञाने सहचारज्ञानानपेक्षणात्कथमेतदिति वाच्यं
तत्र साध्यसामानाधिकरण्यनिवेशकल्पाभिप्रायेणेतस्योक्तत्वात् परोक्षज्ञाने तत्र इति धर्मव्यापकत्वग्रहे तत्र इति त्वग्रहानियमा
दाहग्राहकत्वैति सिद्धसाधनादिति हेतुग्रहकाल एव साध्यग्रहादिति भावः अत्यंताभावघटितसाध्याभाववद[illegible]द्वृत्तित्वापेक्षया
प्रतियोगिवैयधिकरण्यानिवेशेनान्योन्याभावघटितसाध्यवदन्यावृत्तित्वज्ञानस्य हेतुत्वे लाघवमित्याशयेनाह साध्यवदन्येति इदमे

राम०

तृ२

५४ हेतुतायाः स्फुटतया व्यतिरेकव्याप्तिग्रहजन्यज्ञानस्यानुमितित्व ५४

६२ ६४

153

वकेवलान्वयित्वज्ञानकालेनुमित्यनंगीकाररूपमेवतां अनुमितिमवंतीतिग्राह्याभावावगाहित्वादिति भावः विषयविरोधाभाववद्वृ
त्तिसमानप्रकारकत्वाभावादिति भावः धूमाभावाभावत्वेनेति समानसंवित्संवेद्यत्वेनायीत्यादिप्रमित्यंतरत्वइति व्यतिरेकव्याप्ति
ग्रहेतिशेषः तत्र प्रमाणांतरे व्यतिरेकेनीति व्यतिरेकेत्यादीत्यर्थः ननु तत्रानुमितित्वानुभवोविवादग्रस्त इत्यत आह दीधितौ क्वमे
ति साध्याभाववद्वृत्तित्वग्रहस्य बलाघवेनानुमितित्वाभ्युपगमे व्याख्यायां तथात्वे व्यतिरेकव्याप्तिग्रहाधीनाधियोनुमितित्वाभ्युपगमस्य
तयानुमितित्वाभावेन तादृशानुभवेन विवादग्रस्तत्वमिति भावः मिनोतीति त्वमस्तकेअनुमितित्वानुभवेतितस्य च प्रकृतेऽभावादिति
भावः ननु तत्करणस्यापीत्यपि ना व्यतिरेकव्याप्तिग्रहाधीनाविजातीयाधीः समुच्चितास्याश्च प्रमित्यंतरत्वं ननु प्रमाणांतरत्वमिति
तत्करणमपि प्रमाणांतरमित्यसंगतमत आह भावप्रधान इति भावप्रधानोपीत्यर्थः तथा च भावप्रत्ययात्प्रमाणांतरपदस्य प्र
मित्यंतरार्थकतया करणास्तुत्यात्प्रमाकरणांतरपरतया नासंगतिरिति भावः शब्दानुमानेतिशाब्दानुमितिसामग्रीमिलनइ
त्यर्थः यथा परस्परप्रतिबंधेनेति यथा केवलशाब्दानुमितिसामग्रीमिलनेशाब्दसामग्र्यानुमितिप्रतिबंधेन शाब्दानुमित्साविशि
ष्टानुमितिसामग्रीमिलनेनुमितिसामग्र्याशाब्दप्रतिबंधेन शाब्दानुमित्युभयरूपज्ञानाभावस्तथा प्रकृते केवलानुमित्यर्थी
पत्तिसामग्रीमिलने लघ्वनुमितिसामग्र्यार्थापत्तिप्रतिबंधेनानुमित्यर्थापत्तीच्छाविशिष्टार्थापत्तिसामग्रीमिलनेऽर्थापत्तिसामग्र्यानुमि
तिप्रतिबंधेनानुमित्यर्थापत्त्युभयरूपज्ञानाभावइत्याखंडलार्थः यथास्मतेशाब्दानुमानसमाहारेणाद्वयोद्योत्यात्प्रकृतेनुमित्युप
त्याचासंगत्यापत्तेरितिध्येयं पक्षताजन्यस्य तन्मात्रस्यानुमितित्वमिति लौकिकप्रत्यक्षेविषयस्पहेतुतयापक्षताप्रत्यक्षस्याप्य

त्यं१ प्रति३
न२

द्वि २   नं१

म०टी०   160

नुमितित्वापत्तिरिति भावः अभ्युपेयत इति तथा च पक्षताया लौकिकप्रत्यक्षाभावेन पक्षताजन्यत्वमादाय पक्षताप्रत्यक्षस्यानुमितित्वाप
त्तिरिति भावः अभ्युपगम्येति पक्षताया अनुमितिहेतुत्वमित्यादिना घवादाह व्याप्यत्वमिति वृत्तिमत्त्वे सतीति शेषः नातःऽवृत्तावित्या
दि पूर्वोक्तसंगतिः अप्रसिद्धेति ननु हेतुतावच्छेदकसंबंधसामान्येन साध्याभाववदनुयोगिकत्वहेतुतावच्छेदकविशिष्टप्रतियोगिक
त्वोभयाभावविवक्षणान्नाप्रसिद्धिरिति चेन्न एतन्स्यसाधनभेदेन भिन्नत्वात् सामान्यत्वस्य व्यापकत्वात् तस्मिन् स्य दुर्वचनत्वा
व्यापकसामानाधिकरण्यापेक्षया गुरुत्वाच्च एतेन हेतुतावच्छेदकसंबंधावच्छिन्नहेतुतावच्छेदकावच्छिन्नवृत्तितासामान्ये
साध्याभाववद्वृत्तिरूपित्वाभावविवक्षणान्नोक्ताप्रसिद्धिरित्यपि परास्तं उक्तदोषापत्तेः वृत्तेरिति तथा च प्रसिद्धानुमाने व्याप्ति
रिति भावः दैशिकविशेषणतानाविशेषेणेति प्रसिद्धानुमानाभिप्रायेणेदं विरोधितानियामकसंबंधेनैव वृत्तित्वं विवक्षितं वि
रोधितानियामकत्वस्य साध्यवत्ताग्रहविरोधितानियामकत्वमर्थः तेन विरोधितानियामकसमवायसंबंधेनेत्याद्यग्रिमग्रं
थसंगतिः अभावाभावस्यापीति अपिनाभावसमुच्चयः स्वमते दीधितिकृन्मते वृत्तित्वादिति तथा च नोक्ताव्याप्तिः तत्र हेतुभूत
■सत्त्वाभावाधिकरणजात्यादौ तादृशदैशिकविशेषणतया वृत्तित्वस्यान्यत्राप्रसिद्धसाध्याभावे जात्यभावाभावरूपेऽभावसत्त्वा
दिति भावः एतेन स्वाधिकरणेत्यादेर्व्याप्तिरूपत्वं अहुरित्यस्यासोद्भावनं तद्बीजं च कालिकसंबंधावच्छिन्नप्रतियोगिताका
काशाभावानामत्वादित्यादावात्मत्वाद्यधिकरणाविरोधितानियामककालिकसंबंधेन वृत्तेरप्रसिद्धाऽव्याप्तिरिति वृत्तिमिति
तथा चाभावीयस्वरूपसंबंधेनैव स्वाधिकरणवृत्तित्वं वाच्यं जात्यभावाभावात्सत्ताभावादित्यादौ च सत्ताभावाधिकरणजात्यादावभा

राम०

१६१

वीयस्वरूपसंबंधेनवृत्तेः प्रसिद्धानोक्ता व्याप्तिरितिभावः अंगीकुर्वतीति अत्रापुक्तस्थलेआत्मत्वाद्यधिकरणोभावीयस्व
रूपसंबंधेनसाध्याभावस्याकाशाभावस्य वृत्त्याऽव्याप्तिरित्यस्वरसः नीलेत्यादिननुसाध्याभाववद्वृत्तित्वमित्यस्यसाध्याभाव
ववृत्तितानवच्छेदकमित्वमर्थः तथाचात्रनीलासमवेतत्वविशिष्टगोत्वत्वस्यसाध्याभाववन्नीलगोवृत्तितानवच्छेदकत्वान्नाव्या
प्तिरितिचेन्नविशिष्टाभूतगोत्वत्वस्यनीलगोवृत्तितावच्छेदकत्वेविशिष्टस्यानतिरेकेणाविशेषणांतरविशिष्टस्यापितदनवच्छेद
कत्वासंभवेनोक्तव्याप्तेर्दुष्परिहरत्वात् अतएव द्रव्यंगुणकर्मान्यत्वेसतिसत्वादित्यस्योपेक्षातत्रस्वाश्रयसमवेतत्वसंबंधेन
गुणकर्मान्यत्वविशिष्टमात्रस्यसाध्याभाववद्वृत्तितानवच्छेदकतयातदायेवविशिष्टसत्वस्यव्याप्यत्वोपपादनसंभवान्
नवप्रकृतेपिस्वाश्रयसमवेतत्वसंबंधेननीलासमवेतत्वविशिष्टमात्रमादायविशिष्टगोत्वस्यव्याप्यत्वोपपादनसंभवतीति
वाच्यंतस्यद्रव्यत्वादिनिष्ठसाध्याभाववद्गगनादिवृत्तितावच्छेदकत्वेनतदादायव्याप्यत्वोपपादनासंभवादितिदिक् तथासाध्याभाव
वद्वृत्तित्वभ्रमएवानुमितिः अत्रेदंदूषणंउक्तपुर्व्याविह्न्याद्यनुमितौवह्न्यभाववद्वृत्तित्वादिरूपव्याप्तिज्ञानस्यहेतुत्वेपिकेवलान्व
यिनिविशेषदर्शनदशायांतज्ज्ञानासंभवेनव्याप्यकसामानाधिकरण्यरूपव्याप्तिज्ञानस्यैवहेतुत्वमुचितंपक्षकेवलान्वयिनिसाध्य
भाववद्वृत्तित्वज्ञानंभ्रमरूपंव्यापकसामानाधिकरण्यज्ञानंप्रमारूपंतत्रलाघवादाद्यज्ञानमेवहेतुः केवलान्वयित्वविशेष
दर्शनदशायांकेवलान्वय्यनुमितिखंडनमेवकेवलान्वयिखंडनमितितदसत् एवंसत्यव्याप्यवृत्तित्वखंडनस्याप्यापत्तेः संयोगि

४१ ।

मं०टी

ष्य२ सै६ त४

द्रव्यत्वादिन्यादौ संयोगाभाववद्वृत्तित्वज्ञानं भ्रमरूपं संयोगवदन्यावृत्तित्वज्ञानं प्रमारूपं तत्र लाघवेनाग्रस्यैव हेतुत्वं अव्याप्यवृत्तित्व
विशेषदर्शनदशायाम व्याप्यवृत्त्यनुमितिखंडनमेवाव्यावृत्तित्वखंडनमित्यस्यापि मुवचत्वादिति दिक् अधिकमस्मत्कृतन्यायकौ
स्तुभे द्रष्टव्यं। इति महादेवविरचितायां भवानंदीव्याख्यायां सर्वोपकारिण्यां केवलान्वयिग्रंथव्याख्यानं वेतीति। नत्वा च तत्वेन
सानैयायिकस्येत्यर्थः व्याप्तेरिति साध्याप्रसिद्धेरिति पक्षे हेतुसाध्यसहचारग्रहः। पृथिवीत्वेतरभेदसहचारग्रहः। नन्वावश्यकसाध्य
प्रसिद्ध्यधीनहेतुसाध्यसहचारग्रहाधीनहेतुसमानाधिकरणेत्यादिव्याप्तिग्रहसंभवेन तत्पाते नैदुर्ज्ञेयत्वमत आह साध्यप्रसिद्धिमा
त्रेणैवेति साध्यप्रसिद्ध्यधीनसाध्यवदन्येत्यादिव्याप्तिग्रहमात्रेणैवेत्यर्थः मात्रपदेन साध्यप्रसिद्ध्यधीनहेतुसाध्यसहचारग्रहाधी
नहेतुसमानाधिकरणेत्यादिव्याप्तिग्रहव्यवच्छेदः एवकारोवधारणे कृतार्थत्वाद्धेतिर्यत्किंचिदन्वयव्याप्तिग्रहादेवानुमितिसंभवे
लाघवेन साध्यवदन्येत्यादिव्याप्तिग्रह एवोक्तेत्याशयः वस्तुतस्तु प्रकृतहेतुसाध्यसहचारग्रहं विनापि योपरुधर्मावच्छिन्नाभावव्याप
काभावप्रतियोगितावच्छेदकयद्धर्मवान्सतद्धर्मावच्छिन्नव्यापकतावच्छेदकतद्धर्मावच्छिन्नसमानाधिकरणावृत्तितद्धर्मवानिति सामान्य
व्याप्त्यायक्षधर्मतावलाद्धेतुसमानाधिकरणेत्यादिव्याप्तेरनुमितिसंभवान्नदुर्ज्ञेयत्वमत आह। साध्यप्रसिद्धिमात्रेणैवेति। मात्रपदेनप
क्षधर्मताबलव्यवच्छेदः [illegible]षपूर्ववदिति ध्येयं दुर्ज्ञेयत्वादित्यंतेनानुमेयव्याप्तिरूपसाध्याप्रसिद्धिकृत[illegible]नाकथंचिन्नप्रसिद्धौत्वाह साध्यप्रसि
द्धौति। अनुमेयव्याप्तिरूपसाध्यप्रसिद्धौ इत्यर्थः कृतार्थत्वाद्[illegible] इत्यंतेनानुमेयव्याप्तिरूपसाध्याप्रसिद्धिकृतानाकथंचिन्नप्रसिद्धौत्वाह साध्य[illegible]

ल२ नो४

162

राम०

न्वेतितथाचव्याप्त्यनुमानवैयर्थ्यमितिभावइत्यपिवदंति । व्याप्तिग्राहकत्वात् । व्याप्तिग्रहे हेतुतायाः पूर्वं दूषितत्वात् । उक्तक्रमेण । पृथि
वीत्वमित्याद्युक्तक्रमेण । हेतुतावच्छेदकेति हेतुतावच्छेदकपृथिवीवृत्तित्वघटितधर्मविशिष्टपृथिवीवृत्तित्वस्योदाहरणादस्मा
दादितिभावः । तच्छंकेतिव्यभिचारशंकेत्यर्थः । तत्संशयात् । अन्याधिकरणांतर्भावेन व्यभिचारसंशयसंभवात् । अस्त्येवेतितथाचत
दधिकरणांतर्भावेनव्यभिचारसंशयनिवर्तकतयैवसहचारग्रहस्यव्याप्तिग्रहोपयोग इति भावः । तथा । व्याप्तिग्राहकः । प्रकारांतरेणा
। साधनवत्त्वातिरिक्तरूपेण । प्रकारांतरेण चासाध्याभाववत्त्वातिरिक्तरूपेण च । व्यभिचारत्वाग्रहात् व्यभिचारग्रहत्वाभावात् । तद्विरोधी
उपदर्शितव्यभिचारज्ञानविरोधि । तत्प्रयोजनं । यच्छब्दादिप्रयोजनं । तथानुभवेपि । व्यतिरेकुदाहरणादप्यन्वयव्याप्त्यनुभवेपि
। अन्यादृशी । सांप्रतिकी । नास्त्येवेति । अन्यथा कस्यापि कदापि पराजयएव न स्यादिति भावः । पुनरिति । साधनाभावइति शेषः । तद्वारणा
। संयोगाभाववारणाय । संदर्भेति प्रक्षालनाद्धीति न्यायेनोभयत्रैव प्रतियोगिवैयधिकरण्योपादानस्यानौचित्यादिति भावः । अत्र साधनाभावत्वे
न साधनाभावस्य व्यापकत्वं व्यापकत्वे प्रतियोगिवैयधिकरण्यनिवेशेप्यवश्यं वाच्यं । अन्यथा वक्ष्यमाणरीत्यासंभवान्वयेकेरित्या द
वतिप्रसंगापत्तेः । एवं च द्रव्यभिन्नत्वसंयोगवदन्यत्वादित्यत्र संयोगवद्भेदात्मकस्य संयोगवदन्यत्वाभावत्वावच्छिन्नाभावस्य द्रव्ये सत्वे
न संयोगवदन्यत्वाभावत्वेन संयोगवदन्यत्वा[struck]भावस्य द्रव्यभिन्नत्वाभावव्यापकत्वसंभवेन तस्य संयोगत्वेन व्याप
कत्वाभावेपि क्षत्यभावेन मैं तन्निष्पत्तये व्यापकत्वस्य प्रतियोगिवैयधिकरण्यघटितत्वमनुचितमित्यस्वरसादाहाऽऽहुरिति अत्रा
न्योन्याभावघटितव्यापकत्वमेव निविष्टं एवं च तस्य संयोगाभावे सत्त्वेन साधनाभावे प्रतियोगिवैयधिकरण्यं निवेशनीयमिति व्याख्या

तुराशयः। यद्वाभावाभावसाधारणविशेषणतया अस्वीकारे व्यापकतावच्छेदकसम्बन्धस्य साध्याभाववन्निष्ठत्वं संबंधविशेषानियंत्रितमेव वाच्यं एवं च
वह्निमान् धूमादित्यादौ वह्न्यभावादिमत्यपि कालिकादिसंबंधेन धूमाद्यभावाभावस्य सत्वेन धूमाद्यभावादेर्व्यापकत्वासंभवेनाव्याप्त्यापत्त्या व्यापकतायां
प्रतियोगिवैयधिकरण्यं अवश्यं निवेशनीयमिति। एवं साध्याभावसाधनाभावयोः प्रतियोगिवैयधिकरण्यनिवेशे। तत्र व्यतिरेकित्वाभावे महापटोत्प
त्तिकाले तंतावारंभकसंयोगानुकूलक्रियासत्वेन द्व्यारंभकसंयोगनाशकक्रियोत्पत्तिर्न भवति क्रियावति क्रियांतरानुत्पत्तेरत आह खंडपटेति। खंडप
टस्यावस्थिततंतुसंयोगैरेवोत्पत्त्या तत्पाककाले न तंतावारंभकसंयोगानुकूलक्रियानास्तीति नोक्तदोष इत्याशयः। द्व्यणुकेति। खंडपटात्मके स्यादिः एवमग्रेपि। एतत्त
संयोगासमानाधिकरणसंयोगाभावे साध्ये विभागासमानाधिकरणविभागाभावस्य व्यतिरेकित्वाभिधानं तंत्वभिन्नत्वादित्यादिनिभावः। एवंविधेति। द्विक्षण
मात्रस्थायिखंडपटात्मके इत्यर्थः। अत्र तादृशद्व्यणुकानंगीकुर्वतामेव मानाशयं वर्णयंति। यत्र यत्तंत्वारंभकसंयोगकाले एकतंतौ क्रिया ततस्तयोर्विभागः ततस्तं
तुद्वयसंयोगनाशः तत्र विभागोत्पत्तिकाले खंडपटोत्पत्तेः प्रामाणिकत्वे तस्य खंडपटस्य द्विक्षणमात्रस्थायिता संभाविता तत्रैव मानं न पश्यामः उत्पत्तिक्षणे द्वि
द्व्यसंयोगाभावे न द्वितीयक्षणे तत्प्रत्यक्षासंभवात् तृतीयक्षणे च तस्यैव नाशेन प्रत्यक्षासंभवः विषयस्य कार्यकालवृत्तितया प्रत्यक्षहेतुत्वात्। न च तत्साम
ग्रीलिंगकानुमानमेव मानमिति वाच्यं। फलसंदेहेन तत्सामग्र्या अप्यसिद्धत्वेन तदसंभवात्। न च तंतुतत्संयोगादिघटितसामग्री प्रत्यक्षसिद्धैवेति वाच्यं। वि
जातीयसंयोगस्यैव द्रव्यजनकतया तादृशवैजात्यस्य फलाभावेनानंगीकारसंभवेन फलानिश्चये तत्सामग्र्याः प्रत्यक्षत्वासंभवादिति। मतद्वस्वरसोद्भाव
नं तद्बीजं च यत्र महापटनाशकाले तदारंभककतिपयसंयोगावर्तितेतेषु द्व्यारंभकतावच्छेदिका जातिरवश्यमंगीकार्या अन्यथा तद्धस्तुतंतुषु पूर्वं महापटो
त्पत्तिरेव न स्यात् तथा च खंडपटोत्पत्तिसामग्री प्रत्यक्षसिद्धेति तत्र खंडपटोत्पत्तिपूर्वकालीनैकतंतुक्रियया खंडपटोत्पत्तिकाले तंतुद्वयविभागेन द्वितीयक्ष

165

क्षणे च तत्संयोगनाशेन तद्वं उपदर्श्यते तृतीयक्षणे नाशावश्यक इति द्विक्षणमात्रस्थायिद्रव्यस्याप्रामाणिकतया तदङ्गीकारस्यावश्यक इति। न चैवं तत्रेत्या
दिग्रन्थासंगतिर्व्याख्यातानोद्धृतेवेति कथमेतत् इत्युक्तदोषोस्त्येवेति वाच्यं। तादृशद्रव्याङ्गीकारेपि तत्रेत्यादिग्रन्थस्तत्र विभागाभावे साध्ये सः संगाभावो हेतु
र्व्यतिरेकव्यापितस्य सद्धेतुत्वादित्याख्येय इति व्याख्यातुस्तात्पर्यान्तयनात्। न व्यास्तु तत्र तादृशद्रव्यावृत्तिसंयोगाभावे इति व्याख्यायां तादृशद्रव्याङ्गीकारेपि
न दोष इत्याहुः। इत्यादीति। आदिना प्रतियोगित्वे अभावावगाहित्वादेः परिग्रहः। तज्ज्ञानस्य। व्यतिरेकव्याप्तिज्ञानस्य। तथात्वे। व्यतिरेकिण्यनुमितिहेतुत्वे। वह्नि
त्वरूपेण। वह्नित्वरूपेणैव। धूमं प्रतीति शेषः। धूमाभावेति। अप्रसिद्धेत्यादिः। तदीयो। निश्चयीयो। अवश्यंभाव इति। चकुमुचित इति वचनविपरिणतेनान्व
यः। दीधितावभावाविति। व्यापकाभावेनेत्यादिमूलीयाभावावित्यर्थः। रूपांतरेण व्याप्याभावसिद्धिनिरासायाह यद्रूपावच्छिन्नमिति। व्याख्यायां पूर्वोक्तत्वादि
ति। सिद्धांतलक्षणोक्तत्वादित्यर्थः। एवं। येन रूपेण व्यापकता गृह्यते तद्रूपावच्छिन्नीयत्वेनाभाववत्ताज्ञानस्य हेतुत्वे। दीधितौ व्यापकत्वविशिष्टेति। व्यापक
तावच्छेदके त्यर्थः। तेन व्यापकतावच्छेदकवह्नित्वाद्यवच्छिन्नाभावलाभः। एतेन यथाश्रुते व्यापकत्वसहितवह्नित्वावच्छिन्नाभाववत्ताज्ञानस्य हेतुत्वाला
भेन वह्नित्वादेर्व्यापकतानवच्छेदकत्वग्रहेपि द्रव्यत्वादिना वह्न्यादेर्धूमादिव्यापकत्वग्रहे धूमव्यापकवह्न्यभाववानिति ज्ञानेन धूमाद्यभावसिद्धिप्रसं
ग इति निरस्तं। नन्वत्र व्यापकतावच्छेदकत्वं वह्नित्वादावुपलक्षणं विशेषणं वा। नाद्यः प्रतियोगितावच्छेदके कस्यचिदुपलक्षणतयाभानानुपगमात्
नांत्यः गुरुधर्मस्य प्रतियोगितानवच्छेदकतया व्यापकतावच्छेदकत्वविशिष्टवह्नित्वादेः प्रतियोगितावच्छेदकत्वासंभवादिति चेन्न। प्रतियोगिताप्रकारक
ज्ञानस्थले प्रतियोगितावच्छेदके उपलक्षणतयाभानस्य व्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताक इत्यादौ सर्वसिद्धतया प्रकृते वह्नित्वावच्छिन्न
प्रतियोगिताकाभाववत्ताज्ञानस्य प्रतियोगिताप्रकारकस्य हेतुत्वोपगमेन आद्यकल्पे बाधकाभावात्। वस्तुतस्तु लाघवेन प्रतियोगितासंसर्गकज्ञानहेतुत्वे

भ.टी.

व्यक ४

83

पिनक्षति: पूर्वं गुरुधर्मस्य प्रतियोगितावच्छेदकताया व्यवस्थापनेन व्यापकतावच्छेदकत्वविशिष्टवह्नित्वादेः प्रतियोगितावच्छेदकत्वसंभवेन द्वितीयक
ल्पस्यसम्यक्त्वात् इति। व्याख्यायां अप्रसिद्धावपीति· धूमादिव्यापकत्वावच्छिन्नस्य प्रमेयत्वादेः स्वरूपसंबंधेन केवलान्वयित्वादितिभावः। तादृशवह्नि
सामग्रीति· धूमव्यापकवह्निसामग्रीत्यर्थः। तादृशपरामर्शानंतरजत्वादिकमिति· अव्यवहितोत्तरत्वादिसंबंधेन तादृशपरामर्शत्वादिकमित्यर्थः। पक्षवि
शेष्यकानुमितित्वस्य· पक्षविशेष्यसाध्यप्रकारकानुमितित्वस्य। कार्यतेति· परामर्शेत्यादिः। अनुपस्थितस्यापीति· धूमाभावस्येतिशेषः। बोध्य इति· इदमुपल
क्षणं। एवं उक्तो धूमाभावधीसत्वे विशेष्ये विशेषणमित्यादिरीत्या धूमाभावप्रकारकधीरपि बोध्या। अवच्छेदकत्वेनैव· व्यापकतावच्छेदकत्वेनैव· एवकारे
णवह्नित्वादेर्व्यवच्छेदः। तदभाववत्ताज्ञानं· व्यापकतावच्छेदकावच्छिन्नाभाववत्ताज्ञानं प्रतियोगितावच्छेदकसंसर्गकमितिशेषः· एवंच व्यापकतावच्छेद
कत्वविशेषणमेतन्मते· दीधितौ व्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववानित्यस्य प्रतियोगितासंबंधेन व्यापकतावच्छेदकावच्छिन्नोभयाभाववा
नित्यर्थो बोध्यः। अंगग्राहिकयेति तथाच व्यापकतावच्छेदकमुपलक्षणीकृत्य प्रतियोगिताप्रकारकज्ञानमेव हेतुरितिभावः। इत्यादिकमिति· आदिना पूर्वोक्तरी
त्या गुरुधर्मस्य प्रतियोगितावच्छेदकत्वे धूमव्यापकतावच्छेदकवह्नित्वाद्यवच्छिन्नाभाववत्ताज्ञानस्य प्रतियोगितासंसर्गकस्य हेतुत्वमेवोचितं लाघवात् न तूक्त
रीत्या प्रतियोगिताप्रकारकमित्यादिपरिग्रहः। तादृश इति अन्वयव्यतिरेकव्यापकताग्रहनियतविषयताक इत्यर्थः अत्रेतरत्वादिना साध्याभावाद्यवगाहित्वा
नसाधारण्याय प्रतियोगित्वरूपाभावत्वस्यैव व्यतिरेकव्यापकतायां निवेशनीयतया प्रतियोगित्वस्वरूपाभावत्वस्य साध्याभावव्यापकतात्मकप्रतियोगित्वा
भावस्य च वारणायाद्यं· साध्यतावच्छेदकत्वादिवारणाय द्वितीयं। नव्यास्तु· अभावत्वादिविषयकत्वं उभयव्याप्तिज्ञानानुगमकं इत्येतत्स्फोरणायोभयव्यापकताव
च्छेदकत्वेन तादृशपदार्थोपादानमित्याहुः। दीधितौ अन्वयिनि ताद्रूप्येणेति [?] इत आरभ्य वह्नेरित्यंतमेको ग्रंथः। व्याख्यायां वैलक्षण्यसादिति· विलक्षणविषयताकत्वा

166

दित्यर्थः। धूमीयमभावत्वमिति· अभावत्वे धूमीयत्ववैशिष्ट्यं सामानाधिकरण्येन बोध्यं तथा च धूमीयाभावत्वविशिष्टवैशिष्ट्यावगाह्यनुमितित्वमन्वयव्या
प्तिज्ञानजन्यतावच्छेदकमिति भावः। प्रत्यक्षत्वेनेति· धूमाभाववदिति प्राथमिकप्रत्यक्षं यथा न धूमीयाभावत्वविशिष्टवैशिष्ट्यावगाहि विशेषणतावच्छेदक
प्रकारकज्ञानाभावात् तथेयमनुमितिरपीत्यर्थः। भासत इति· तथा चैकत्र द्वयमिति न्यायेन धूमाभावत्वोभयप्रकारकानुमितित्वं व्यतिरेकव्याप्तिज्ञानजन्यताव
च्छेदकमिति भावः। स्मृतावितिः सत्यामिति शेषः। तथैव· व्यतिरेकव्याप्तिज्ञानजन्यानुमितावेव। व्यभिचार इति· अन्वयव्याप्तिज्ञानस्य व्यभिचार इत्यर्थः तादृ
शानुमितेरपि विशेषणतावच्छेदकप्रकारकनिर्णयसत्वेन धूमीयाभावत्वविशिष्टवैशिष्ट्यावगाहित्वादिति भावः। कल्पे मते। धूमाभावस्वरूपेण· धूमी
याभावत्वरूपेण। धूमाभावस्यैवेति· एवकारो भिन्नक्रमे तथा च धूमीयाभावत्वरूपेणैव एवकारेणैकत्र द्वयमिति रीत्या धूमाभावत्वोभयरूपव्यवच्छेदः अत्र
ताहशजिज्ञासाकालेपि व्यतिरेक्युदाहरं प्रदर्शितप्रयोगः सर्वसिद्धोऽसंगत इत्यत्र तात्पर्यं तेन ताहशजिज्ञासाकालेऽन्वय्युदाहरणप्रयोग एव कर्तव्यः एकत्र
द्वयमिति रीत्या धूमाभावत्वोभयरूपेण धूमाभावजिज्ञासाकाले एव व्यतिरेक्युदाहरणप्रयोगः कर्तव्य इत्युक्तौ प्रकृतासंगतिरिति तत्त्वं काथा अनवकाशः। साध्यी
येति· साध्यतावच्छेदकावच्छिन्नीयेत्यर्थः। अनंतर जत्वादिकं अव्यवहितोत्तरत्वादिसंबंधेनान्वयव्याप्तिज्ञानादिविशिष्टत्वं। प्रमाणसत्वे अर्थसमाजग्रस्तस्या
पि कार्यतावच्छेदकत्वोपगमादाह· अन्वयव्याप्तेरपीति· अपिना व्यतिरेकव्याप्तिसमुच्चयः। तत्तद्व्यक्तित्वेनैव चेति· सर्वस्यैवक्षणस्यातीतव्याप्तिज्ञानध्वंसाधिकर
णतया तद्ध्वंसानधिकरणत्वघटिताव्यवहितोत्तरत्वस्याप्रसिद्धात् तत्तद्व्यक्तित्वेन तत्र व्याप्तिज्ञाननिवेशस्यावश्यकत्वे तस्यैव तत्तद्व्यक्तित्वेन हेतुत्वमुचितमि
त्याशयः। अन्वयव्यतिरेकयोः अन्वयव्यतिरेकव्याप्तिज्ञानजन्यानुमित्योः। वैलक्षण्येति· विलक्षणविषयतेत्यर्थः। सत्येवेति· वैलक्षण्यसत्वे तस्यैव कार्यताव
च्छेदकत्वेन व्यभिचाराप्रसक्तेरिति भावः। नियामकाभावेपीति· अपिनान्व यव्याप्तेरपीत्यादिपूर्वमतास्वरससमुच्चयः नवीनमतानां तत्तद्स्वरसदुष्टत्वे व्यभिचा
रनिरासोपायः कइति वाच्यं अन्वयव्याप्तिज्ञानस्यानुमितित्वं व्यतिरेकव्याप्तिज्ञानस्यार्थापत्तित्वं जन्यतावच्छेदकमिति दीधितिकृतोऽभिप्रायादिति दिक्॥ इतिमहा

श्लो० ५००० .

भ. टी.

८२

देवविरचितसर्वोपकारिण्यां भवानंदीव्याख्यायां व्यतिरेकिग्रंथव्याख्या ॥ ॥ अनुमानं स्वार्थपरार्थभेदेन द्विविधं तत्र स्वार्थानुमानं निरूप्य परार्थानुमानं
निरूपयति मूले तत्रानुमानं परार्थमिति अनुमाननिष्ठस्वार्थपरार्थत्वे स्वार्थपरार्थानुमितिकरणत्वे अनुमितिनिष्ठं स्वार्थत्वं चानुमितित्वव्याप्यो जाति
विशेषः तथाहि स्वार्थानुमितित्वं च प्रामाण्यज्ञानानास्कंदितपरामर्शत्वेन जनकता परार्थानुमितौ च न तेन रूपेण जनकता वाक्यप्रयोज्यत्वेनाप्रामाण्य
ज्ञानास्कंदितादपि न्यायप्रयोज्यपरामर्शात्तादृशानुमित्युत्पत्तेः किंतु न्यायप्रयोज्यविजातीयपरामर्शत्वेन एवं च स्वार्थपरार्थानुमित्योर्विभिन्नसामग्रीप्रयो
ज्यत्वेन तादृशसामग्रीप्रयोज्यतावच्छेदकजातिद्वयस्यावश्यकत्वमिति दिक् । मूलोक्तानुमितिचरमकारणेत्यादिन्यायलक्षणस्याग्रे तत्रेत्यादिना दूष्य
त्वात्स्वयं लक्षणांतरमाह दीधितिकृत् उचितेत्यादि । व्याख्यायां व्युत्क्रमेणेति धूमात्सर्वतो वह्निमानित्यादिरीत्येत्यर्थः । न त्वानुपूर्वीनिष्ठमुचितत्वं कथकसंप्र
दायसिद्धत्वं तच्च प्रतिज्ञोत्तरहेतुर्हेतूत्तरमुदाहरणमित्यादिरीत्या वाच्यं एवं च घटमानयेत्यादिवाक्यवारकविशेष्यदलवैयर्थ्यमत आह तत्त्वं चेति उचितत्वं चे
त्यर्थः । कथकसंप्रदायाविरुद्धत्वमिति कथकसंप्रदायसिद्धत्वस्य तत्त्वे उचितानुपूर्वीकत्वस्य प्रतिज्ञोत्तरहेतूत्तरोदाहरणोत्तरोपनयनोत्तरनिगमनत्व
पर्यवसानेन तस्य निगममात्रनिष्ठतया ऽसंभवापत्तेरिति भावः । इत्यादीति आदिना विभिन्नपुरुषीयप्रतिज्ञादेः एकदिने प्रतिज्ञादिनांतरे हेत्वादिकमित्या
देः परिग्रहः । तादृशेति कथकसंप्रदायेत्यर्थः तथा चोचितानुपूर्वीकत्वं व्युत्क्रमाद्युक्ततत्तदानुपूर्व्यवच्छिन्नभेदकूटवत्त्वरूपमिति भावः । तदर्थश्चेति अत्र तद
विशेषणदलसहितविशेष्यदलपरामर्शः अन्यथा प्रतिज्ञानंतरमित्यादिविशेष्यदलमात्रार्थत्वे व्युत्क्रमोक्तस्थलस्य तेनैव वारणे विशेषणदलवैयर्थ्यापत्तेः व
स्तुतस्तु विशेष्यदलमात्रपरामर्शेपि न क्षतिः व्युत्क्रमोक्तस्थलस्य तेन वारणेपि पूर्वोक्तविभिन्नपुरुषीयप्रतिज्ञादिस्थलवारणाय विशेषणदलसार्थक्यादिति
इत्यादीति आदिना उदाहरणानंतरमुपनय इत्यादिपरिग्रहः तथा च विलक्षणविशिष्टविषयताश्रयत्वं तदर्थ इत्याशयः अन्यथा रीते दुर्वचत्वादसंगत्यापत्ते
रितिध्येयं । एतावन्मात्रेति उचितानुपूर्वीकप्रतिज्ञादिसमुदायत्वमात्रेत्यर्थः मात्रपदेन पंचकव्यवच्छेदः । उचितानुपूर्वीको यः प्रतिज्ञादिपंचकसमुदायस्तत्त्वमि

168

नद

तिविग्रहे पंचकसमुदायस्यैकत्वादिप्रत्येकसमुदायानतिरिक्तत्वेनोक्तदोषतादवस्थ्यमत आह। उचितानुपूर्वीकाणीत्यादि। नन्वे
वमप्युक्तदोषतादवस्थ्यमेव तादृशपंचकसमुदायत्वस्यैकत्वादिसमुदायेपि स्वरूपसंबंधेन सत्वादत आह न्यायत्वस्येतिप
र्याप्तिमितिनयाच पंचपर्याप्तसमुदायत्वलाभाय समुदायपदं तेन तादृशप्रतिज्ञादिपंचपर्याप्तसमुदायत्वं न्यायत्वस्मरणमतो
नोक्तदोषइतिभावः। ननु श्रोत्रियसैकपाककसंप्रदायादिसंभवमिति। नयुक्तं न्यायाभिज्ञस्य कथकतयाऽन्योन्याश्रयात्। किंतु प्रति
लोमरंहेतुस्तदनंतरमुदाहरणमित्यादिघटितानुपूर्वीविशेषत्वं। मीमांसकमते उदाहरणांतस्त्र्यवयवको न्यायः बौद्धनये उदा
हरणोपनयरूपद्व्यवयवकः प्राचीननैयायिकनये द्व्यावयवकः तदुदाहरणाय पंचकेति समुदायपदं पंचत्वस्य पर्याप्तिस्वव
नायप्रतिज्ञादिनिस्वरूपकथनेन न्यायोक्तानुपूर्वीविशेषावच्छिन्नत्वे सति प्रतिज्ञादिपंचत्वपर्याप्त्यधिकरणत्वं फलितमिति त
दसत्। वादकथाभिज्ञस्य कथकतयाऽन्योन्याश्रयाभावात्। किंलिंगादिकमप्यसत्घटितत्वस्य दुर्वचत्वात्तद्भिन्नतद्विषयकप्रती
त्यविषयत्वं प्रत्येकं प्रतिज्ञाद्यानुपूर्व्यास्तद्विषयकप्रतीतिविषयत्वेन विशिष्टानुपूर्वीविशेषस्य तद्विषयकप्रतीत्यविषय
त्वानुपपत्तेः विशेष्यवत्तेविशिष्टाभावाद्यनभ्युपगमात् नद्वेतदभिप्रेत्याह। ध्येयमिति। इत्थं च प्रतिज्ञात्वादेर्न्यायत्वाघटितत्वे

169

टी०

१

चतुरासीनेनेति विचारातिरिक्तस्थलीयेत्यर्थः तादृशवाक्यं पर्वतोवन्हिमानित्यादिवाक्यपंचकंघटितइतिन्यायइति शेषः अव्याप्तिरिति
नत्रसाध्यादिबोधकवन्ह्यादिशब्दावच्छिन्नत्वाभावादितिभावः। तादृशेति पर्वतोद्रव्यवानित्यादृशेत्यर्थः। अनुवादत्वेनेति निगमनस्य
त्यादिः तत्र छन्दैः पक्षे हेतुसंबंधेन प्रतीयादितस्य साध्यस्य पुनस्तेशे वशाब्दैः पक्षे हेतुसंबंधेन साध्यप्रतिपादनस्य प्रयोज्यत्वे
नानुवादत्वनिष्क्रयस्य साध्ये बाधि तत्वज्ञानोपयिकस्य निगमने सर्वसिद्धत्वादितिभावः। तत्र छन्दविशेषेति प्रतिज्ञादिस्थसा
ध्यादिबोधकशब्दविशेषेत्यर्थः पूर्वोक्तांतन्याचायमित्याद्युपनयघटितेन्यायेः व्याप्तिं निरस्यति नचैवमिति अप्रसाधकत्वेनेति अयं हेतु
रसाधकः। व्यभिचारित्वादित्यादीत्यर्थः। उदाहरणेति वैयर्थ्येनेत्यादि चतुरवयवस्यैवेति तथाच तत्र चतुष्कघटितमेवन्यायत्वं
निर्वाच्यमितिभावः। यत्तु एवंसति तत्रैव समयबंधादिना यत्र पंचावयववाक्यप्रयोगस्तत्राव्याप्तिः अतिव्याप्तिश्चतत्र चतुष्कघटिते
हृषयोर्न्यादनंतहृसत। तथासति पर्वतोवन्हिमानित्यादौ यत्र समयबंधादिनाद्यवयवप्रयोगस्तत्राव्याप्तिस्तत्रसपंचत्वातिव्या
प्तेश्चप्रसंगात्। न च तादृशसमयबंधस्यासांप्रदायिकत्वान्नदोषइति वाच्यं प्रकृतेपि तुल्यत्वात्। केचित्तु चिंतामणिकारमते स्वकर्तव्य
निर्वाहायासाधकतास्थलीयन्यायेपि उदाहरणप्रयोगस्यावश्यकतया तत्रापि पंचावयवस्यैवन्यायत्वं अत एवानुक्तोदाहरणास्थले

170

गम०

पितादृशयोरप्यन्वयानाकांक्षयेतीति हेतुत्वतीयत्व स्फुटार्थीधितिरपि संगतइत्याहुः अन्वयसंभवेपीति एकत्रद्वयमितिन्यायेनेत्या
दि इतिन्यायेनेति इत्यादिकन्यायेनेत्यर्थः। तादृशान्वयस्यानुगुणानां स्वपरार्थत्वादृसंबंधः समत्वात्स्यादित्ति उद्देश्यविधेययोरिति उद्दे
श्यपयोर्विधेययोश्चेत्यर्थः मतोद्देश्यपयोः परस्परमनन्वयोन तादृशान्वयत्वम्प्रइति वाच्यं परार्थत्वबीजस्याभ्येन तत्रापि तादृशान्वय
नास्यतीति। अन्तोद्देश्यपयोरितिवस्तुस्थितिमनुरुध्योक्तं मत्कृते चविधेययोरित्येव विवक्षितमिति ध्येयं। यद्वा उद्देश्यविधेययोरिति उद्दे
श्ये विधेययोरित्यर्थः॥ उद्देश्यइति स्वरूपकथनं। विशिष्येकेति भूतुवन्हित्वावच्छिन्नतज्ज्ञानत्वाद्यवच्छिन्नत्वा वाच्छिन्नयोरवच्छेद्या
वच्छेदकभावापन्नविषयितारूपसंबंधाभावेन विधेयभेदवाक्यभेदस्य सर्वसिद्धत्वेनचैकवाक्यत्वासंभवादिति भावः। अन्वयबो
धोस्त्विति नचोद्देश्यतावच्छेदकवन्हेरेवात्र विधेयत्वेन कथं युक्तान्वयबोधसंभव इतिवाच्यं। इदंवानरकहंडवानित्यादाविवप्रकृ
ते विधेयांशे तज्ज्ञानत्वाद्यात्मरूपाधिकावगाहिनोन्वयबोधस्य संभवात्। तादृशबोधे। वन्हिमत्पर्वतोद्देश्यकबोधे। आनुपूर्व्यवच्छि
न्नेति इदंवोद्देश्यवाचकपदेनान्वितं। नयामकस्वादितिनीलोघटः सुंदरइत्यादाविवघटोनीलः सुंदरइत्यादेर्नीलाभिन्नघटोद्देश्य
कबोधानुदयेनोद्देश्यतावच्छेदकवाचकपदस्योद्देश्यपदपूर्ववर्तित्वस्यापेक्षणादिति भावः। आनुपूर्व्या एवेति एककारेणवन्हिमा

२

टी०

न्पर्वत इत्याद्यानुपूर्व्यविच्छेदः। इहापीति प्रतिज्ञास्थलेपीत्यर्थः चरमश्रुतस्यापि वह्निमत्पदस्य योजनया पूर्वप्रतिसंधानेन वह्नि-
मत्पर्वतोद्देश्यकनिगमनार्थशाब्दबोध इति शेषः तत्र उपनये। अत्र च। प्रतिज्ञास्थले च तादृशतात्पर्याभावादिति नन्वत्रापि वह्नि-
मत्पर्वतोद्देश्यकनिगमनार्थविधेयकशाब्दबोधरूपफलानुरोधेन तादृशतात्पर्यकल्पनात्तादृशतात्पर्याभावोऽसिद्ध एवेति चेन्मै-
वं तथा सति प्रतिज्ञाजन्यस्य पर्वतोद्देश्यकवह्निविधेयकबोधस्यैवानुपपत्तिः तत्र पर्वतो वह्निमानित्यनुसंधानेनैवानुपूर्वीभिदा प्र-
तिज्ञाद्वयापत्तिः अत एव निगमनेऽयं पदस्यानुषंगपक्ष एव समंजसः अतोऽनुषंगपक्षे एकवाक्यतया वह्निव्याप्यधूमवत्पर्वतो-
द्देश्यकबोधानुरोधेन केवलोपनयजन्यपर्वतोद्देश्यकतादृशहेतुमत्ताबोधानुरोधेन चानुपूर्वीभेदेन उपनयद्वयापत्तेः आसत्त्य-
भावेनापीति अपिना पूर्वोक्तनिराकांक्षत्वप्रयोजकानुपूर्वीविशेषविरहस्य समुच्चयः। अत एव। आसत्त्यभावसूचनार्थमेव वाक्या-
नुसंधाने चेतितयावता सत्त्यभाव इत्याशयः। मूलार्थः। प्रतिज्ञादिपंचवाक्येत्यादि मूलार्थः एवमग्रेपि। तत्रापि अव्यवहितोत्तै-
कवाक्यत्वेपि। लक्षरायेति धूमव्यापकवह्न्यादिविशिष्टधूमाद्वह्निमान्पर्वत इत्यानुपूर्व्यवच्छिन्नैवंविधपदानुसंधानस्येति पाठः एवंवि-
धेति उद्देश्यबोधकेत्यर्थः हेतुत्वादिति पूर्वोपरस्थितिरीत्योद्देश्यतावच्छेदकबोधकपदस्योद्देश्यबोधकपदपूर्ववर्त्तित्वस्यापेक्षितत्वा-

172

राम०

द्वि२

दितिभावः। अन्वयेति चकारस्याश्रवणादित्यनेनेतरं योजनया श्रवणाद्वेति लाभः। चैत्रः परमः सुंदर इत्यादाविव चैत्रः सुंदरः परम इत्या
दौ परमसौंदर्यविधेयकबोधानुदयेन विधेयतावच्छेदकबोधकपदस्य विधेयबोधकपदपूर्ववर्तित्वस्यापेक्षणेन वन्हिमान् धूमवानि 173
त्यानुपूर्व्यवच्छिन्नविधेयपदानुसंधानस्य तादृशबोधे हेतुत्वादिति भावः। ननु फलानुरोधाद्योजनया तत्तदानुपूर्व्यवच्छिन्नतत्तत्पदानु
संधानस्य कल्पनान्नोक्तदोष इत्युक्तेत्वाह। किंचेति। अर्थविवक्षयेति संभवन्त्यर्थसाधुत्वेनासंयोगाहकतया पयोगस्यानौचित्यादि
तिभावः कथमन्यनेति यस्य न स्वजने प्रीतिः कुतस्तस्य परजने इतिन्यायादिति भावः। अत एव। उदाहरणस्यैकवाक्यत्वाभावादे
वद्वयर्थान्तरमाह। तादृशेति तदभावेनापीतिरूपिणोदाहरणे एकवाक्यत्वाभावस्य समुच्चयः। असंभवाद्वेति तादृशबोधस्येति
विभक्तिविपरिणामेनानुषज्यते। आधिकमुक्तं परामर्शयितुं यो न्यायकौस्तुभे चास्माभिः। एतत्। प्रतिज्ञाहेत्वोरेकवाक्यत्वं। अनन्वया
दिति। तथा च धूमत्वानतात्पर्यत्वेन पर्वते वन्हिविधेयतावच्छेदकं किंतु लाघवत्तानाधीनानुमितौ महानसीयत्वादिवद्भासत इति भावः
तथान्वयबोध एवेति धूमत्वानतात्पर्यत्वविधेयतावच्छेदकताकवन्हिविधेयकबोध एवेत्यर्थः। तादृशपदेति उक्तानुपूर्व्यवच्छिन्न
पदेत्यर्थः हेतुत्वादिति विधेयतावच्छेदकबोधकपदस्यैव विधेयबोधकपदपूर्ववर्तित्वस्यापेक्षणादिति भावः। अत एव धूमादित्यस्य

टी०

विधेयतावच्छेदकतयानन्वयादेवानन्वेमपि धूमत्वानवच्छिन्नव्याप्यत्वस्य विधेयवन्हिविधेयवन्हिविधेयतयान्वयेन वन्हिद्वारा परंपरया पर्वतेव
न्हिविधेयतावच्छेदकतयोक्तपदार्थानुसंधानहेतुत्वमावश्यकमत आह तथाचेति। अत्र तथा च तस्य विशेषणतान्तरितविधेयतावच्छेदकत्व
मिति पाठे तदर्थः धूमव्यापकवन्हेरपि वन्ह्यावन्वयबोधसंभवादिति सर्वमाकुलमित्यादिकं बोध्यमिति पाठः तथाचेमस्य धूमत्वानवच्छिन्नव्याप्य
त्वस्य वन्ह्यावन्वये बोध्य इत्यर्थः तस्य धूमत्वानवच्छिन्नव्याप्यत्वस्य विशेषणतान्तरितेति वन्हेरपि विशेषणताघटकेत्यर्थः। परंपरयेति यावत्। इति परि
तिः इति तत्राप्युक्तपदार्थानुसंधानं यद्यपेक्षितमित्यर्थः तदेति उदाहरणघटकवन्हिपदार्थस्येति शेषः वन्हौ प्रतीता घटकवन्हिपदा
र्थविधेयवन्हौ अन्वयबोधसंभवादिति कुत इत्याकांक्षायामाह धूमत्वानवच्छिन्नव्याप्यत्वस्यैवकपमस्यागमकत्वमित्याकांक्षायामाह धूमव्या
पकवन्हेरपि तत्रान्वयस्योचितत्वादुदाहरणानामिति न्यायस्याप्याकांक्षाविरहमूलकत्वादिति भावः। सर्वमाकुलमिति अयमाशयः परि
परंपरयाविधेयतावच्छेदकस्यान्वयेपि तद्बोधकपदस्य विधेयबोधकपदपूर्ववर्त्तित्वाये द्वारतो न यपर्वतो धूमत्वानवच्छिन्नव्याप्यवन्हिमानिति बो
धे धूमाद्वन्हिमानित्यानुपूर्व्यवच्छिन्नपदानुसंधानस्य हेतुतया तदभावेन प्रतीता हेत्वोर्नैकत्वावाच्यत्वमित्युक्तेन तदा धूमव्यापकवन्हेरपि प
रंपरया विधेयतावच्छेदकत्वेन तद्बोधकोदाहरणघटकवन्हिपदस्य विधेयबोधकप्रतिज्ञास्थवन्हिबोधकवन्हिपदपूर्ववर्त्तित्वस्यापेक्षणा

राम०

पक्षापर्वतरूपादावभिन्नधूमव्यापकवह्निमद्वह्निमानिति बोधे पर्वतो यो यो धूमवान् स वह्निमान् वह्निमानित्यानुपूर्व्यवच्छिन्नपदानुसंधान
रूपहेतुत्वावच्छेदकतया तदभावेनोच्चरितत्वावच्छिन्नत्वात्तद्बोधो न स्यादिति साक्षात्प्रतिबन्धे यत्तावच्छेदकतयान्वयबोध एव तत्तदानुपूर्व्यवच्छि
न्नपदानुसंधानस्य हेतुत्वमुपेयमिति प्रतिज्ञाहेत्वोरेकवाक्यत्वे बाधकाभावः। इदं च हेत्वापदजन्यपदार्थोपस्थितिरेवासत्तिरित्याश
येन अन्यथासत्त्वभावेन धूमव्यापकवह्नेर्वह्न्यायन्वयासंभवादसंगत्यापत्तेरिति। नन्वेवमुदाहरणावयवांतरयोस्तु न संभवेत्स्या
दिह्यादिति विरोधः इत्यत आह इत्याहिकमिति उदाहरणांतु न केनापीति प्राचीनप्रवादमात्रानुरोधेनायातत्तः तत्पूर्वमुक्तं निर्भ
रस्तत्रैवेतिभावः। वस्तुतस्तु कुमइत्याकांक्षावशादिह्यमवह्निः किंज्ञानज्ञाप्यइत्याकांक्षावशादित्यपर्थः। वह्नित्वावच्छिन्नेनन्वयादिति
न यथाचाकांक्षाविरहाद्धूमज्ञानज्ञाप्यत्वस्य विधेयतावच्छेदकतया न पर्वतेन्वय इति भावः। नन्वाकांक्षावशादुद्देशविशेषणतान
यातदन्वये पर्वतेतद्द्वाराविधेयतावच्छेदकतया तस्याकांक्षाविरहे ऽप्यन्वये बाधकाभाव इत्यत आह तथा चेति। विशेषणतांतरि
तेति आकांक्षाविरहे ऽपि विशेषणताद्वाराविधेयतावच्छेदकतया पर्वते तस्यान्वयबोध इत्यर्थः इति यदीति मुच्यत इति शेषः। वह्नौ उ
पनयप्रतिज्ञाघटकाभ्यां वह्निपदार्थे वह्नौ। अन्वयबोधसंभवात्। अन्वयबोधापत्तेः आकांक्षाविरहस्याविशिष्टत्वादिति

175

४

प्रि॰

दी॰ ५०

भावः । नन्वत्रैवापत्तिरत आह सर्वमाकुलमिति तथा सति उदाहरणां तु न केनापीति सिद्धांतस्य गुणामिनोऽन्यापादिव्यापकस्य च भंगप्रसंगाद्
ति भावः । नन्वेवं कुत इति साध्यव्यापकाकांक्षापानन्तिवर्तकहेतुवाक्यप्रयोगे यावद्वह्नित्वावच्छिन्नस्यैव विशेषणतया धूमज्ञानज्ञाप्यत्वस्या 176
न्वयबोधोऽस्तु आकांक्षाविरहे तु पर्वतो धूमज्ञानज्ञाप्यत्वविशिष्टवह्निवैशिष्ट्यावगाहिबोधस्तु न संभवतीति प्रतिज्ञाहेत्वोरेकवाक्यता
नुपपत्तिरेवेत्यत आह इत्यादिकमिति पर्वतो वह्निव्यापकाकांक्षायामेव हेतुवाक्यप्रयोगेण वह्नावेव तदन्वये न तादृशाकांक्षानिवृत्तिसंभ
वेन पर्वतो धूमज्ञानज्ञाप्यवह्निमानिति विशिष्टवैशिष्ट्यबोधस्यैवाकांक्षितत्वेन तादृशबोधपरत्वादिति हि कु॰ वह्नित्वरूपेण वह्नित्वरू
पेणैव एवकारेण धूमज्ञानज्ञाप्यत्वव्यवच्छेदः अर्थान्तरत्वादीति तदुक्तेर्धूमज्ञानज्ञाप्यत्वरूपेण वह्निमत्त्वमसिद्धिपादकत्वादिति भावः ।
इत्युक्तमिति । अत इति शेषः योजनयापीति अपिरेवधारणार्थे तादृशोऽपि पर्वतो धूमज्ञानज्ञाप्यवह्निमानित्याकारकेऽसपर्यवसः इत्यनुक्तिरिति उक्त
रीत्या योजनां विनैव निर्वाहितत्वानुसरणात्केवलान्निरपर्यकः योजनानुसरणे पूर्वोपदर्शितरीत्यानुपूर्वमिदं नित्यापत्तिरिति स्वरसः ।
अन्वय इति प्रतिज्ञाहेत्वोरित्यस्येत्यादिः अननुषंगपक्षे आकांक्षासत्त्वेनान्वयबोधसंभवमाह तत्रेति तादृशेति धूमज्ञानज्ञाप्यत्वस राम॰
र्पः । न चेति अननुषंगपक्षेपीति शेषः । तदुक्तेर्जिवह्नित्वव्याप्यधूमज्ञानज्ञाप्यत्वसर्पः । एवमग्रेऽपि पर्वतत्वं तन्मात्रं न हि शेषतां वह्नि

भानस्थले दंडवान्नरः दंडवानितिवदन्वयबोधांगीकर्त्रापि उद्देश्यतावच्छेदककोटावधिकम्

व्याप्यधूमज्ञानजन्यव्याप्यवन्हिमत्वरूपं विशेषणं पूर्वरीत्यैव विधेयतावच्छेदकतयाऽन्वितमेव वाच्यमिति तन्न याच विधेयतावच्छेदकतया
नदन्वयएवोक्तानुपूर्वीज्ञानस्य हेतुर्न यानदभावेपिनोक्तबोधानुपपत्तिरिति भावः तत्र पर्वतत्वस्य उद्देश्यतेति तन्न याच विधेयतावच्छे
दककोट्यावधिकं भानेरक्तदंडवान् दंडवानितिवदन्वयबोधानंगीकारेणोक्तरीत्यापि न निर्वाह इति भावः। एतेन नतु तदन्व
यबोधजनकत्वं तदानुपूर्वीविरहेणावन्हिमतीति पर्वत इति शेषः। तादृशोदाहरणोति धूमव्यापकवन्हिमद्धूमवद्भिन्नधूमज्ञा
नजन्यव्याप्यवन्हिमति पर्वत इत्यर्थः। उपनयार्थस्य वन्हिव्याप्यधूमवत् पर्वतस्येत्यर्थः। तादृशोपनये इति वन्हिव्याप्यधूमवत्पर्व
ताभिन्नधूमव्यापकवन्हिमद्धूमवद्भिन्नधूमज्ञानजन्यव्याप्यवन्हिमत्पर्वत इत्यर्थः। निगमनार्थस्य वन्हिव्याप्यधूमज्ञानजन्यव्याप्यवन्हि
मत इत्यर्थः। अनादेयमिति प्रथमबोधे धूमाद्वन्हिमान्पर्वतः यो यो धूमवान्सोग्निमान् इत्यानुपूर्व्या द्वितीये यो यो धूमवान्सोग्नि
मान् धूमाद्वन्हिमान्पर्वतो वन्हिव्याप्यधूमवानयमित्यानुपूर्व्या तृतीये वन्हिव्याप्यधूमवान् यो यो धूमवान्सोग्निमान् धूमाद्व
न्हिमान्पर्वतस्तस्माद्वन्हिमानित्यानुपूर्व्या हेतुतया तद्विरहे एतादृशोदाहरणो वन्हिमत्पदस्य धूमवत्पदपूर्वत्वविरहेणाकांक्षारीत्यान्वय
बोधासंभवादिति भावः॥ इयरांतरमाह चैत्रः पचतीत्यादाविति व्यतिरेकमुदाहरणोति पृथिवीतरेभ्यो भिद्यत इत्यादौ इत्यर्थः। अ

176

टी॰ 5

संभवमिति। उक्तरीत्या तन्नद्दानुपूर्वशविरहेण वक्ष्यमाणानुपपत्त्याश्चेत्यर्थः। अ०

संभवात् उक्तरीत्या पंचानामवयवानामेकवाक्यतयान्वयासंभवात् तामेवानुपपत्तिमाह आख्यातार्थोद्देश्यतावच्छेदकनयेनेति आ
ख्यातार्थस्योद्देश्यतावच्छेदकनयेत्यर्थः। तर्हि पंचानामवयवानामेकवाक्यतयान्वयबोधकत्वाभावे। विशिष्टैकार्थप्रतिपादकत्वेति
विशिष्टैकार्थबोधजनकत्वेत्यर्थः। तात्पर्यकत्वमिति तादृशविशिष्टार्थबोधेच्छाप्रयोज्यत्वमित्यर्थः। आद्यैवेति एवकारेण तादृश
बोधजनकत्वव्यवच्छेदः। तथा व्यवहारः पंचानामवयवानामेकवाक्यताव्यवहारः। न त्वावता तादृशबोधो मानसउदीच्यएव तत्परत्वं चेह
धूमवत्त्वाहिवाक्यस्य वह्न्याद्यनुमितिपरत्वं तन्मात्रप्रयोजकाकांक्षोत्थापकतया बोधमिति भावः। चरमेति अनुमितीत्यादि। ननूपनये
नैवं व्याप्तिपक्षधर्मतयोः प्रदर्शितमाकुदाहरणस्य न व्याप्तिप्रदर्शकत्वमत आह उपनयेनेति तदभिप्रायेणेति वस्तुत उपनयस्य
वक्तव्यमित्याशयः। तथा च उदाहरणोपनययोरेव तादृशपरामर्शप्रयोजकत्वपर्यवसाने च तादृशोतिपंचावयवेत्यर्थः। परा
मर्शविषयाबाधितत्वेतिप्राचां परार्थानुमितिजनकस्यान्यायप्रयोज्यपरामर्शस्य न्यायबोधितव्याप्तिपक्षधर्मत्वाबाधितत्वासत्प्र
तिपक्षितत्वविशिष्टलिंगविषयकत्वमित्यभिप्रायः। तथात्वे परामर्शविषययदार्थस्य यानुकूल्यं तन्नैवं प्रतिज्ञाहेत्वोर्नतदा
नुकूल्यं संभवतीति तयोः परामर्शविषयानुपस्थापकत्वादत आह आनुकूल्यं चेति तथात्वं तदानुकूल्यं। अवयवेति प्रतिज्ञाद्यवय

ना४

178

रामं०

वेत्यर्थः। द्वितीये त्वा एतेनेत्यादिमूलं द्वितीये त्वा। तस्यापि अवयवस्यापि। इदं च सत्संतं च उदासीनेनेति। न्यायानंतर्गतप्रतिज्ञादिसमाना
नुपूर्वीकेत्यर्थः। एतावन्मात्रं च सत्यंतमात्रं च। लक्षणं। न्यायांतर्गतानुमितिसमूहानतिरिक्तविषयकशाब्दज्ञानजनकवाक्यादि
रूपप्रतिज्ञाद्यन्यतमत्वरूपं तादृशेति रूढलक्षणाक्रांतेत्यर्थः। इदं चैकदेशविशेषणं प्रतिज्ञैकदेश इत्यत्र। प्रतिज्ञाद्येकदेशेत्यर्थः।
अतिव्याप्तिरिति केवलविशेष्यविशिष्टभेदस्याव्याप्तिपूर्वपक्षग्रंथोक्तरीत्याप्रत्येकवृत्तिधर्मावच्छेदेनाप्रसक्तत्वाद्वृत्तिधर्मावच्छिन्नभे
दस्य चानभ्युपगमेन प्रतियोगितावच्छेदकेन सह भेदस्य विरोधेन न्यायांतर्गतत्वघटिततादृशप्रतिज्ञात्वादिरूपप्रतियोगितावा
च्छेद [illegible] कादिकरणे प्रतिज्ञाद्येकदेशे प्रतिज्ञात्वाद्यवच्छिन्नभेदासत्वेन प्रति [illegible]
ज्ञाद्यन्यतमत्वसत्वादिति भावः। न्यायावयवत्वेति अवयवाघटकन्यायांतर्गतत्वेत्यर्थः। न्यायाव प्रतिज्ञाद्येकदेशे तदसत्वेन नोक्तरी
त्यातिव्याप्तिरिति भावः। अन्योन्याश्रयादिति अवयवलक्षणे अवयवत्वघटितप्रतिज्ञात्वादिप्रवेशादिति भावः। ननु तथैव ममापि वक्ष्य
माणप्रति ज्ञाद्यन्यतमत्वं नैकदेशे इत्यत आह एवमिति। सर्वत्रैव प्रतिज्ञादिपंचस्वेव। तादृशेति न्यायांतर्गतत्वेत्यर्थः। वस्तुतस्तु
तादृशप्रतिज्ञैकदेशे इति न्यायावयवतो वह्निमानित्यादिप्रतिज्ञाद्यंतर्गतपर्वतादिसाधकदेशमात्रे इति व्याप्यभावेपि निरुक्तलक्ष

घ॰ 6

रणात्क्रान्तेस्मरहृदोद्रव्यमित्यादिप्रतिज्ञैकदेशो हृदोद्रव्यमित्यादावतिव्याप्तिर्दुर्वारेति भावः। ननु तत्रव ह्यमाणरीत्यानाप्ति प्रसंग इत्य

त आह एवमितिशेषं पूर्ववत्। परमार्थतस्तु प्रतिज्ञात्वादिकमेवेति। एवकारेण प्रतिज्ञाघंस्पतमत्वव्यवच्छेदः। अतिव्याप्तेरिति

। तत्रापि प्रतिज्ञात्वस्य सत्वादिति भावः। न्यायावयवत्वघटितेति। तद्घटकसत्संतविशिष्टस्यार्थः। प्रतिज्ञादिति। प्रतिज्ञात्वादीत्यर्थः।

अन्योन्याश्रयादिति। अवयवत्वस्यो अवयवत्वघटितसत्संतनिवेशादिति भावः। ननु तथापि सत्संतस्यस्वातंत्र्येण निवेशो व्य

र्थः प्रतिज्ञाघंस्पतमत्वघटकप्रतिज्ञादावेव तन्निवेशो विरुपाद इत्यत आह। एवमिति। गौरवादिति। सत्संतस्यस्वातंत्र्येणानिवेशः

कृत इति शेष इति दिक्। अत्र केवलविशेष्यद्वव केवलविशेषणावस्थापि विशिष्टभेदो नोपेयत इति मतेनातिव्याप्तिरुक्ता तद्रूपग

मे अतिव्याप्तेरभावादाह एवमितीति यथाश्रुतमेव सम्यगीत्यपि प्रतिभाति। अपरे तु न्यासत्वाघमोन्याश्रयादित्यंत एकोग्रं

थ्यः। तथा चातिव्याप्तिवारणाय प्रतिज्ञात्वादिघटकन्यायांतर्गतत्वस्य न्यायावयवत्वरूपत्वे अन्योन्याश्रय इति भावः। ननु न्यासत्व

वृत्ति प्रतिज्ञात्वादिघटितान्यतमत्वनिवेशेन तद्घटकन्यायांतर्गतत्वं यथाश्रुतमेवेति नान्योन्याश्रय इत्यत आह एवमितीति प्राहुः।

। ।। अव्यासज्यवृत्तित्वेति निर्विघते व्यासज्यवृत्तित्वं यस्य तादृशसंबंधेन पर्याप्त्यतिरिक्तस्वरूपसंबंधेनेति यावत् तेन नकाल्प

186

रम॰

कादिसंबंधमादाय दोषः न्यायत्वस्य पर्याप्तिनिरिक्तस्वरूपसंबंधानभ्युपगमेन्वाह न्यायत्वप्रकारकेति भ्रममादायातिप्रसंगवा

रणाय प्रमेति प्रमात्वनिवेशे गौरवादाह न्यायत्वविशिष्टेति। ननु प्रतिज्ञादिसमानानुपूर्वीकोदासीनवाक्येन सह न्यायस्यानियत

समूहालंबनमादाय तत्र्या[illegible]विधोदासीनेति प्रसंगस्तत आह। नियतेति। नास्त्येवेति मानाभावादिति भावः। न्यायविषयतेति वि

हाय न्यायत्वविशिष्टनिरूपितविषयितोपादाने बीजमाह नचेति। यत्किंचिदिति। न्यायनिरूपितेति। त्याहि। अतिव्याप्तिरिति उदासीनवा

काविषयिताया अपि सर्वांशे प्रमेयवानित्यादिज्ञानविषयितामादाय तादृशव्यापकताश्रयत्वादिति भावः। असंभवइतिक

स्याप्रमितित्वादिविषयिताया न्यायविषयितासामान्यव्यापकत्वासंभवादिति भावः। तदेवोपपादयति प्रतिज्ञादीनामिति। अ

तिव्याप्तिरिति पर्वतो वह्निमानित्यादिवाक्यात्मकतादृशरूपावच्छिन्नत्वस्य तत्र सत्वादिति भावः। अव्यासज्यवृत्तित्वे अनुमित्यनु

नानतिरिक्तविषयकशाब्दज्ञानजनकत्वरूपत्वे। अतिव्याप्तिरिति तस्यापि तादृशजनकत्वाक्रांतत्वादिति भावः। व्यासज्यवृत्तित्वे च

तादृशशाब्दज्ञानजनकसमुदायत्वरूपत्वे वा असंभवइति प्रत्येकं समुदायभेदेपि समुदाये प्रत्येकभेदाभावादिति भावः। व्यास

ज्यवृत्तीति व्यासज्यवृत्तिधर्मावच्छिन्नेसर्थः। एवमग्रेपि। अत एव उक्तभेदाभ्युपगमादेव। भेदसत्वादिति नचतादृशभेदाधिकर

दी॰ ७

करणतावच्छेदकप्रतिज्ञाहेतुसमुदायत्वावच्छिन्नभेदाधिकरणतावच्छेदकप्रतिज्ञात्वाद्यवच्छिन्नत्वादिति व्याप्तिरस्त्येवेति वाच्यं भेदा
धिकरणतावच्छेदकावच्छिन्नत्वस्य तादृशावच्छेदकतापर्याप्त्यवच्छेदकावच्छिन्नपर्याप्तिमत्त्वरूपस्य विवक्षितत्वात्। भेदानभ्युपग
मे त्विति तु शब्दोऽस्वरसे स च उक्तप्रतीत्यनुरोधेन तादृशभेदस्य विषयकत्वमिति प्रत्येकवृत्तिधर्मावच्छेदेन व्यासज्यवृत्तिधर्मावच्छि
न्नभेदानुपगमात् लाघवाच्चाह। वस्तुतस्त्विति प्रतियोगितावच्छेदकपर्याप्त्यधिकरणत्वं तत्पर्याप्त्यवच्छेदकावच्छिन्नपर्याप्तिम
त्त्वं तेन प्रत्येकातिरिक्तसमुदायाभावेन प्रत्येकस्य पर्याप्त्यधिकरणत्वेपि न क्षतिः। अथ प्रतियोगितावच्छेदकत्वपर्याप्त्यधिकरण
त्वमिति पाठः स च पर्याप्त्यधिकरणत्वं पर्याप्त्यधिकरणवत्त्वमित्याशयेन संगमनीयः। अत्र तत्त्वमित्यनंतरं प्रतिज्ञात्वादिकं त्वि
त्येव स्वारसिकः पाठः। तत्त्वमित्यनंतरं च त्यादिसारमित्यंतः पाठः क्वचिद्दृश्यते तत्र तथापीत्यादौ प्रतियोगितावच्छेदकत्वं तद्वदव
च्छेदकत्वे च प्रतियोगितावच्छेदकवत्त्वं तद्वदवच्छेदकवत्त्वं च बोध्यं तेन नासंगतिः। यद्यपि यद्धि प्रतिज्ञात्वसमानाधिकरणत्वे प्रति
ज्ञात्वाद्यवच्छिन्नाधिकरणताकत्वं व्यासज्यवृत्त्यधिकरणताकभेदानभ्युपगमाच्च प्रतिज्ञाद्येकदेशनिरासस्संपन्नं तेन सुवचं तदा
संभवस्तथापि यथाश्रुते तन्न भेदप्रतियोगितावच्छेदकत्वे न न कोपि दोषः। एवं चायं पाठः प्रामादिक एवेत्यन्तानां मरणपरं

182

राम॰

नुपर्याप्तिघटितस्य तस्य प्रतियोगितावच्छेदकेऽनिवेशेनैव निर्वाहे विशेष्यदलवैयर्थ्यमिति न स्वारसिकं इति॥ वस्तुतस्तु सामा
नाधिकरण्यं यावत्त्वघटितं व्यापकत्वपर्यवसितं भेदघिशेषतामिति न कोपि दोष इति स्वारसिकत्वादयं पाठ इति ध्येयं॥ विशेष्य
मित्यस्य प्रतिज्ञाघटकतमत्वमित्यर्थः। व्यासज्यवृत्तीति अनुमितिसमानविषयकशाब्दबोधजनकवाक्यसमुदायत्वरूपमित्यर्थः।
कोपि। प्रतिज्ञाद्येकदेशातिव्याप्तितादवस्थ्यादिरूपः पूर्वोक्तदोषात्। प्रतिज्ञात्वादेर्व्यासज्यवृत्तित्व इत्याद्युक्तदोषात्। यत्तु पूर्वो
क्तलक्षणस्य गुरुतया लाघवात् द्वितीयलक्षणमिति तन्न द्वितीयलक्षणापेक्षया पूर्वोक्तस्यैव लघुत्वात्। यद्यपि स्मरहरो द्व्यं
रमेशो द्व्यं संयोगो गुणः मते गजो नील इत्यादिमतिशैकदेशो हरो द्व्यं मेशो द्व्यं योगो गुणः गजो नील इत्यादावतिव्याप्तेर्द्वि
तीयलक्षणमिति तदपि न प्रतिज्ञालक्षणस्य तत्रातिव्याप्तिवारणाय स्वघटितवाक्यप्रतिपन्नस्वार्थकत्वरूपविशेषणाघ
टितत्वात् तत्र प्रतिज्ञाघटकतमत्वस्यैवाभावात्। केचित्तु प्रकृतानार्थपरवाक्यवारणाय प्रतिज्ञात्वस्य शाब्दबोधे वक्तृतात्पर्याधीनत्व
स्य निविष्टतया व्यासज्यवृत्तितया विधेयतापर्यवसन्नतया लाभेन एकदेशमात्रस्य तादृशार्थपरत्वाभावान्नोक्तस्यातिप्रसंग इत्याहुः। अ
परे तु तस्य प्रकृतानुमित्यन्यूनानतिरिक्तविषयकशाब्दबोधजनकत्वाभावेन प्रतिज्ञात्वावच्छिन्नभेदसत्वेन प्रतिज्ञाघटकतमत्वाभा

वात्तत्रनाप्तिव्याप्तिः तस्यतादृशबोधजनकत्वेनस्यैवप्रतिज्ञात्वौचित्येनप्रतिज्ञात्वस्यैष्टत्वात् । अन्यथास्मरहशेतुव्याप्तिस्मादेः प्रति
ज्ञात्वेऽधिकोन्नादादिति स्यहायत्तेः । परस्यापिव्याप्तिबोधेभानांगीकर्तृमतेनत्राप्तिव्याप्तेरसंभवाच्चेतिप्राहुः । एतेनधूमाद्यालोकवा
न्पर्वतोवन्हिमान्धूमादित्यादिन्यायघटकप्रतिज्ञैकदेशेधूमादित्तिभागेऽतिव्याप्तिः तस्यापिहेतुप्रतिपादकविभक्तिविशिष्टार्थबोधकत्वरूप
हेतुत्वाक्रान्तत्वेनप्रतिज्ञाघटितमलसत्वादितिद्वितीयलक्षणानुसरणेनचतादृशविशिष्टार्थप्रकृतसाध्यान्वितत्वविशेषणात्प्रवे
शोस्तीतिनोक्तातिव्याप्तिरितिवाच्यं । तथापिधूमाद्वन्हिमतः सधर्मापर्वतोवन्हिमान्धूमादितिन्यायघटकप्रतिज्ञैकदेशेधूमादि
त्यादावतिव्याप्तेर्निगमनघटकतस्मादितिभागेऽतिव्याप्तेश्चद्वितीयलक्षणस्यापिसम्पन्नत्वात् । प्रकृतपक्षान्वितसाध्यविषयतानिरू
पितायाप्रकृतहेतुविशिष्टहेतुत्वविशेषणतानतद्वहिर्भूतविषयताशून्यधीजनकवाक्यत्वंपहेतुत्वस्यात्रप्रवेशेनोक्तातिव्या
प्तेरसंभवात् । तादृशविषयताबहिर्भूतव्याप्याद्विविषयताशालिधीजनकत्वेननिगमनघटकतस्मादितिभागस्यानिरासादि
ति । ननुप्रतिज्ञादिघटकत्वंस्वाविषयकप्रतीत्यविषयप्रतिज्ञादिकत्वंतच्चप्रतिज्ञादेरपीत्यसंभवइत्यतआह नहेतुघटकत्वं चेति । स्वस्य
। प्रतिज्ञादेः स्वघटकत्वकारणायस्वघटकत्वमयुक्तासंभववारणायविशेष्यंतद्विषयकेत्यादिरूपं । नचविशेष्येनैवैकदेशाति राम०

184

प्रसंगवारणायोसत्वंतेवैयर्थ्यमित्यावर्त्तकत्वादितिवाच्यं तया सति प्रतिज्ञाद्येकदेशग्रहेत्वाद्येकदेशघटितसमुदायस्यापि प्रतिज्ञाद्यघ
टकत्वे सतीत्यनेनैव वारणात उभयघटकेत्यादिविशेष्यदलवैयर्थ्यापत्तेः। न च सत्यंतोपादाने एवकृत्यं तत्साध्यविशेषमितिवाच्यं तादृ
शसमुदाये सत्यंताभावेन तद्दूषितप्रतिज्ञादिघटकत्वाभावेन तन्मात्रार्थकासंभवात्। न चैवमप्यव्यावर्त्तकतयास्वाविषयकेत्यादेर्वै
यर्थ्यमेवेतिवाच्यं अखंडाभावघटकतया तद्वैयर्थ्यपरिहारात्। निरुक्तघटकस्यास्वविषयकेत्यादिना निरुक्तप्रतिज्ञाद्यघटकत्व
कांतस्याभेदाभ्युपगमे इति अप्रयोजकसंभवादिति भावः। तदिति घटपटोभयत्वेत्यर्थः तदुभयेति घटभेदपटभेदोभयेत्यर्थः। तदिति
तादृशसमुदायत्वेत्यर्थः। तदुभयेति पर्वत इति भागवह्निमानिति भागोभयेत्यर्थः। सत्यंतेति प्रतिज्ञाद्यघटकत्वे सतीत्यस्यार्थः।
तथा च प्रतिज्ञात्वावच्छिन्नस्य प्रतिज्ञाद्यघटकत्वासंभवः। पर्वत इत्यादिभागत्वावच्छिन्नस्य प्रतिज्ञादिघटकतया तद्रूपाव
च्छिन्नभेदकूटांतर्गततद्रूपत्वावच्छिन्नभेदेन तद्रूपत्वासामानाधिकरण्याप्रसिद्ध्या नातिप्रसंगोपि अत एव कूटपदं अस्य
प्येकभागत्वावच्छिन्नभेदः परभागत्वसामानाधिकरण्येनातिप्रसंगतादवस्थ्यापत्तेरिति भावः। प्रत्येकपर्याप्तिकमिति अ
यमाशयः। प्रतिज्ञादिघटकतावच्छेदकं रूपं द्विविधं समुदितपर्याप्तिकं पर्वत इत्यादिवर्णसमुदायत्वरूपमेकं प्रत्येकपर्याप्तिकं

185

न्या० ९ ८

पकारादिवर्णान्वितमत्वादिरूपमपरं तत्र द्वितीयं ग्राह्यमिति । वर्णसमुदायभेदस्य समुदितपर्याप्तिकरूपावच्छिन्नभेदस्य । प्रत्येकमित्या
दिग्रन्थेनातिव्याप्तिसंभवात् कं तादृशभेदस्य प्रत्येकवर्णमादाय पर्वतइत्यादिभागस्य सामानाधिकरण्यमस्तीति सूचितं न समुदितः । न पर्व
त इत्यादिभागेऽतिव्याप्तिः । प्रतिज्ञाहेतुसमुदायादेर्लघुप्रतिज्ञाघटितत्वविशेषेणापि वारणासंभवेनोभयघटकमादिशावृत्ति
दानायाह प्रतिज्ञाघटकेति विशेष्यं उभयघटकेत्यादि । ननु उक्तसमुदायघटकभागद्वयस्य प्रत्येकमुभयघटकत्वाभावादतिव्या
प्तिर्दुष्परिहरैवेत्यत आह । अत्रेत्यादि । तदुभयाघटितत्वस्य तदुभयाविषयकप्रतीत्यविषयत्वाभावरूपत्वेन तत्पर्यवसायप्रवेशे गौ
रवादाह तदुभयाघटितत्वं वेति । अत्र चेति प्रतिज्ञाघटकोऽयोभागद्वयात्मकविषयत्वमपीति । उपादेयमिति पूर्वानुषंगेणान्वयः । प्रति
ज्ञेति प्रतिज्ञाहेतुसमुदायस्यापीत्यर्थः । अपिनाएकदेशसमुदायपरिग्रहः । वारणीयत्वेनेति तादृशविषयत्वस्य उपादानासंभ
वादित्यर्थः । ननु पाठ्यनेप्रतिज्ञादिकमादायापि तादृशसमुदायवारणासंभवे बाधकाभावादिति भावः । वैयर्थ्यादिति । वैयर्थ्येन
विशेष्यदलेत्यादिसमुदायार्थ इति । न चात्र पर्वतइतिभागत्वावच्छिन्नभेदकूटप्रमेयत्वादिसामानाधिकरण्यसत्वेन तद्रूपावच्छि
न्नत्वस्य तादृशैकदेशसत्वादतिव्याप्तिर्दुर्वारेति वाच्यं । मायान्तर्गतत्वे सतीत्यनेन यद्रूपेण न्यायान्तर्गतत्वावच्छेदकत्वलाभेन तादृशभे

राम०

186

दकूटेन्यायांतर्गततावच्छेदकयद्रूपसामानाधिकरण्यस्य लाभेन प्रमेयत्वादेर्न्यायांतर्गततानवच्छेदकत्वज्ञानान्नतिप्रसंगात प्रतिज्ञादेर
पि स्वघटकभागद्वयघटितत्वादसंभववारणायोभयेतीति सत्येवाहनन्विति उभयं चेतीति एवं च शिथिलावुभयं चेत्यस्य विशिष्टैव
वक्तव्यमित्यग्रिमेणान्वयः। प्रतिसंधानभेदेन पदभेदे स्मानाभावइत्यस्वरसोद्वाहकेचिदितितत्र द्विष्ठेति। प्रतिज्ञादेकतानिरूपक
त्वात्मकप्रतिज्ञाघटकतावटकमित्यादिः अत्र च प्रतिज्ञाघटितंतत्र द्विष्ठापर्यस्य परिचायकं न तु नाड्यापत्तिनिवेशः विशिष्टापर्याप्तिया
दकत्वादिघटितप्रतिज्ञात्वाद्यपेक्षया प्रतिज्ञात्वेन तन्निवेशस्य शरीरे वेष्टनेन नासिकास्पर्शानुधावनतुल्यत्वात् किं तु वह्निमत्य
वनित्वादिनैव निवेशः एतल्लाभायैव तत्तदित्युक्तमिति ध्येयं। पूर्ववदिति तथा च न्यायांतर्गतत्वे सतीत्यत्रापि पक्षे विशिष्टमिति भावः
अत्रापीति इत्यस्वरसइत्यग्रिमेणान्वयः तत्रापीत्यपि नाम लीनावयवलक्षणे एतेनेत्यादिना पूर्वोक्तास्वरसः समुन्नीतः प
र्यवसानमिति नाहयोकदेशस्यैव प्रतिज्ञादिघटकत्वादिति भावः। घटितइति अवयवद्वयइति शेषः नाद्येति तत्रद्विष्ठपर्याप्तेर
र्थः अत्र च वदतीति दीधितिस्थदुक्तमुचितेत्यादि न्यायलक्षणं तावदन्यायत्वघटितं न्यायांतर्गतत्वे सतीत्यादिकमवयवलक्ष[illegible]
यां च न सम्यक्। वो द्वादिसंमतत्वावयवकादिन्यायेतद्वयस्वीकाराभेः तथा च यन्मते तन्मते लक्षणोक्तं संभवति कारादीधितिः प्राब्द

९

शे. 10

दिरिखुद्दाहरणोपनयमात्राद्यात्मकं वाक्यं मापोनवेत्यादिविप्रतिपत्तिविषयन्यायत्वादिस्वरूपनिर्वचनप्रस्तावे नैयायिकमात्राभिम
तन्यायत्वादिस्वरूपनिर्वचनेऽर्थान्तरं तस्मात् यादृशानुपूर्वीकवाक्यप्रयोज्यवाक्यार्थबुद्धित्वेन परार्थपरामर्शप्रयोजकत्वं तादृशानु
पूर्वीकवाक्यत्वं सर्वदर्शनसाधारणं न्यायलक्षणं यादृशानुपूर्वीकवाक्यप्रयोज्यवाक्यप्रयोज्यवाक्यार्थबुद्धित्वेन परार्थपरामर्श
प्रयोजकवाक्यार्थबुद्धिप्रयोजकत्वं तादृशानुपूर्वीकवाक्यत्वं च तादृशावयवलक्षणं मूलोक्तचरमेत्यादिनापि तदवयवलक्षणवाक्य
लक्ष्यं सम्पन्नं एतेनेत्यादिना शोधितिक्तो मूलोक्तलक्षणतादृशानामपि न सम्पन्नं द्विविधा ह्येकवाक्यता पदैकवाक्यता वाक्यैकवाक्य
ता च तत्र पदैकवाक्यत्वं प्रतिज्ञाहेतूदाहरणोपनयनिगमनयोरेव न तूदाहरणोपनयस्यापि वाक्यैकवाक्यत्वं पञ्चानामवयवानां संभवत्येव
अत एव प्रतिज्ञादिपंचवाक्यैरेकवाक्यतया स्वार्थविशिष्टज्ञानं जन्यत इति मूले वाक्यैकवाक्यतैवोक्ता न तु पदैकवाक्यतां वाक्ययो
रेकवाक्यतायां च न पदयोरिव तुल्यविभक्तिकत्वप्रयोजकत्वादिकं तन्त्रं किन्तु संगतिमात्रं अत एव मूले प्रत्यवयवमेकवाक्यतायै संग
तयः प्रदर्शिताः एवं च प्रतिज्ञादिपंचवाक्येष्विति मूलं नैयायिकरीत्या लक्षणासंगमनपरं न तु दर्शनान्तरीयानां तत्तत्संख्याकवाक्येष्वप
लक्षणेन सर्वदर्शनरीत्या लक्षणासंगमनोपलक्षकमिति दिक्। तादृशेति विजातीयशाब्दज्ञानजनकतावच्छेदकेत्यर्थः। तादृशो रामः

१४४

तिप्रतिज्ञादिजन्यतावच्छेदकेत्यर्थः एतत्स्वव्याघातिजातीपयद्दार्थैकदेशे जात्यैन्वयः। दीधितौ वाधकमिति प्रतिज्ञादिप्रयोज्यजाता
वित्यादितेनन्यायप्रयोज्यजातेः प्रतिज्ञादिप्रयोज्यजातिव्याप्यत्वेन तामादायवक्ष्यमाणसंकरस्यासंभवेपिनासंगतिः एवं वाच्य
येति मूलस्य प्रतिज्ञादिप्रयोज्यजातिस्वीकार इत्यर्थः। व्याख्यायां जातमय इतिन यावत्तत्रैव पंचजातीनां समावेशात्संकर इति भा
वः। इत्यभिप्रेत्येति तदभिधानमित्यग्रिमेणान्वयः। ननु पंचावयववाक्यादेकबोधाभावस्य दीधितिकारसंमतत्वेपितदधीनीक
त्वमूलकारोक्तसंकरोपपादकतया तद्बोधाभावकथनमनुचितमित्यस्वरसाद्धेतुत्वमापतयेत्याद्। इत्यभिप्रेत्येति एवं च एतत्क
ल्पेदीधितौ यं चेत्यनंतरं द्वित्र्यादिप्रयोज्यसत्वादिति पूरणीयं द्वित्र्यादीति च प्रथमकल्पेतादृशजातीनां समावेशस्थलं द्वितीय
कल्पेतादृशजातीनां परिहारस्थलं एतत्कल्पे च द्वित्र्याद्याद्यस्य स्वद्वित्र्यादिजन्यतावच्छेदिका इत्यर्थो बोध्यः द्वित्र्यादिपदं च तत
द्वित्र्यादिपरं पंचजातीनां परिहारस्थलं च एकैकजन्ये चेत्यनेनोक्तमिति ध्येयं न्यायजन्ये विलक्षणेति। इदं च वस्तुगतिमनुरु
ध्यन्यायप्रयोज्यजातेरप्रामाणिकतया तदभिधानं नेन तामादाय पूर्वसंकरानभिधानेनेदानीमसंकरोपपादकतया तदप्रा
माणिकत्वाभिधानमप्रामाणिकमिति शंकायानावकाशः सांकर्योपपादनायेति एवं च कदाचिदित्यस्य कुत्रचिदित्यर्थः। व्या

प्यव्यापकभावएवेति तया च परम्परव्यभिचरित्वाभावेन सांकर्यमेव न स्यादिति भावः। दीधितावाहुरिति निष्कृष्टैकजातीयत्वस्वीका
रे मुख्यसंकरपदार्थस्यागे नोक्तस्वरूपमेवास्वरसः। केचित्तु मूर्त्तत्वावच्छिन्नविशेषस्यादिनिर्वचनानुपपत्त्या घनजातिसिद्धिस्तदभिव्यंजक
धर्मान्तरावच्छेदकत्वेन तत एवानुगतव्यवहारोपपत्तेरित्यभिप्राय प्रतिज्ञादिप्रयोज्यजातौ मानाभाव इति भावः। अपचेतियदिनिर्वचना
न्यथानुपपत्त्यातल्लाघवेन वा जातिसिद्धिस्वीकारस्तदा पृथिवीजलोभयनिर्वचनादेकाजलतेजोत्वस्वरूपानिर्वचनाद्यपराजातिः
सिध्येदितिजातिसंकरप्रसंग इति भावइत्याहुः। दीधितौ नन्वित्यादि इदं सौत्रं वक्ष्यमाणानां मौलं च यथाश्रुतमप्यसंगतं मतुबादि
निरर्थकः मामार्थयोर्भेदान्वयतात्पर्यग्राहक इति प्राचीनमतावलंबनेन बोध्यं नेन पर्वतो वह्निमानित्यादिप्रतीतावयाः
पर्वतनिष्ठविशिष्टवह्निसंबंध्यभेदावगाहितयाप्यसत्तावच्छेदकविशिष्टसाध्यतावच्छेदकविशिष्टवैशिष्ट्यमानवगाहितया प्रकृ
तानुमितिजन्यत्वानतिरिक्तविषयकशाब्दबोधजनकतया चासंभव इति प्रांकायानावकाशः। अथ प्रतिज्ञाजन्यबोधे विभक्त्य
र्थसंख्यादेरपि विषयतया मूलत्वरूपानुपपन्नमेवेति चेन्न। पक्षे साध्यसंशयनिरासकत्वेन पक्षे साध्यवैशिष्ट्यबोधस्य
वाकांक्षितत्वेन विभक्तेः साधुतामात्रसंपादकत्वेन प्रतिज्ञाजन्यबोधे तात्पर्याभावेन विभक्त्यर्थसंख्यादेरविषयत्वात्॥ अ

स्येनतिरिक्तविषयकत्वस्याप्याविषयकत्वस्वरूपस्यैवविवक्षणीयत्वात्तयोरनुपपत्त्यभावाच्च। अधिकमुपरिष्टात् व्यक्तीभविष्य
तीति नयात्रप्रतिज्ञाहेत्वोरेकवाक्यतया बोधजनकत्वमादायहेत्ववयवेति व्याप्तिरिति वाच्यं तादृशविशिष्टवैशिष्ट्यावगाहि शा
ब्दत्वावच्छिन्नजन्यतानिरूपितज्ञाननिष्ठजनकतायां विषयितयावच्छेदकत्वविवक्षणेनादोषात्। ननु धूमवान्वह्निमान्धूमादित्या
दिन्यायस्थलीयोदाहरणोधूमादेः पक्षतावच्छेदकतयातिप्रसंगो दुर्वार इत्यत आह व्याख्यापोहेतोरिति। नासीति तयासति
पक्षतावच्छेदकहेतोरैक्येन सिद्धसाधनापत्तेरिति भावः। तत्रव्यतिरेकव्याप्तेरेवानुमितौपयिकत्वाद्युपगमेनासिद्धसाधनमि
त्याशयेनाह। सत्वेपिवेति। हेतोः पक्षतावच्छेदकत्वस्यसत्वेपिवेत्यर्थः। विधेयता[illegible]साशयेनाह। सत्वेपिवे[illegible]यामितिवि
वक्षितायां तत्र पक्षतावच्छेदके इतिशेषः। असाभादिति उदाहरणाप्रतीकादित्यादिनेनाभावादित्यर्थः पर्यवसन्नः तत्र धू
मवन्महानसत्वाद्यवच्छेदेनैव वह्नेर्विधेयत्वादिति भावः। ननु विशिष्टस्यानतिरिक्ततया तत्र धूमवत्वस्य पक्षतावच्छेदकत्वेनाति
प्रसंगोस्त्येवेत्यत आह पक्षेनेति पर्याप्तिरिति विषयस्य घटितत्वं तथा च पक्षतावच्छेदकत्वं धर्मितावच्छेदकतापर्याप्त्यधिकरणत्व
रूपं विवक्षितमिति भावः। नातिव्याप्तिरिति तथा च पक्षतावच्छेदकविशिष्ट इति व्यर्थमिति भावः। वह्नित्वावच्छिन्नवह्निविधेय

दी·

केतिवह्नित्वपर्याप्तावच्छेदकताकवह्निविधेयताके स्पर्थः। तेनयथाश्रुते नोक्तस्थले ऽतिप्रसंगाभंगाभावेपि नासंगतिः। ततश्च।
नाद्दृशाम्नायपदार्थघटितसम्बंधताद्ववभंगादिति नयाच विधेयत्वे साध्यतावच्छेदके विधेयतावच्छेदकतापर्याप्तिरत्र न विवक्षिते
ति भावः। तदभिप्रायेणोक्तिं नयाच विधेयतावच्छेदकतापर्याप्तिर्विवक्षितापि न यस्तावच्छेदकविशिष्टस्य स्वरूपेण सामित्वाति भावः।
उक्तरीत्या नद्विवक्षणामेव निरर्थकमिति स्वरसाद्दृष्टकं स्वादिति। ननु पर्वतो वह्निमान् वह्नेरित्यत्रापि नयेतिप्रसंगतादवस्थ्यं
नच साध्यहेत्वोरैकोसिद्धसाधनं सिसाधयिषयाम्नायप्रयोगसंभवात् तत्र स्वाहासाध्यस्येति। उदासीनं प्रतिज्ञासमानाकारे या न्याय५
नेतगतिं वाक्ये उदासीनस्याम्नायावयवत्वे नैव वारणात् तत्र न्यायदांतभाविनं न घाव्यतिद्दानायाहृम्नायांतरेति। इदं च साध्याद्विभेदेन
न्या४ वनतनत्शब्दविशेषघटितप्रतिज्ञादिभेदेन [illegible] पभेदद्दूति पूर्वं स्वोक्तमनुसरणापि गिरिरग्निमानिति प्रतिज्ञापरं तेनाम्नायांतर एव यत्वद्
तियथाश्रुतमसंगतं तत्र विशेष्याभावादेवानतिप्रसंगादिति ध्येयं कानवकाशः। वस्तुतो वक्ष्यमाणरीत्या वह्निसाध्यकोपनयेव
ह्निव्याप्यधूमसाध्यकानुमितिमाश्रयाविशेष्यत्वसत्वेन न स्पर तयाम्नायांतरे स्वादि पयाश्रुतमपि समर्गवेति ध्येयं। वारणा रामं०
येति। उदासीनस्याम्नायावयवत्वेन वारणाम्नायांतर्वैवतेरास्यैव नन्नत्र छ साध्यविशेषघटितार्थकप्रकारपदेनेति भावः। असंगत

तस्य पक्षाश्रुतार्थसंसर्गे बीजमाह तेनेति । जनकत्वस्य स्वरूपयोग्यत्वेपीति स्वरूपयोग्यतात्मकजनकत्वेपीत्यर्थः । क्वचित्तु स्वरूप
योग्यत्वेपीत्येव पाठः । यत्रेति उद्देश्यत्वस्येच्छाविषयत्वरूपत्वे इत्यादिनोद्देश्यः इच्छाविषयः । अप्राप्तेरिति । इदमुपलक्षणं क
द्वाचिदन्यपक्षसाध्यकानुमितेरपीच्छाविषयत्वसंभवेन तत्र रूपमात्राननिप्रसंगवारणासंभवाच्चेत्यपि द्रष्टव्यं । प्रथमप्रकृतपदे
न तत्तच्छब्दविशेषघटितत्वं तत्तत्साध्यकत्वं च विवक्षितं । तत्राद्यविवक्षायाः फलमुक्तमेव द्वितीयविवक्षायाः फलं वक्तुमाह
प्रथमप्रकृतपदेति तत्तत्साध्यकार्थकप्रकृतपदेत्यर्थः । यत्किंचिदिति वन्हिसाध्यकेप्यर्थः । न्यायावयवत्वादिति इदमुपलक्ष
णं प्रकृतानुमित्यन्यूनानतिरिक्तविषयकशाब्दबोधजनकत्वाच्चेत्यपि द्रष्टव्यं । तत्रैव वन्हिसाध्यकोपनयस्य । यत्किंचिदिति व
न्हिव्याप्यधूमसाध्यकेत्यर्थः । जनकत्वादिति प्रकृतन्यायावयवत्वादित्यपि द्रष्टव्यं । अथात्र हेत्वाद्यवयवकानामपि यत्किंचिद
नुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकत्वसंभवेनोपनयपर्यन्तानुसरणवैयर्थ्यमिति चेन्न । अनुमितौ प्रकृतत्व
मनिवेश्य तादृशशाब्दज्ञाने प्रकृतपक्षतावच्छेदकविशिष्टविषयकत्वनिवेशेनापि हेत्वाद्यवयववारणासंभवात् । ननु
तथापि पक्षसाध्यभेदेन प्रतिज्ञात्वलक्षणस्याभेदाद्वन्हिसाध्यकोपनयवारणायैकत्रत्वस्य न प्रकृतपदद्वयसार्थक्यमिति

चेन्नलक्षणाद्वयेयप्रकृतहेतुपानिवेशसामर्थ्या एवशब्दानुगममनुरुध्यप्रतिज्ञालक्षणेप्रकृतपदद्वयमवश्यंदेयमेतावतैवतत्द्वय
सार्थक्यमित्याशयात्। वस्तुतस्तु एकत्रैवलक्षणेप्रकृत पदद्वयसार्थक्यमित्यत्रैवपदद्वयाभिनिवेशात्पर्वतपक्षकवह्निव्या
प्यधूमसाधककन्यायप्रतिज्ञालक्षणोन्यायेप्रकृतत्वाप्रवेशेवह्निसाधककन्यायोपनयेऽतिव्याप्तिरनुमितौप्रकृतत्वानिवेशेवह्नि
व्याप्यधूमव्याप्यवानयमितिप्रकृतन्यायोपनयएवातिव्याप्तिःस्यादितिप्रकृतपदद्वयव्यावृत्तिरेवसंपन्नात्तदुभयस्यप्रकृतपद
द्वयस्यसार्थक्यमितिस्फुटीकृतमितिशेषः। एतेनात्रप्रकृतद्वयंतत्साध्यपक्षकार्थकमितितस्यैवाभिधानमुचितंतथातद्वयस्याप्रति
ज्ञालक्षणोद्विधानिविष्टयोःसाध्यपक्षयोरभेदमात्रलाभायतथाचैत्यभिधानेसंदर्भविरोधोद्रावनंपरास्तं। प्रकृतद्वयेत
त्साध्यपक्षकार्थकत्वस्यस्फुटीकरणायैवद्विधानिविष्टयोःसाध्यपक्षयोरभेदस्यतथाचैतादृशैनाप्रतिपाद्यत्वात्। पक्षनिवेशस्य
फलंवक्तुंसाध्यनिवेशस्यपूर्वोक्तंफलमनुवदतितत्रेति। साध्येतिसाध्यतावच्छेदकावच्छिन्नसाध्येत्यर्थः। अन्यथावह्नेरपिवह्निव्याप्य
तयावक्ष्यमाणातिव्याप्तिवारणादेवस्यात्पक्षेतिपक्षतावच्छेदकावच्छिन्नपक्षेत्यर्थः। अनुगतेवह्निसाधकपर्वतत्वावच्छिन्न
पक्षकसकलप्रतिज्ञासाधारणेतत्साध्यकेतितद्धर्मावच्छिन्नसाध्यकतद्धर्मावच्छिन्नपक्षकेत्यर्थः। इदमुपलक्षणंतद्धर्मावच्छि राम०

नै २

त्वहेतुकेऽप्यपि दुष्टत्वं स्फुटत्वान्नानुक्तं। एतेन याद्दृशो हेतुकेऽस्यापि वक्ष्यमुचितत्वे दृष्टमसंगतमिति दूषणं प्रत्युक्तं विशेष्येति प्रकृ
ताऽनुमित्यनपूर्वत्वात् इत्यर्थः। प्रकृतपक्षे प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षे प्रकृतसाध्येति प्रकृतसाध्यतावच्छेदकावच्छिन्न
साध्येत्यर्थः तन्निर्वचनात् तस्य निर्वचनीयत्वात्। तादृशेति प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यविषयतेत्यर्थः। विलक्षणेति
अनंतःपातीत्यर्थः अव्यापकेति यावत्। बाधितमिति प्रतिज्ञायामित्यादि। पक्षतावच्छेदकविषयतायास्तादृशाविलक्षणवि
षयतात्मिकायास्तत्र सत्त्वेन तद्घटितत्वाभावादिति भावः। तद्दृत्वेपि विशेष्यत्वेपि पक्षप्रवेशात् पक्षतावच्छेदकावच्छिन्नपक्षप्र
वेशः। हेतुत्वप्रविष्टेति हेतोः पंचम्यर्थहेतुत्वे हेतुतावच्छेदकसंबंधेनेत्यर्थः। अन्यथाव्यभिचारित्वापत्तेरिति भावः। यत्संबंधे हेतुः
संबंधोऽपि विषयत्वेनेत्यर्थोपि बोध्यः। अन्यथा प्रकृतसाध्यवैशिष्ट्यविषयकत्वस्यान्यूनविषयकत्वाभावेनातिप्रसंगासंभ
वादिति भावः। न्यायप्रयोगासंभवात् न्यायप्रयोगानभ्युपगमात् संभवे वा अभ्युपगमे वा। अतिव्याप्तिरिति पक्षतावच्छेदकप्र
वेशे पीत्यादिः। तथा च हेत्वन्यत्वविशेषणस्यावश्यकत्वेन पक्षतावच्छेदकप्रवेशस्य नोक्तव्याप्तिः संभवतीति भावः। अत्र
केचित् हेतुत्वं वह्निमद्धेतुरिति न्यायघटकवचनमवतीति प्रतिज्ञाहेत्वोः पौनरुक्त्यमतिहतत्वादिति सिसाधयिषयान्यायप्रयोगाभ्युप

टी॰ 14

गमेयस्तु तावच्छेदकमवेशस्य उक्तव्यावृत्तिस्संभवत्येवेति। नन्वेतद्यापि तत्वानज्ञाप्यत्वस्य पंचम्यार्थत्वेऽभिधेयं वन्हिमद्व्याप्यादौ हेतुत्व
यवजन्यबोधे वन्हेर्ज्ञानांशे प्रकारत्वेन तज्ज्ञाप्यत्वांशेऽनुमितौ तु वन्हेर्ज्ञाप्यत्वे प्रकारत्वमिति हेतोरभिधेयत्वेन तज्ज्ञानज्ञाप्यत्वरूपहेतु
त्वयसूचकस्यानुमितिसमानविषयकधीजनकत्वाभावेन हेतुत्वव्यवच्छेदेऽतिव्याप्त्यसंभवात्। उक्तरीत्या हेतुत्वे वन्हिमद्व्याप्यादौ प्रतीतो हे
त्वोरेकारबोधजनकत्वाभावेन पौनरुक्त्यप्रतिहतत्वाभावाच्च। एतत्तत्त्वमूनविषयकत्वांशेऽतिप्रसक्तत्वात्। अवयवांतरसाधारण्या
त्तत्याव्याप्तिप्रसंगवारणाय विवक्षणीयं वाक्यत्वं तात्पर्यघटितमिति एतत्बोधजनकत्वं तत्र नास्तीति भावः। विवक्षणीये त्वित्य
ग्रेहोधितीकारेणोक्तादिः न तत्पर्यंतमित्यनुमितसमानतिरिक्तविषयकत्वात्मकत्वेनैकदेशार्थस्यार्थः। क्वचिदर्थस्यैव पाठः। ननु विशे
ष्यभेदेन प्रकारताभेदे उक्तस्थले ताद्दशविषयितावैलक्षण्यमप्यस्त्येवेत्यत आह घटादीति घटत्वप्रकारकेति घटत्वरूपेण नील
घटप्रकारकशाब्दबोधस्य तत्तत्वमनुमितिज्ञानाच्छादत्वरूपेणाघटसामान्यविषयके घटत्वमूलतत्वमितिज्ञानेन विषयितावैलक्षण्यस्यानुभ
वादिति भावः। विशेष्येति आलोकवान्हिरूपेत्यर्थः। ज्ञाप्यत्वप्रकारकेति ज्ञाप्यत्वत्वावच्छिन्नप्रकारकेत्यर्थः। यथाश्रुतेऽन्तिमा
दृष्टानतिरिक्तविषयकत्वानिवेशाद्दित्यर्थः। धूमवान्तेजस्वीतिनिरूपकभेदेनैव विषयताभेदात् इति भावः। निरूपकतावच्छेदकभेदे

196

राम॰

न विषयज्ञाभेदेनाहं धूमाद्वह्निमानिति। न च धूमादिति हेत्वाकाङ्क्षाया असंभवान्नैतादृशोऽन्वाय इति वाच्यं। पर्वतो वह्निमानित्युक्ते कु
त इत्याकांक्षायाः संभवात्। यत्त्वेवं सति धूमस्यालोकवानिति हेत्वधितिकारत्वेन संगतिरिति निरूपरोपस्थापनं नं दूषणं। एतन्हाशये
नैव तत्राद्विपदोपादानात्। वस्तुतस्तु अनन्तिप्रेक्षविषयकसंतादृशानुमितिनिरूपितविषयितावच्छेदकावच्छिन्नभिन्नविषयित्वा
भाववत्त्वं तथा च तत्र विषयभेदेऽपि विषयतावच्छेदकाभेदान्नासंगतिरिति। अभावादिति अबाधितत्वेनात्पर्यानवधारणादिति
भावः। तन्मते निष्पक्षः सतोनेन निगमनमिरासः। असंगत इति निगमनेन्यायावयवत्वसत्वादिति भावः। विशिष्टहेतुसंबंधस्या
बाधितत्वबोधोपयिकत्वं विवक्षितिरूर्वमिति तदनुवादस्य पक्षे साध्यवत्तानुवादस्य। तत्प्रयोजनं। तदनुवादप्रयोजनं तादृशा
ति अबाधितत्वादिस्पर्यः। तात्पर्यग्राहकतयेति। अभेदस्मृतीयाअन्वयश्चासत्तदोबोधोपयिकत्वमित्यत्र। तद्बोधेति अबाधित
त्वबोधेत्यर्थः। तदभिप्रायेणतादृशसाध्याभिप्रायेणानत्यानिपन्नेसाद्देत्यर्थः। असम्यापृथिवीत्यनेनपक्षांशकथनेस्मा
दिति तथा च पक्ष पृथिवीसाधुसाहरणामदभिनासंगतिरिति भावः। नन्वेवं निगमनं व्याहितस्य साध्यादिबोधकत्वाद्धितैषाद
हरणादेसाध्यंबोधनीयमितिनियममानाभावादिति भावः। उक्तं अवयवत्वं थ व्याख्याने उक्तेतथायनयत्रपृथिवीसाधुरा

197

दी॰

15

हरणाप्रदर्शनासंगतिरितिभावः । ननु अनतिरिक्तपदं व्यतिरेकीति अवयवांतरेप्रकृतार्थभानेपिबाधकाभावादित्यभावः । य
दिति । इदं च विशेषणं तथा च पदितरभेदाश्रयतावच्छेदकीभिन्नमितिपर्यवसितं तेनैवमुदाहरणस्य साध्याभावव्यापकत्वघ
टितव्यतिरेकव्याप्तिप्रदर्शकत्वानुपपत्तिरितिवाच्यं । साध्यवत्त्वेहेतुघटितत्वप्रदर्शकत्वसंभवात् । अन्यथानन्वयसाहचर्यभेदबोध
नसामर्थ्येनानुपपन्नेसाहरनन्वयेपि उदाहरणैकदेशस्य व्याप्तितरभेदविषयकबोधजनकस्यवारणायैवानतिरिक्तपदमि
त्यत आह नयाचेतिनयालेति । अनुमित्यन्यूनविषयकशाब्दज्ञानजनकत्वसंभवइत्यर्थः । नैनैवेति एवकारेणानतिरिक्तपदस्य
व्यवच्छेदः । तेनैकदेशावारणादित्याशयः । नैवेव्यतिरेक्युदाहरणैकदेशएव । नेनेति । मिश्राणामिति शेषः । नविरुद्धमहतिसत्वं
नस्यन्यायावयवत्वार्थकत्वेउदाहरणैकदेशस्यतेनैववारणेनचावयवांतरस्यानतिरिक्तपदेनैवव्युदासादन्यूनपदमधिकमित्या
शंक्यायायाधसवान्सोऽग्निमानित्युदाहरणैकदेशेऽग्निमानित्यत्राप्तिव्याप्तिवारकत्वादितिग्रंथेनमिश्राणामन्यूनपदव्यावृत्ति
रुक्तं । विरुद्धेनएवं घटपाकोगुरोर्द्रव्यकमाप्तिसेसतिसत्वादित्यत्रोदाहरणेयद्विप्रतिज्ञारूपएवशब्दोहदयांतीक्रियतेतदानत्राप्तिव्या
प्तिवारणार्थत्वादित्याहियंथेननत्रसामग्रीवशादुरात्वाघवगाहिनीवक्ष्यमाणानुमित्यन्यूनानतिरिक्तविषयकत्वात्रांते

198

राम॰

स्वघ्नावगाह्यस्य पक्षे विषयाविषयाजनकतयाऽतिव्याप्तिवारणाय यावत्पदस्यावृत्तिदानं मिश्राणां विरुद्धेन तत्पस्य सत्वं तेनैव वार
णासंभवादित्याखंडलाशयः । अनतिरिक्तविषयकत्वं चानतिरिक्तविषयकज्ञानजनकत्वं च प्रतिज्ञायां साध्यतावच्छेदकवि
शिष्टसाध्यविशिष्टमात्रविषयकज्ञानजनकत्वं नास्ति पक्षविषयकज्ञानजनकत्वात् नोऽसंभववारणायाह पक्षविशेष्य
केति मात्रपदव्यावृत्तिमाह तेनेति । तदादेर्बुद्धिस्थत्वेनैव शक्तिरिति मते निगमनांतर्गतस्यान्यूनविषयकत्वाभावादेव तत्राना
तिव्याप्तिरत आह । हेत्ववयवेति अनतिरिक्तविषयकत्वान्ताद्दृशसाध्यविशिष्टमात्रविषयकत्वाभावात् । इत्थं च सत्यंतस्य व्याप
तगतत्वार्थकत्वेऽन्यूनविषयकत्वस्य पक्षतावच्छेदकविशिष्टपक्षविषयकत्वार्थकत्वे च हेतुनिगमनयोरिति इत्साहित्यं येनानति
रिक्तपदव्यावृत्तिसंगतिरित्यर्थः । मिश्रैर्नच पक्षतावच्छेदकस्यावयवांतराप्रतिपाद्यत्वादन्यूनपदमात्रगर्भतयैव सम्यगिदं साध्यं
कथमन्यथा पित्रीस्तुदाहरणोक्तदोषाननुसेनतावन्मात्रगर्भस्य तुच्छत्वादिति निगमनेन तथैव व्यावृत्तिप्रदर्शनादिति भावः । संगति
मेवाह तेनेति । अन्यथा सत्यंतान्यूनविषयकत्वयोरभावादेवानतिप्रसंगेनादृशांशस्यासंगतिः स्यादिति भावः । विवक्षणी
येति न यथा यान्यूनविषयकत्वावच्छेदेनानतिरिक्तविषयकत्वं पक्षतावच्छेदकावच्छिन्नविशेष्यकत्वावच्छेदेन ताद्दृशसाध्य

टी० 16

विशिष्टमात्रविषयकत्वपर्यवसितं द्रष्टव्यार्थ इति भावः। इत्युदाहरणाद्वै इत्युदाहरणोक्तेर्यो पृथिवीतरभिन्नामि सत्त्र नाति
व्याप्तिरिति खंडश्लोनिरस्ता न्यूनविषयकत्वानतिरिक्तविषयकत्वयोरनुमत्वबाधे सत्वेपि निष्कर्षेणोक्तलक्ष्यार्थाभावादिति भा
वः। ननु पक्षपर्वतस्य दृष्टांतत्वं तत्र तद्धटितोदाहरणोक्तदोषः तिप्रसंगाइत्यत आह पक्षस्येति सिद्धसाधनभियेत्यादि। ननु सिसा
धयिषासत्वे सिद्धसाधनमकिंचित्करमनत आह सिसाधयिषयावेति अन्यथा सिसाधयिषयाव्याप्यप्रयोगे इत्युदाहरणोक्तेत्या
इतिइति न्यायस्थलीयपर्वतोदाहरणोक्तदोषाइत्यर्थः। एतेन मपि स्मरहरोऽव्ययमिति प्रतिज्ञैकदेशो हरोऽव्ययमिति भागेऽनित्या
प्यानायेपरिष्कारस्सम्भवतीति तन्न विवक्षितनताद्दृशबाधतात्पर्यकत्वाभावेनोक्तातिव्याप्तेरसंभवात्। परिष्कुर्वन्तीतिस्त्रोक्तो
दाहरणोक्तदोषौ नुमितिन्यूनविषयकाऽदिबाधतात्पर्यकत्वाभावे नैवानतिप्रसंगोपिष्कारान्तत्रान्यूनादिपदस्यावृत्तिरनासंग
तिः एवंच ग्रन्थे दीधितिकृताऽन्यूनविषयकत्वादिप्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यविषयकत्वादिरूपमेव निर्वाच्यं अन्यथा
यद्यपीत्यादिवक्ष्यमाणदोषप्रसंगात्। तथा चोक्तरीत्या परिष्कारासंभवेनैतमनेयमादियद्वानन्तुषंगो पूर्वोपदर्शितरीत्या
उपनयद्वयापत्तिरिति तदनुषंग एव सम्यगीत्याशयेनाह दीधितौ यदि चेति [illegible] न्यूनताभंगायानि

रामः

उदाहरणं चेत्यस्य स्वरस्तोऽत्र बोध्यः २

200

गमनेऽयमादिपदानुषंगश्चावश्यकइत्यत आह वाक्येति विशिष्येति समर्थहेतुसंबंधिप्रकृतसाध्यविशिष्टप्रकृतपक्षेतरार्थः। व्या
ख्यांतेनैवैकवाक्यतानाधीनविशिष्टलाभेनैव अनुवादत्वस्य हानिरिति शेषः। बोधायपर्याप्ततेति न्यूनताभंगइति शेषः। नसद
तिं अयमादिपदस्यार्थः। अथैवं निगमनेऽयमादिपदानुषंगेऽपि वाक्यैकवाक्यतया शाब्दबोधमादायैव निगमनस्य न्यूनवि
षयकत्वानजनकत्वसंभवेनातिरिक्तपदव्यावृत्तिसंभवमेवेतितदित्यादिना स्थलांतरानुसरणमफलमिति चेन्न यत्रान्यूनान
तिरिक्तविषयकत्वानजनकत्वानेवयवांतरमपि भातं तत्रावयवांतरे अतिव्याप्तिवारणाय तादृशस्थाव्यवच्छिन्नजन्यतानिरू
पितजनकतावच्छेदकविषयताव्यूर्यासमुदायत्वस्य वाच्यतया निगमनेनातिरिक्तपदव्यावृत्तसंभवात्। एतेन प्रतिज्ञाहेत्वादि
जन्यबोधमादायैव हेत्ववयवादावेवानतिरिक्तपदव्यावृत्तिसंभवेन तदित्यादिना स्थलांतरानुसरणमफलमित्यपि निरस्तं। प
क्षइतिपक्षतावच्छेदकमनंतर्भाव्येत्यादिः। नैवमुदाहरणोपनयनातिरिक्तपदव्यावृत्तिसंभवेन तत्परित्यागे बीजाभाव इति वाच्यं व्या
तं अप्रेरणापक्षतावच्छेदकविशिष्टपक्षविषयकत्वनिवेशेनापि तद्वारणासंभवेन तत्परित्यागात्। भानानेयत्वादिति महानसादि
स्वाध्याधिकरणानपाभानेऽपि पक्षे तादृशव्याप्तिविशिष्टहेतुमत्ताबोधसंभवादिति भावः। उत्तरत्रेति अग्रे उदाहरणोपनययो

रित्यादेर्वारत्यायेत्यत्रान्वय इतिभावः। पक्षतावच्छेदकरूपेणेतिव स्य मात्रापुरस्कारेण तत्तद्व्यक्तिविशेषस्यावच्छेदकत्वादितिभावः। यथासंख्येने
तिन्यायाच पक्षतावच्छेदकरूपेण पक्षस्य दृष्टांततयापत्तौ पञ्चावयवसत्त्वे उदाहरणस्य साध्यतावच्छेदकरूपेण साध्यस्य हेतुतयापत्तौ
पञ्चावयवसत्त्वे उपनयतादृशतयापत्तिरित्यर्थः पर्यवसन्नः। कथमितिपक्षे साध्यनिश्चयदशायामेव तादृशदृष्टांतहेत्वोरसंभवादिति
भावः। ननु साध्यस्य हेतुत्वेऽत उद्देश्यतावच्छेदकविधेययोरैक्येनोदाहरणस्य निराकांक्षतयाऽसंभवेन न्यायासंभव इत्यत आह। अ
त्रेत्यादि। असार्वत्रिकत्वादिति न्यायाच क्वचिद्दृष्टांतस्योदाहरणघटकत्वेपि यत्र तस्य न तत्र घटकत्वं तत्रोदाहरणोऽनिन्यायस्य सं
भवस्याशयः। एतेन पञ्चावयवे न्यग्रिमग्रंथे दृष्टांतस्योदाहरणघटकत्वेनास्मासंदर्भविरोध इति दूषणं परास्तं। तत्र उपनये। ननु पयो
गः साध्यस्य हेतुत्वोपयोगः। विवादग्रस्त इति अन्यथा हेतुत्वं वह्निमद्वृत्तित्वादेहेत्वयवेऽनिव्याप्तिस्यादिति भावः। उद्देश्यत्वस्य
छाविषयत्वरूप• तस्यानुद्देश्यीभूतायाः पर्वतत्वावच्छेदेनानुमितेरपि संग्राहकाया असंग्रह इत्यत आह उद्देश्यतायामिति। पर्वत
त्वाद्यवच्छेदकत्वस्य। पर्वतत्वादिपर्याप्तावच्छेदकत्वस्य अवयवैकदेश इति प्रतिज्ञैकदेश इत्यर्थः। यत्तु मरीत्यानादृशावयवत्वा
वच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयतावद्वर्णसमुदायत्वस्य वाक्यानयापि अवयवैकदेशेन न दुभावान्नातिव्याप्तिरिति दूष

रागोऽभावनैवेदं सत्तादृशसमुदायत्वस्य पर्याप्तिनिरसंबंधेनाभाववत्त्विकत्वयातत्पर्याप्त्यधिकरणत्वलाभार्थैवावच्छेदकांतोपादानं तेन
प्रतिज्ञैकदेशानिरासइत्यभिप्रायात् । केचित्तु स्वरूपतो हेत्वमित्यादिप्रतिज्ञैकदेशाभिप्राये रागोऽस्मिन्नित्याहुः । अवयवावच्छेदकमितिननु
यथाश्रुतस्यावयवत्वनिवेशोपि हेत्वंतरस्यबोधमादाय हेत्ववयवेऽनुषंगवहेऽनिगमने च व्यावृत्तिसंभवात्तत्परित्यागोऽनुचित
इतिचेन्नैवं ॥ तादृशशाब्दत्वावच्छिन्नत्वादिविवक्षासत्त्वेन हेत्ववयवेऽननुषंगपक्षे चानिगमने व्याप्त्यसंभवात् । वस्तुतोऽत्रस्वाभ्या
वयवत्वपरिशेषे उभयघटकभागद्वयाघटितत्वं न निवेशनीयं प्रयोजनाभावात् घटितत्वं घटकत्वे सति स्वाघ्यांतर्गतत्वमेव स्वार्थं तात्पर्यमिति
पर्यवसन्नमित्याशयः । यत्तु प्रतिज्ञाहेतुसमुदायादेरन्यूनानतिरिक्तविषयकशाब्दजनकत्वेनैवावच्छेदकत्वात्तथा चावयवा
नैसम्यंतस्यावयवावच्छेदकत्वाघटकत्वमुपेत्यानतिरिक्तपदव्यावृत्तिदानेसंदर्भविरुद्धमित्याशंकापिनिरस्तेति दिक् । दीधितावयवा
दीनि इदमुपलक्षणां उपनयादिनिगमनांतभागस्यैवपि द्रष्टव्यं । यत्तुपक्षतावच्छेदकस्य हेतुत्वोपनये पूर्वोक्तरीत्याऽहारस्य
वारणायपक्षतावच्छेदकेविशेष्यतावच्छेदकतापर्याप्त्यधिकरणत्वविवक्षायामवश्यकत्वेन तन्निरासस्संभवतीति दीधितिकृत
स्तदुपेक्षेतितदसत् । तथा सति तादृशोहाहरणोपेक्षायामव निर्बीजत्वापत्तेः । विवक्षांतरेणातन्निरासासंभवस्योपेक्षाबीजत्वे

टी॰ 18

साध्यतावच्छेदकेविधेयतावच्छेदकतापर्याप्त्यधिकरणत्वविवक्षयायमाहितिगमनं तद्भागेऽव्याप्तिनिरासासंभवेनासंगत्यापत्तेः।

व्याख्यायांघटादेरपीति। अपिरवधारणे तेन घटादेरेवेत्यर्थः। भानसंभवादितिनयाचतादृशविषयतावच्छेदावतिरिक्तप्रसिद्धानाप्र

सिद्धिरितिभावः। व्युत्पत्तिवैशेनेति। अभेदेनस्वार्थविशेषणाकतद्धर्मावच्छिन्नान्वितबोधपरस्यसर्वपदस्यतद्धर्मव्यापकत्वसर्वत्वविबोध

कत्वव्युत्पत्तिवशादितिभावः। प्रागुक्तदोषः। अतिरिक्ताप्रसिद्ध्यसंगतिरूपोदोषः। प्रमेयत्वाभावस्यादि। प्रमेयत्वाभावत्वरूपकोटित्वाव

च्छेदकावच्छिन्नकोट्यप्रसिद्धेरित्यर्थः। सर्ववृत्तीति। प्रमेयत्वं प्रमेयत्वाभावोवासर्ववृत्तिनिरिक्ताकारकइत्यर्थः। यथाश्रुतेसाध्यसंश

यत्वाभावादसंगतेः। आधिके केवलान्वयिग्रंथोक्तरीत्याबाध्यं। भिन्नप्रकारकोपि साध्यविशेष्यकपक्षप्रकारकोपि। विलक्षणेति।

निरवच्छिन्नत्वतत्तद्धर्मावच्छिन्नत्वरूपवैलक्षण्यवदित्यर्थः। एवमग्रेपि। तादृशानामपि विलक्षणानां प्रकारत्वानि ध्रुमपि ततः। समव्याप्तत्वे

हेतुतत्तद्रूपेण। नाद्यव्यापकत्वस्येति। व्याप्तिघटकहेतुव्यापकत्वस्येत्यर्थः। हेतुसमानाधिकरणत्वस्यचेति। साध्यसमानाधि

करणत्वस्यापिबोध्यं। चकारेणैववाऽनत्समुच्चयः। क्वचित्साध्यसमानाधिकरणत्वस्यचेति पाठोस्ति सच समीचीन एवा [illegible] तत्त

द्रूपेण। हेतुव्यापकत्वहेतुसमानाधिकरणत्वतद्रूपेण हेतुसमानेनेति हेतुश्च गुणादिर्बोध्यः। इत्याहोद्देश्यादिप्रतीतिजन्यबोधे।

204 रम०

प्रकारत्वमिति। तत्रोपनयजन्यबोधेपीति शेषः। ननु तत्रापि प्रकृतहेतुव्यापकसाध्यसामानाधिकरण्यरूपविशिष्टस्यानुमित्य
प्रकारस्योपनयजन्यबोधे प्रकारत्वान्न समव्याप्तत्वमत आह तादृशविशिष्टेति। उपनयस्यापि हि तादृशत्वस्य हेतुव्यापकसाध्यसा
मानाधिकरण्यत्वस्यार्थः। मानाभावादिति। यद्यपि मानसत्वेपि विशिष्टव्याप्तिविशिष्टहेतोः पक्षतावच्छेदकत्वेनोपनयेति व्याप्तिर
स्येव न व्यापिवस्तुगतिमनुरुध्य योनरूक्तेन तदुपनयासंभवमभिप्रेत्यैवेदं। उपनयस्य चेति। तथा चैतादृशोपनयजन्यबोधप्रका
रतायाश्चेत्यर्थः। प्रमेयत्वस्य साध्यत्वोपगमादीत्याह द्रव्यत्वस्येति। ननु तत्राप्युक्तरीत्याभिन्नप्रकारकसंशयसंभवस्यैवेत्यत आ
ह तथाचेति। प्रकृतानुमितिसंबंधिविलक्षणताप्रकारताव्यापकप्रकारताप्रतियोगित्वरूपान्यूनविषयकत्वोत्तीर्णेनोक्तातिव्याप्ति
रत आह यद्वमिति। तदेवं न्यूनविषयकत्वमेव प्रमेयाद्युपत्त्वादिति। अत्र प्रमेयादिहेतुकत्वे यद्वेऽतिव्याप्तिसंगमनाय तत्र
न्यथा तादृशविषयताविलक्षणाविषयतान्यूनत्वरूपानतिरिक्तविषयकत्वाभावेनातिव्याप्त्यसंगतेः। द्रव्यत्वादाविति हेत्ववयव
इति शेषः। पक्षतावच्छेदकविशिष्टत्वस्य पर्यायसार्थक्यं तथैव साध्यतावच्छेदकविशिष्टत्वस्यापि तत्संभवतीत्याशयेनाह ति
नेति साध्यतावच्छेदकविशिष्टत्वस्य प्रवेशेनेत्यर्थः। रूपस्यापि रूपानतिरिक्तविषयकत्वस्यापि रक्षणमिति प्रातिस्विकाया मित्या

205

धी०

दिसंबंधाद्दत्तमित्यर्थः। अतः ताद्दृशानतिरिक्तविषयकत्व[illegible]रसृगालानुरोधान्नविशिष्यसाधीति अपिनासाध्यतावच्छेदकवि
शिष्टस्यसमुच्चयः। उक्तरसृगालानुरोधेनपक्षतावच्छेदकविशिष्टसाध्यतावच्छेदकविशिष्टयोः सार्थक्यमेवोपपादयति अन्ययेति
नयोरप्रवेशादित्यर्थः। व्याप्यविषयकत्वरूपानतिरिक्तविषयकत्वपक्षेनोक्तरीत्यानयोः सार्थक्यमितिसाध्यतावच्छेदकविशि
ष्टस्यव्यावृत्तिः प्रथमोक्तैवेतिपक्षतावच्छेदकविशिष्टस्यव्यावृत्तिंतस्यसाधारणीमाह ताद्दृशान्यतरस्मादितिघटादित्व
विशिष्टरूपघटान्यतरस्मादित्यर्थः। नचतच्छब्दस्यपूर्वोपस्थितपरामर्शकतयाकथमत्रपश्चादुपस्थितपरामर्शकत्वमिति
वाच्यं। तीर्थेनिशीथेगजसेतुबंधात्प्रतीपगामुत्तरतोस्यगंगांअयत्नबालव्यजनीबभूवुर्हंसानभोलंघनलोलपक्षाइत्यादौतत
च्छब्दस्यपश्चादुपस्थितगंगापरामर्शकत्वस्यापि स्तुत्यनिसिद्धत्वात्। अतएवतच्छब्दस्यक्वचित्पश्चादुपस्थितपरामर्शकत्वमपि
तीर्थेनिशीथेगजसेतुबंधादित्यादौतच्छब्देनपश्चादुपस्थितगंगापरामर्शदर्शनादितिसाहित्यदर्पणकारादिभिरप्युक्तं। अत्रे
दंबोध्यं तीर्थेनिशीथइत्यनेनहंसतीर्थप्रसिद्धगंगैकदेशास्यंविवक्षितंतत्रयासस्यैवहंसतीर्थेसमागतस्यराज्ञोहंसैर्बालव्यजनो
पचारसंपादनोचित्यस्यसंगतत्वेनिर्वहणीयत्वंचतच्छब्दस्यपश्चादुपस्थितहंसपरामर्शकत्वमावश्यकमितिसंप्रदायः। तच्छब्दस राम०

206

पूर्वोपस्थितविंध्यपरामर्शकत्वमुपेत्य तीर्थशब्दस्य हंसतीर्थपरत्वमुपेत्य विंध्योपि हंसतीर्थ इति व्याख्यानं तीर्थशब्दस्य कंतिचि
त्प्रसिद्धकरणातीर्थपरतया विंध्यीयकराति तीर्थं इति च व्याख्यानं तीर्थशब्दस्य सोपानपरं परापरतया विंध्यीयसोपानपरंपराया
मिति च॥ केषांचिद्व्याख्यानं त्वननिविततमसां प्रदर्शाधिकमस्माभिरसिकं चेस्मू पे स्पं॥ वस्तुतस्तु तद्दर्शनोपायविमर्शनार्थमियानद्वा
ली सहनं गतेन॥ तत्रैव हृद्गाक्किलपक्ष्मलाशीहासायशीमर्षपितुरभवसैंसारैन [illegible] दस्य पश्चादुपस्थित पक्ष्मलाक्ष्या हि पश
मर्शकत्वं विना निर्वाहो न संभवतीति स्फुटमेव तत्रापि यथा कथंचित् सर्वोपस्थितेरणुपगमे तु प्रकृते पितस्यास्तुवचलान्न कोपि
दोष इति॥ अत्र हेत्ववयवेनाहृत्याविषयताविलक्षणाविषयताश्रयत्वरूपानतिरिक्तविषयकत्वपर्येति प्रसंगसंपादनाय पक्षता
वच्छेदककोटौ नाहृत्यान्यतरस्मादित्यादिं घटान्यत्वविशिष्टेति वैशिष्ट्यं सामानाधिकरण्येन न अत्र सामानाधिकरण्यसंबंधेन रूपवति
घटत्वादेर्व्यभिचारवारणाय घटान्यत्वविशिष्टस्यान्तरत्वावच्छिन्ने विशेषणं विशेष्यांतिवेशेष्यरान्यत्वस्य सामानाधिकरण्यासत्त्वात्:
सामानाधिकरण्यसंबंधेन घटरूपादेः सत्त्वाद्व्यभिचार इति तन्निवेशः॥ न च तद्धारणाय रूपान्यत्वमपि दोषनिवेशाय वाच्यमिति वाच्यं
प्रकृतानतिव्याप्तिसंपादनायान्यतरत्वेन तन्निवेशात् धर्मिभेदेन वैयर्थ्यानिवकाशात्॥ अतिव्याप्तेः॥ अन्यतरत्वरूपेणापक्षेसा

२०७

तिव्याप्तिरित्याशंक्याह। पक्षांशइति। अतः पक्षेतेति। तथा चान्यतरत्वस्य प
क्षतानवच्छेदकत्वान्नेति॰

क्षे२

ध्यवैशिष्ट्यावगाहित्वादिति भावः। पक्षे मुख्यविशेष्यतायाः अभावान्नातिव्याप्तिरिति भावः। इत्थमेवेति एतदाहित्वदंतीत्यंतमेकोग्रंथः
उक्तातिव्याप्तिवारणार्थमेवेत्यर्थः। प्रतीतिनियामकतत्तद्धेतुकसाध्यसिद्ध्याधिकव्याप्यविषयकत्वरूपाननतिरिक्तविषयकत्वनिवेशाप
क्षेपीत्यर्थः। अपिना तादृशविषयताविलक्षणविषयताशून्यत्वरूपाननतिरिक्तविषयकत्वपक्षसमुच्चयः। तत्पदं पक्षतावच्छेदक
विशिष्टपरं। वह्न्यभावारोपितस्य सार्थक्ये नेत्यमेवेत्यसंगतमित्यस्वरसादाह वदंतीति। विषयताशून्यत्वमिति। इदं च वह्न्यभावारो
प्यान्यविषयकत्वस्याप्युपलक्षणं। एवमग्रेपि। प्रागुक्तदोषेति मुख्यविशेष्यतानिवेशात् तादृशान्यतरस्यादिपाठेऽहेत्ववयवेऽतिव्या
प्तिनिरासः। पक्षतावच्छेदकसाध्यतावच्छेदकघटिताननतिरिक्तविषयकत्वनिवेशात् लोकरीत्या प्रतिज्ञायामसंभवइत्याशयः। त
स्यापर्वतो वह्निमानित्यादेः एवमग्रेपि वारणमिति तद्घटकप्रतिज्ञात्वे पक्षतावच्छेदकवैशिष्ट्यप्रवेशात्। धूमात् लोकवानित्यादेः प
र्वतो वह्निमानित्यादेः प्रतिज्ञात्ववारणासंभवादिति भावः। तत्र पक्षतावच्छेदकवैशिष्ट्यांशप्रविष्टमित्याशयेनाह तस्य प्रतिज्ञात्वेति ध
माद्यालोकवानित्यादिस्थलीयेत्यादिः। न्यायत्वेति उक्तस्थलीयेत्यादिः। एतदिति अतिव्याप्तिवारणानुरोधादित्यर्थः। विशेष्येति अ
न्यूनविषयकत्वेत्यर्थः। तदंतर्भाविनैव पक्षतावच्छेदकवैशिष्ट्यांतर्भाविनैव। एवकारेण विशेष्यदलेतदंतर्भावव्यवच्छेदः। तत्रा

पर्यवसानात् पक्षतावच्छेदकवैशिष्ट्यप्रवेशासार्थक्यात् । अत एव दीधितिकृता पक्षे प्रकृतपदव्यावृत्तिमुक्त्वैव साध्येन व्याप्तिरितीति
ध्येयं । अत्र वदंति साध्यतावच्छेदकपर्याप्त्यवच्छेदकताकसाध्यप्रकारतानिरूपितपक्षतावच्छेदकपर्याप्त्यवच्छेदकताकपक्षविशे
ष्यताकत्वमेवान्यूनविषयकत्वं निर्वाच्यं तथा च तेनैव सर्वसामंजस्ये निरुक्तानुमित्यनतिरिक्तविषयकत्वविशेषणांशवैयर्थ्यमेव तदुपा
दानीयार्थं पदघटितनिगमनादौ साध्यतावच्छेदकपर्याप्त्यवच्छेदकताकसाध्यप्रकारताशालिबोधाजनकत्वात् नैव तद्वारणासंभ
वादिति । केचित्तु । पर्याप्तिघटितोक्तार्थलाभार्थकतत्पाठपायस्यापायान्तरदूषकतया वाऽनतिरिक्तविषयकत्वस्य नवैयर्थ्यमि
त्याहुः । अपरे तु । पर्याप्तिघटितोक्तार्थस्य निष्कृष्टमात्रस्यानतिरिक्तविषयकत्वेपि पर्यवसानात् तात्पर्यरात इति वैयान
ननत्वैयर्थ्यमित्याहुः । हेतुभागे । हेतुत्वं तु भागे क्वचिन्नैव पाठः । अतिव्याप्तिरिति सत्यंतस्यावयवाघटकत्वात् यंतगतित्वपर
त्वे इदं यथाश्रुते तस्य न्यायावयवत्वाभावादसंगतेः । इदं पूर्वोक्तमननतिरिक्तविषयकत्वं कल्पेपीति । प्रकारान्तरेणोक्तमपि
पि । ननु तत्कल्पेपि विषयत्वस्याविषयविशेषे तन्नानास्वरूपत्वांगीकारे पूर्वोक्तमननतिरिक्तविषयकत्वं संभवत्येवेति प्रकारां
तरानुसरणमफलमत आह विषयेति । अंगीकृत्यापि अंगीकृत्य पूर्वोक्तानतिरिक्तविषयकत्वनिर्वचनसंभवेपि । तथा च तत्

दंगीकारे पूर्वोक्तप्रकारस्यासंभवे पि तदनंगीकारे तदसंभवेन प्रकारस्य प्रकारांतराद्दषकत्वेन वा प्रकारांतराश्रयणमिति भावः। प्रकृत
हेतुकापेति तं व्याचष्टे प्रकृतसाध्यकानुमितित्वघटितधर्मावच्छिन्नजन्यतानिरूपितजनकतावच्छेदिका प्रकृतपक्षविशेष्यतानिरूपितप्रकृ
तहेतुविशेष्यतानिरूपिता यद्धर्मावच्छिन्नप्रकारतानद्धर्मावच्छिन्नाविषयकत्वमित्यर्थः पर्यवसन्नः। सच धर्मोन्वयिनि हेतुव्यापकसा
ध्यसामानाधिकरण्यत्वं व्यतिरेकिणि च साध्याभावव्यापकाभावप्रतियोगित्वं। तत्पदेन व्याप्तिपक्षधर्मताविशिष्टहेतुपरामर्शो
क्तिगमनवारणाय अन्वयव्यतिरेकव्याप्त्योरेकतरोपादानेन्यतरव्याप्यवगाहित्विगमने। तिव्याप्तिरतस्तयोरनुगतरूपेणाप्रवेशः। पक्षतत
त्वयोरननुगमे तु प्रत्येकव्याप्यविषयकत्वं निवेश्यं। तत्र च नाप्येवौपयिकांतमुक्तं उदाहरणस्याव्याप्यबोधकत्वमतेतु अन्यूनविषयक
त्वदले नैव तदुद्धारणां बोध्यं। हेत्ववयवाघाकांक्षेति अन्यथा साध्यगमकहेतुलाभेन निराकांक्षत्वापत्तेरिति भावः। यत्तु इदं मसंगतं पर्वतध
र्मिकवह्निसिद्धौपयिकहेत्वाकांक्षानुपपत्तावपि वह्निव्याप्यालोकवत्पर्वतत्वावच्छिन्नधर्मिकवह्न्यनुमित्युपयुक्तहेत्वाकांक्षायां बाध
काभावात्। प्रकृतपक्षस्य प्रकृतसाध्यवत्त्वेकुत इत्याकांक्षायैव हेतुप्रयोगात्। परंतु वह्निव्याप्यालोकवत्पर्वतत्वेन पक्षत्वेन तद्रूपावच्छि
न्नेवान्हि संशयासंभवान्नायमेवनावतरणीयमतः सधर्मेत्युक्तमिति तन्न सत् तादृशालोकस्य पर्वतत्वविशिष्टविषयत्वेसिसाध

षियत्वान्वायप्रयोगानंगीकारेताहृशालोकविशिष्टेपि पर्वतेताहृशालोकवत्त्वस्याप्यर्थतोलाभेनप्रकृतपक्षेप्रकृतसाध्यगमकत्वा
भेनहेतुत्वविधानप्रयोजकाकांक्षानुपपत्तिसंभवात्। युक्तं चैतत्। अन्यथा परंत्वित्याद्विनाल्पवृक्षाया विशिष्टपर्वतेवन्हिसंशयानुपप
त्तेस्तद्वृक्षत्वगोचरसंशयस्यैवासंगत्यापत्तेः। अनुभवसाम्येन सर्वथैवतद्धेत्वास्यापिसंगतत्वाच्च। परंत्वित्यादिकमपि मंदं। जलत्वस्यलेसं
शयस्यावयपकत्वेपिवाह्नस्यलेसंशयस्यानावश्यकत्वादितिदिक्। अयंपक्षानुषंगइतितद्ननुषंगेपमित्यादिनिगमनांतस्य
स्यायावयव[illegible]कत्वादितिदिक्। अ[illegible] त्वाभावादिवैवारयोनतिरिक्तविषयकत्ववैयर्थ्यापत्तेरितिभावः। अयंपक्षानुषंगपक्ष
साधारण्येनानतिरिक्तविषयकत्वस्यव्याहतिमाह। पर्वतइत्यादिनानत। प्रकृतहेतुकेत्यादनतिरिक्तविषयकत्वंतत्रैवपर्वतोव
न्हिमान्वन्हेरित्याद्यावेव। एवंव्याप्यविषयकत्वरूपानतिरिक्तविषयकत्वनिवेशे। दीधितावेकदेति। एकत्वापप्रयोगकालइत्यर्थः।
उभयव्याप्तीति। अन्वयव्याप्तिद्वयस्यव्यतिरेकव्याप्तिद्वयस्यान्वयव्यतिरेकव्याप्तिद्वयस्यवोपन्यासोपीत्यर्थः। प्रथमोपन्यस्तव्या
प्तिज्ञानेनैवेष्टसिद्धेर्व्याप्त्यंतराकांक्षाविरहादितिभावः। अथैवमूलकारेणावस्यमारा अन्वयव्यतिरेकोभयव्याप्तिबोधकोदाहर
राप्रयोजकाकांक्षाप्रयोजकावयवत्वरूपमन्वयव्यतिरेकिहेतुलक्षणमसंगतमितिचेन्नरातहृस्वरसेनैवयद्वेत्यादिनालक्षणां

२२

दी॰ मरस्यानुसरणीयत्वात्। व्याख्यायां चैत्रे चैत्रात्मकपक्षे। समवायेनेति शेषः। तथा च तादृशज्ञानजनकत्वोक्तयमिति तथास्त्वित्यनुष
ङ्गेनान्वयः तत्र तज्जन्यबोधे गोत्वस्य गोत्वस्वरूपसाध्यस्य समवायेनेति सा स्वात्मकार
त्वमित्यनुषङ्गेनान्वयः। वह्निमत एवेति प्रतिज्ञावाक्यादिति शेषः। अस्त्विति तथा च तत्रय धीपवर्णितविशिष्टज्ञानजनकत्वाद्व्या
प्तिरिति भावः। अमयेति वह्निवह्निमद्द्रुमयेत्यर्थः। अन्वय इति एवं च दीधितौ भासत इत्यनन्तरं ननु पर्वतत्वविशिष्टे वह्नेः संयोग इति
शेषः। ननु तस्य ज्ञाने बाधकाभाव इत्यत आह नामार्थयोरिति नच मतुपस्तात्पर्यग्राहकतया भेदान्वय इति वाच्यं। संभवत्पर्यसाधु
त्य५ त्वेनात्पर्यग्राहकत्वस्याप्रयोजकत्वमित्याशयात्। भासत इति तथा च भेदसाध्यकानुमितौ भेदस्य पक्षे विशेषणतया प्रकारत्वं प्रति
ज्ञायां तु क्वचिदाश्रयत्वस्य क्वचिद्व्याश्रयस्य इति तत्र स प्रतिज्ञायाम व्याप्तिरिति भावः। अत्रैवेति। अत्मूनपदेन प्रकृतानुमितिविधे
यत्वस्यानतिरिक्तपदेन तादृशविधेयताश्रूयत्वस्य विवक्षणेन साध्यतावच्छेदकेतरधर्मानवच्छिन्नविधेयतानिरूपितपक्षतावच्छे
दकावच्छिन्नोद्देश्यताशालिवाक्यार्थज्ञानजनकोऽन्यायावयवः प्रतिज्ञेति प्रतिज्ञालक्षणनिष्कर्षः विधेयतोद्देश्यते प्रकारतावि राम॰
शेष्यताभिन्नविषयताविशेषरूप इति व्यक्तमेव हेतुत्वं तभागेनायमादिति गमनीतभागेन चजमस्य बोधस्य विधेयताव साध्यता

212

वच्छेदकेतरेणाधूमत्वानत्वाप्यत्वाद्धि नैवावच्छिद्यत इति न तत्रातिप्रसंगः न च तथापि घटो ज्ञात इमामिति प्रतीतावलन्धरास्य घटोद्भ
मिप्यत्रातिप्रसंगः तत्र दृश्यत्वनिरूपितविधेयतापा निरवच्छिन्नत्वेन साध्यतावच्छेदकेतरधर्मानवच्छिन्नत्वादि
तिवाच्यं न तत्र प्रकृतन्यायावयवयवत्वार्थकसत्वं नाभावादेवानतिप्रसंगात्। अनुमितिविषयत्वं धूमत्वानन्यज्ञानीयं धूमादि
तिन्यायस्थलीयहेत्ववयवेतिप्रसंगवारणाय प्रकृतनयत्वतावच्छेदकावच्छिन्नत्वमुद्देश्यताविशेषयांत तज्जन्यज्ञानोद्देश्यतानुना
नुमितिविषयत्वस्वरूपपसतावच्छेदकावच्छिन्नां तु मुद्धविषयतान्यावच्छिन्नेति तद्वारणं। यद्धि चैकपदार्थयोज्ञानविषयत्व
योर्नोद्देश्यविधेयभावेनान्वय इति नोक्तातिप्रसंग इति विभाव्यते तेन तत्प्राचीनमते जनकतामात्रस्यपंचम्यर्थतया वह्नितानजन
कताधूमज्ञानीयाधूमादित्यत्र हेत्ववयवेतिप्रसंगवारणायेतन्। वस्तुतस्तु प्रकृतिप्रत्ययार्थयोरप्युद्देश्यविधेयभावेनान्वय
बोधानुपगमात्तत्रोपादेयमेव। एवं च वह्न्यादिसाध्यकप्रतिज्ञायां नोक्तरीत्या व्याप्तिः तज्जन्यबोधे वह्निमद्दादेः प्रकारत्वेपि विधेय
तापावच्छ्यादिधर्मएवागमात्धर्मिप्रसक्तेः पदान्तरलभ्यतया शब्देनाविधेयत्वात्। अत एव स्वर्गकामो यजेतेत्यादौ विशेष्यविशे
षणभावेनान्वयबोधाभावेपि स्वर्गमुद्दिश्य यागकरणिका भावना विधीयत इति मीमांसकात्रापि वदंतीत्यतदभिप्रायेणो

213

टी॰

वदीधितिकारेणापि यदि चेत्युक्तमिति। प्रतिज्ञात्वावच्छिन्नाया इति। तादृशप्रतिज्ञाजन्यबोधानामपि अन्यतमत्वाक्रान्तत्वादिति भावः।
एतस्याः तावदन्यतमबोधजनकत्वरूपप्रतिज्ञात्वाक्रान्ततायाः। तत्र प्रकृतन्यायघटकप्रतिज्ञायां तस्यापि पक्षाद्याकाराणामयोग्यवह्निमानित्या
देरपि प्रकृतन्यायत्वेति प्रकृतन्यायावयवत्वेत्यर्थः। ननु तर्हि सत्यन्तघटकप्रतिज्ञायामेव यादृशपक्षसाध्यकत्वं निवेश्यतां न तु
विशेष्यदलेऽपीत्यत आह। सत्यन्तेति। अप्रवेशेनैवेति पाठः। विशेष्यदलेऽपीति शेषः। तस्य यादृशपक्षसाध्यकेत्यस्य सार्थक
त्वादिति। न्यायाच्च सत्यन्तेन दृप्रवेशादेव विशेष्यदलेऽन्तदुपादानमिति भावः। सत्यन्तेन तत्प्रवेशेऽपि विशेष्यदले तत्प्रवेशाभावश्य
कइत्याशयेनाह एवमिति। अतीव गौरवादिति। अत्र तादृशप्रतिज्ञायामतिव्याप्तिर्न भवति तादृश्यानुपूर्व्याः प्रकृतन्यायानन्त
र्गतत्वेन सत्यन्तेन तद्वारणादित्याशयः। प्रामाणिकगौरवस्यादोषत्वादाह निष्प्रयोजनत्वाच्चेति। न्यायाच्च गौरवं न प्रामाणिकमि
ति भावः। अत्र साध्यतावच्छेदकप्रवेशेऽपि इयं युक्तिर्द्रष्टव्या तुल्ययुक्त्या पर्वतो वह्निमानिति बोधानामन्यतमत्वेन लक्षणे साध्यप्रवेशे गौ
रवान्निष्प्रयोजनकत्वाच्च तस्य वक्तुमशक्यत्वात्। परं तु अतिव्याप्तिरूपदोषस्योत्कटतया तत्र तदभिधानमिति ध्येयम्। अतिव्याप्ते
रिति विशिष्टस्यानतिरिक्ततया हेतुत्वं सत्त्वादिति बोधस्यान्यतमत्वाक्रान्तत्वादिति भावः। अभिन्नत्वादिति। न्यायाच्च तत्र हेतुत्व पर्वत

214

रामः

न्यबोधस्यान्यतमबोधानंतर्गतत्वादेवनातिप्रसंगइतिभावः। ननुविशिष्टार्थस्यसाध्यतावच्छेदकावच्छिन्नसाध्यरूपत्वेवह्निसाध्य
कपर्वते ज्ञायामव्याप्तिः तादृशसाध्यवद्रूपत्वे मैत्रः पचतीत्यादिप्रतिज्ञायामव्याप्तिरत आह विशिष्टार्थत्वेति। अनास्येतिनया
वन्मैत्रः पचतीत्यादौ तादृशसाध्यरूपो विशिष्टार्थोऽप्रसिद्धः पर्वतो वह्निमानित्यादौ तादृशसाध्यवद्रूपो न्यायघटकतिनोक्तदोषइति
भावः। एवं सिसाधयिषयाभावप्रयोगाश्रयेणानकस्यापि संशयस्येति भेदादिकोटिकसंशयस्यैवार्थः। तथाच्चेन तादृशीत्वादि
प्रतिज्ञायामव्याप्तिः तस्याः तावद्बुद्धनिवर्त्त्योपि इतरकोटिकभेदविशेष्यकसंशयाहित्वद्वभिन्नेतरभेदादिकोटिकसंशयानिवर्त्त
कबोधाजनकत्वादिति भावः। सामान्याभावेति तावदन्यतमत्ववह्निवर्त्त्व सामान्याभावेत्यर्थः। यत्तु तादृशबोधभेदकूटवद्भिन्न
त्वरूपान्यतमत्ववह्निवर्त्त्वसामान्याभावस्य गुरुत्वयातद्रूपेऽस्यन तद्विशिष्टार्थबोधानिवर्त्त्यत्वाभावकूटस्यैव लघुतयानिवेश्यो
चित्यमितितादृशत्वेतस्य लघुत्वेतद्घटितस्य लक्षणान्तरत्वेन तादृशसामान्याभावस्याखंडतयातद्घटितप्रकृतलक्षणोऽदोषात्।
यद्वासामान्याभावेतितादृशनिवर्त्त्यत्वाभावकूटवत्संशयानिवर्त्तकत्वसामान्याभावेत्यर्थः तेन तन्तद्विशिष्टार्थानिरूप्यत्वावच्छि
न्नप्रतिबंधकतानिवेशस्य वक्ष्यमाणरीत्यावश्यकत्वेनान्यतमत्वानिवेशेपि नदोषइति ध्येयं भेदाश्रयत्वेति भेदाश्रयत्वादी

215

री·

सर्थः। भेदकोटिकेति भेदादिकोटिकेत्यर्थः। भेदप्रकारकेति भेदादिप्रकारकेत्यर्थः। नेतरारोपेति नेतरारोपेत्यादीत्यर्थः। नन्वत्र लक्ष्ये

णे बोधानां तत्तद्व्यक्तित्वेन निवेशे न हेतुत्वं तन्मागादिजन्यबोधानामनिवेशात्तज्जनकहेतुत्वं तन्मागादावतिप्रसंगवारणायोपात्तमति

वर्त्तकांतं व्यर्थमत आह। अत्रेति बोधत्वादिनैवेति एवकारेण तत्तद्व्यक्तित्वव्यवच्छेदः। अन्यतमांतर्गततयेति पर्वतविशेष्यकाभे

दसंसर्गकवह्निमत्प्रकारकबोधत्वेनैव लक्ष्यतानिवेशादिति भावः। ताद्रूप्यस्यैव हेतुत्वे तज्जन्यबोधस्यैवान्यतमत्वघटकत्वा

दित्याह यत्ताद्रूप्यवह्निमत्प्रकारकबोधत्वेन वह्निधूमज्ञानत्वाद्यानवेति संशयं प्रतिनिवर्त्तकत्वाभावेन ताद्रूप्यसंशयनिवर्त्तकबो

धजनकहेतुत्वं तन्मागाद्वैनाति व्याप्तिरिति भावः। वैयर्थ्यमिति धूमादावालोकवन्निष्पादितहेतुत्वव्यवधानातिप्रसंगवारणाय हि। अन्यूनपदा

र्थोपादाने न च्यूनसंभवति नत्र प्रतिज्ञाजन्यविशिष्टार्थबोधत्वेन हेतुत्वं धूमीयं नवेति संशयं प्रतिनिवर्त्तकत्वाभावेन तादृशसंशयाति

वर्त्तकबोधजनकत्वस्य हेतुत्वव्यवच्छेदकत्वेनैवातिप्रसंगाभावादित्याशयः। बोधत्वेनेति। निष्प्रयत्नेनेत्यर्थः। अप्रामाण्यज्ञानास्कंदि

तबोधसाधारण्यस्य तादृशविशिष्टार्थबोधत्वस्य निवर्त्तकतानवच्छेदकत्वादाह। अप्रामाण्यज्ञानानास्कंदितेति। तत्तायार्थोऽवच्छेदक

त्वं निवर्त्तकत्वान्वितं तेनाप्रामाण्यज्ञाननिरहितत्वे तेन पर्वतो वह्निमानित्यादिप्रतिज्ञायाः स्वाहशाविशिष्टार्थेति अप्रयत्नाव्यवच्छिन्ना निवर्त्यसं

216

राम०

217

वंधीवह्निमान्पर्वतेत्याद्याकारकैकदेशासंशयनिवर्त्तकबोधजनकत्वेपिनाव्याप्तिः। तादृशनिष्ठप्रत्ययस्यैकदेशसंशयानिवर्त्तकतायां
स्वरूपसंबंधरूपावच्छेदकत्वाभावेप्यनतिरिक्तवृत्तित्वरूपावच्छेदकत्वेनतत्संशयस्यतादृशनिष्ठप्रकारत्वावच्छिन्नानिवर्त्यत्वाभावेना
करीत्याव्याप्त्यभावात्। अतएवाग्नेर्धूमादालोकवानित्यादौहेत्ववयवादतिप्रसंगवारणायान्यतमोबोधइतिवक्ष्यमाणोसंगच्छते
अन्यथातत्रहेतुज्ञप्त्यबोधनिवर्त्यहेतुत्वंधर्मोपनयेनेतिसंशयंप्रतिप्रतिज्ञाप्रतियायविशिष्टार्थविषयकनिष्ठप्रत्ययत्वेनानिवर्त्त
कतयानदसंगतेः। अव्याहतमितितथाचतादृशसंशयानिवर्त्तकबोधजनकत्वान्नहेत्वंतभागादतिप्रसंगइतिभावः। अतएव
उक्तार्थविवक्षयाहेव। निवर्त्तकत्वेनसिद्धिविधयानिवर्त्तकबोधजनकत्वेन। ननूक्तानुमितेस्तादृशबोधनिवर्त्यतयानोक्तासंभ
वइत्यतआहनादृशानुमितेरितिविशिष्टार्थबोधत्वावच्छिन्नेति। सिसाधयिषाकालीनबोधस्यानुमितेर्निवर्त्तकतयानादृशबो
धत्वेऽनतिरिक्तवृत्तित्वरूपावच्छेदकत्वासंभवादितिभावः। ननुअनिवर्त्तकत्वंप्रतिबंधरूपनिरुक्तफलानुपहितत्वंतच्चप्रतिज्ञाजन्य
बोधस्यसंभवतीतिनासंभवइत्यतआह अनिवर्त्तकत्वइत्यादि। तथाचनिरुक्तस्वरूपायोग्यत्वमेवानिवर्त्तकत्वंप्रकृतेविवक्षितं
यथाऽसंभववारणायसंशयपदंसार्थकमेवेतिभावः। प्रत्यक्षत्वनिवेशेनाप्युक्तदोषवारणासंभवइत्यतआह एवमिति।

टी. 25

घाद्बोधइतिविपरीतनिर्णयात्मकस्यापिप्रत्यक्षस्यादिति।एतदंनेनतादृशबोधाविवर्त्यत्वंप्रत्यक्षेऽव्याप्तेरदाहपेतिप्रतिज्ञाजन्यमुख्य
द्बोधस्यविपरीतनिर्णयात्मकस्यतादृशबोधानिवर्त्यतादृशप्रत्यक्षनिवर्त्तकत्वेनासंभवादितिभावः।प्रत्यक्षेतादृशबोधानिव
र्त्यत्वमेवविवक्षितंतादृशप्रत्यक्षमितिप्रतिबंधकतयेतिमतभेदेनचैतत्।तत्रसत्वादितिविशेषदर्शनकालीनबोधसाधारणता
दृशबोधत्वस्यानतिरिक्तवृत्तित्वरूपनिवर्त्तकतावच्छेदकत्वासंभवादित्याशयः।धूमादालोकवानित्यादि।एतदपिप्रायःपूर्वोक्तो
वेदितव्यः।तादृशेति।तादृशबोधानिवर्त्यस्येत्यर्थः।अप्रमितमोबोधइतीति।इदंचानूनाधिकविषयकत्वनिर्वचनेनानुधूमाद्वह्निमतःसधर्मा
पर्वतोवावह्निमानित्यादौहेतुत्वेनसमुदायेऽतिव्याप्तिः।तत्रवह्निधूमवत्तानव्याप्यानवेतिसंशयस्याप्यतमबोधनिवर्त्यत्वेनतदनिवर्त्त
संशयानिवर्त्तकबोधजनकत्वाभावात्।अतआह।धूमाद्वह्निमानितिधूमादालोकवानित्यादौप्रतिज्ञाजन्यबोधस्यालोकनिष्ठधूमसज्ञानतात्प
दिज्ञानेपुत्र लक्षणाऽव्याप्तकत्वमेव पंचम्यर्थः। नित्यद्रव्यादिज्ञानोत्पादिकत्वाभावे नैवज्ञापकतालाभ इत्याशयादप्यत आह। अत एवेति।
आरब्धायां लक्षणाविरहादेवेति लक्षणाविरहेणा पंचम्या ज्ञापकत्वलाभस्याकलनादेवेत्यर्थः। तेन पंचम्या ज्ञापकत्वे लक्षणाविरहइ
त्यस्मिन्ग्रंथस्वारस्यं। अनन्वयेतितथा च कुतो वाह्निमानित्यत: किंनिष्ठज्ञापकताकवह्निमत्तित्यन्वयबोधोनस्यादितिभावः। पूर्वोक्तेतिग्रंथा
न्तरयोः समानविषयकत्वनियमादिति भावः। न घुत्वादिति। अन्यथा गांगापांघोषइत्यादावपि बाधितार्थानुकूलत्वादाध्याहारेरोव
निर्वाहे लक्षणाकल्पनमपि न स्यादिति भावः। अत्रेमिश्रानुयायिनः। कुतः धूमादित्यनयोः प्रश्नोत्तरभावनिर्वाहानुरोधेन पंचम्या ज्ञापक
त्वार्थकत्वमावश्यकं तथा च प्रतिज्ञास्य साध्यपदस्य साध्यज्ञाने लक्षणायां मानाभावइति दीधितिकृदुक्तमसंगतं तथाहि तद्दृहंवन्हि
मदिति वाक्येन पर्वतं धूमाद्वन्हिमत्वेन तद्दृह इत्यस्याप्यतेतदावह्नि सहकृतेन कुत इति प्रश्नवाक्येन तु वन्हिपदज्ञानलक्षणासहकृ
तेन किंहेतुकज्ञानविषयवन्हिमदित्युक्तरूपतात्पर्यसंतितनधूमादित्युत्तरस्य तितेनोत्तरेण तद्दृहंवन्हिमदितिपूर्ववाक्यादिसहकृते
न धूमज्ञानज्ञाप्यवन्हिमदिदमितिप्रतिपाद्यः प्रत्येतीति शीघ्रमश्नोत्तरभावनिर्वाहे साध्यपदस्य साध्यज्ञाने लक्षणापां बाधक

258

१५०

भावइतिवदंति। पंचम्यांजनकत्वज्ञापकतार्थकतांदूषयति दीधितौ दाहहइत्यादि आख्यायंताभ्यां हेतुत्वज्ञापकत्वाभ्यां। तदभा
वोपिहेतुत्वाद्यभावोपिनैनैव। निरूपकत्वेनैव। नत्वत्रितिति निरूपकत्वस्यवह्निनियामकत्वेदहनवह्निहेतुतादाहहेतुरितिप्रतीत्यापत्तिः
दूस नियामकसंबंधस्याभावप्रतियोगितावच्छेदकत्वेदहनवह्निहेतुतानदहनेइतिप्रतीत्यापत्तिः। ता[illegible]दृशहेतुत्वस्यदाहेनिरूप
कतयावृत्तेर्दहनेऽवृत्तेश्चेतिभावः। एकत्रैव। एकयैव। एकप्राभ्राजन्यत्वशक्ता। अयंघटः। तयैव। जन्यतायांनिरूपकतासंबंधेन
जन्याद्यभावएवं। अस्तुप्रतीतिविषयोस्तुतथाचभवतामपिदृष्ट नियामकसंबंधस्याभावप्रतियोगितावच्छेदकत्वावश्यकत्वेन
जनकतादेः पंचम्यर्थतायांनोक्तदोषइत्याशयः। यद्वातथैवंदाहहेतोर्जलादिनिष्ठजनकतादेर्निरूपकतासंबंधेनाभावएवं। अ
स्तितिउक्तार्थेतथाचजन्यतादेः किंपंचम्यर्थतयेतिभावः। आधेयतयाघटान्वितदंडजन्यत्वेपंचमीशक्तोपरिभाषापदेतर
पंचमीत्वस्यार्थनिरूपितत्वाभावान्वये अप्रथमांतविशेष्यकबोधानुपपत्तिर्घटपदार्थघटवृत्तिजन्यत्वेदंडस्यनिरूपितत्वसंबं
धेनोक्तनिरूपितत्वाभावस्यचानन्वयेनामार्थयोरितिव्युत्पत्तिभंगइत्याशयेनाह। अत्रघटपदस्येत्यादि। पंचम्याः पंचमीद्व
यस्यतत्प्रकारस्य। अयंदंडाद्धिपंक्तेःप्रकारस्यजन्यत्वसामान्यवृत्तिजन्यतात्वावच्छिन्नस्यार्थः। जनकधात्वर्थइत्यादिगागनप

259

९६

दी०

रिमाणानिरूपितत्वेति वस्तुगत्यातस्मिन्ननिरूपितत्वेस्त्वर्थः उभयस्यैतद्रुभयत्वावच्छिन्नस्य उभयाभाववत्तत्सामान्यक गगनमिति।
उभयाभाववद्वृत्त्यन्यतावच्छिन्नवृत्तिसंबंधप्रतियोगीत्यर्थः संबंधश्च संबंधत्वेन जन्ययोग्यतरत्वातार्थः क्वचिज्जन्यतासामान्यकमिति
वः पाठः उभयाभाववज्जन्यसामान्यकं जन्यत्वमिति पाठस्तु प्रामादिकः अत्र गगनस्य जन्यतासामान्ये स्ववृत्तित्वस्य परिमाणानिरूपितत्वो
भयाभाववत्वमेव संबंधः एकस्यैव प्रकारभेदेन द्विधाभाने बाधकाभावात् नन्वेवं दाहो दहनादित्यादौ जनकतायाः पंचम्यर्थत्वेपि
जलपदस्य जलत्ववृत्तिजलत्वलक्षणया दाहेदहनहेतुताकः जलवृत्तित्वाभाववद्धेतुताकत्वेन बोधसंभवेनैवानुपपत्त्यभावे पंचम्या ज
नकत्वार्थकत्वस्यायोगोनुचितः नचजन्यत्वशक्तौ वा निर्वाहे लक्षणानुचितेति वाच्यं जलादेरजनकत्वभ्रमदशायां जन्यत्वशक्त्यैवा
निर्वाहेण लक्षणाया आवश्यकत्वादित्यत आह तं यत्नवितेनेति यत्र शक्तौ वा निर्वाहस्तत्र लक्षणावश्यकत्वेपि सर्वत्र त
न्नस्यावश्यकतया जन्यत्वशक्तौवोपपत्तौ लक्षणाया अन्याय्यत्वेन पंचम्या जनकत्वार्थकत्वस्यागत्यैवोचितमित्याशयः एतेन श
शविषाणां नास्तीति वाक्यवत् दाहो न पाथिमोऽस्मादित्यादि वाक्यमप्रमाणमेवैतादृशवाक्यस्य प्रामाण्यानुरोधेन लक्षणायाभीमां
उत्पादितनिरूपितत्वाभावबोधस्याप्यविरुद्धत्वमुपपादितमिति दाहो न जलादित्यादिवाक्यात् लक्षणाज्ञानभूम्यकालेपि अन्वयबोधस्यानु

रा०

260

माविकत्तयाजन्यत्वाभावबोधकता। पिनाहृशवाक्यस्योपगंतव्येतिनवीनोक्तं परास्तं। उक्तरीत्यैवनत्वाभाण्यापपत्तौतदनुपगमानौ
चित्यात्। नाहृशानुभवेविप्रतिपन्नंप्रतिजन्यत्वशक्तिभ्रमस्यापन्नासंभवाच्चेतिदिक्। तत्र अयं हृंडाहित्याघुनस्थले। संबंधेनैवेति।
नतीयार्थेविच्छिन्नप्रतियोगिताकत्वमभावान्वयिजन्यतायांपंचम्यर्थजन्यतायांअभावेनअभावसत्वेन। नाहृशेतिपंचम्यर्थस्य
र्थः। नाहृशेतिगगनपरिमाणेत्यर्थः। सममपीतितत्यान्वतस्यर्थसहिधान्वयेनगगनपरिमाणानिरूपितत्वाभावस्यजन्यत्वाभाव
वद्गगनमितिबोधइत्याशयः। ननुएकपदार्थस्यैकपदार्थद्वयमन्वयइत्यत आह इत्थमितिभावप्रत्ययार्थप्रकृत्यर्थस्य वारद्वय
मन्वयोपपद्यते अन्यथाइनरस्यत्वमित्वमभावः साकल्यंहुत्तिमत्त्वेति पंचसुभावप्रत्ययशतसाघटत्वमिखारो घटेतराहत्तित्वेसति
सकलघटवृत्तिम[illegible]दिसादिबोधानुपपत्तेस्तथेहापीतिभावः। तद्दंतीति अत्रभावप्रत्ययस्थले न्याया
नुपपत्त्याबारद्वयमन्वयोपगमेप्यत्रोक्तरीत्याबारद्वयमनभ्युपगम्यैवनिर्वाहेनतदभ्युपगमोनुचितइत्यस्वरसोबोध्यः। भूमादाली
केतिप्रकृतसाध्यान्वितस्वार्थबोधकत्वस्थानेप्रकृतहेत्वन्वितस्वार्थबोधकत्वनिवेशेआलोकसामग्रीमत्वादित्यालोकवान्सर्वन
इत्यादौनातिप्रसंगइतितत्परीत्यागः। प्राथमिकस्य। प्राथमिकस्थलीयपंचम्याः प्रकृतसाध्येतिपंचम्याइत्यादिः बोधकत्वेपी

261

४०

टी०

तिप्रकृतसाध्यस्येति शेषः। प्रकृतपक्षेति। अत्र धूमाद्वह्निमत्तद्रूपाशेषपक्षतावच्छेदकवह्निमत्वस्यापि पक्षमानादुद्वमाणीयेपक्षता
वच्छेदकप्रवेशलाभाय प्रकृतेति। इत्यादेः। तत्स्थलीयधूमपदोत्तरपंचम्याः साध्यान्वितसार्थेति धूमज्ञानज्ञाप्यवह्नित्वेन वह्नेरेव साध्य
त्वादितिभावः॥ तादृशेति निरुक्तपदोपस्थापितार्थकं। प्रकृतसाध्येति साध्यतावच्छेदकतापर्याप्त्यधिकरणावच्छिन्नसाध्येस्मर्यः। स्वा
र्थबोधकत्वाभावादिति धूमज्ञानज्ञाप्यवह्नित्वावच्छिन्ने धूमज्ञानज्ञाप्यत्वस्यानन्वयादितिभावः। तस्यैव धूमज्ञानज्ञाप्यवह्नित्वावच्छि
न्नस्यैव। तथात्वेपि तादृशवह्नेः प्रकृतसाध्यत्वेपि प्रकृतसाध्ये साध्यतावच्छेदकतापर्याप्त्यधिकरणावच्छिन्नसाध्ये। धूमज्ञानज्ञा
प्यवह्नित्वावच्छिन्नवह्नावितियावत् अनन्वयमेवोपपादयति तर्हीति विशिष्टेति अवच्छिन्ने इत्याद्येवेति एवकारेणास्वार्थबोधक
पदोपस्थापितत्वव्यवच्छेदः। वह्नेः साध्यीभूतवह्नेः। एकत्वात् पक्षतावच्छेदकवह्न्यभिन्नत्वात्। ननु एवं तदुपादानेपि कथं वारणमत
स्यैव वह्नेस्तादृशोपस्थापितत्वाक्रांतत्वादत आह। तत्पदेदत्तेत्विति। अतिव्याप्तेरनवकाशमेवोपपादयति धूमादित्यादिना प्रकृतप
क्षेति। किं तु साध्यवाचकवह्निपदजन्यैवोपस्थितिस्तादृशीतिभावः। तदाह पक्षतावच्छेदकवाचकवह्निपदमादाय प्रकृतपक्षेपि प
क्षतावच्छेदकावच्छिन्नेत्यर्थः। अनुपादेयमेवेति उक्तस्थले वस्तुगत्या प्रकृतसाध्यात्मकस्यापि पक्षतावच्छेदकवह्नेः पक्षतावच्छेदकता

राम०

262

47

तं१

वच्छिन्नविशेष्यतानिरूपितविशेषणतानाश्रयत्वेनातिप्रसंगाभावादित्याशयः नद्यलंस्वार्थबोधकपदोपस्थापितपदार्थे इति नो
तत्रस्वमिति गमने योगीति पर्वतो धूमाद्वह्निमानित्यादिस्थलीयतस्माद्धूमाद्वह्निमानित्यादिनिगमने योग्यत्यर्थः। व्याख्यायां त्वप्रत्ययार्थ
इति एतद्व्यवहितोत्तरमेव नदंतं यत्प्रमेयपदमिति पाठः। नदंतमित्यस्य त्वप्रत्ययांतमित्यर्थः त्वप्रत्ययार्थ इत्यनंतरं त्वप्रत्यय
श्चेत्यादिविधानादित्यंतपाठस्तु प्रामादिकः संपातायातः एतन्न्यूनत्वोविभक्तित्वस्याप्रवेशेन तदुपपादनप्रसंगस्यैवाभावात्
त्वप्रत्ययस्यादिशः प्राप्ताभावेन विभक्तित्वविधानायोगाच्चेति ध्येयं। कर्मधारतस्यामुख्य कर्मधारतस्य। अत्र येगोत्वादेर्व्युत्पादिति
पंचम्यंतनतत्पदमात्रायनिगमनेनातिप्रसंगवारणायत्वात्प्रसक्तिकपदमित्यादि पूर्वोक्तरीत्यावोध्यमितिभावः। केचित्तु त्वविभ
क्तित्वनिवेशोपितात्पर्यत्वेन भूतलं रूपवत्साध्यकघटः शुक्ल इति प्रतिज्ञास्थलीयतस्मात्शुक्ल इति निगमनेनातिव्याप्तिः तस्यापि
निरुक्तसाध्यान्वितस्वार्थैकत्वबोधकप्रथमाविभक्त्यंतशुक्लपदवत्त्वात् तद्गुणात्मकशुक्लशब्दस्य गुणिलाक्षणिकत्वाच्चेति पंच
मीपदोपादानमित्याहुः तन्नासत् प्रकृतपक्षतावच्छेदकावच्छिन्ननिरूपितविशेषणतावच्छिन्नसाध्यतावच्छेदकावच्छिन्नस्य
धर्मीयविशेष्यतानिरूपितस्वार्थविषयताप्रयोजकत्वं बोधकांतार्थः एवं च बोधकांतमेव पंचमीपदार्थः पंचमीत्वं न निवेश्यं

दी०

व्याप्त्यतिप्रसंगाभावेन प्रयोजनाभावादिति प्राहुः इति लिंगिकज्ञानविषयस्य॰ हेतुत्वेनावगतज्ञानविषयस्य॰ तद्व्याप्तीति॰ ज्ञानव्याप्ती
त्यर्थः॥ अतिव्याप्तमिति॰ निगमनत्वस्य पंचम्यंतत्वपदनियतत्वात् तन्नास्त्रिणाकयं चम्पादिपदघटितत्वनियतत्वाद्वेति भावः॥ विशिष्टमि
ति॰ एवं चोक्तरीत्या पंचम्यंतेन तत्पदेन लक्षणाविरहान्नातिप्रसंगः इत्याशयः तादृशेति उक्तनियतेत्यर्थः तत्प्रतिज्ञात्वादिकमिति धूमाद्या
लोकवान्पर्वत इत्यादिप्रतिज्ञात्वादिकमित्यर्थः॥ पूर्ववदिति साध्यादिभेदेन प्रतिज्ञादेर्भेदात् तत्साध्यकादिप्रतिज्ञात्वादेरप्यवयवता
वच्छेदकत्वादित्याशयः॥ विरुद्धमिति हेतुपदार्थस्यैव व्याप्यत्वप्रदर्शनौचित्यादिति भावः॥ आप्रायेनेति मूलोक्तलक्षणं दूषयितु
मिति शेषः॥ व्याप्यवदिति तथा च धूमादित्यादिहेतोः पंचम्यंतत्वाद्यघटितपदत्वाभावेनासंभवान्मूलोक्तलक्षणं दुष्टमिति भावः॥
नस्यादिति न च पंचम्याजन्यज्ञानविषयत्वरूपव्याप्यतार्थकत्वेपि जन्यैकदेशजन्यत्वे धूमादेरन्वयात् साम्यमिति वाच्यं चैत्रस्य नप्ते
त्यादाविव ससंबंधिके पदार्थैकदेशे पदार्थान्वयस्वीकारेपि निष्प्रतियोगिके तदस्वीकारात्॥ सत्वादिति॥ तथा चोक्तस्यत्वा
नुरोधेन ससंबंधिक इव पक्षे साध्यानुरोधेन सविषयेपि पदार्थैकदेशे पदार्थान्वयस्वीकारो न दोषाय इति भावः॥ आश्रयमिति धूमा
दित्यादिस्यादित्यंतेनोक्तमाश्रयमित्यर्थः॥ यदवच्छिन्नज्ञानस्य पदवच्छिन्नविषयकज्ञानस्य पंचम्येति शेषः॥ हेतुत्वं ज्ञानजनकत्वं

264

राम०

धूमज्ञानस्य। धूमत्वावच्छिन्नज्ञानस्य। धूमज्ञानज्ञानस्यैव। धूमज्ञानत्वावच्छिन्नज्ञानस्यैव। एवकारेण।

प्रतिपाद्यते बोध्यते तस्यैव। तदवच्छिन्नस्यैव धूमत्वावच्छिन्नज्ञानव्यवच्छेदः। [illegible] धूमज्ञानस्यैवेति एवकारेण। धूमस्य व्यवच्छेदः। न हेतुविशेषदर्शनं धूमस्येति हेतुपदप्रतिपाद्येति हेतुपदजन्योपस्थितिमुख्यविशेष्येत्यर्थः। व्याप्यत्वदर्शने। व्याप्यत्वप्रदर्शने। यद्धर्मविशिष्टस्य व्याप्यत्वादिनियममनुपेत्य यदवच्छिन्नज्ञानस्य त्वादिनियमोपगमे इति फलितार्थो बोध्यः। न प्रतिपाद्येति हेतुपदप्रतिपाद्येत्यर्थः। विषयतावच्छेदकत्वादिनियमः यथार्थधूमज्ञानज्ञानस्य ज्ञानजनकत्वरूपहेतुत्वान्वये विशेषणधूमज्ञानस्यैव तद्विशेषणधूमस्यान्वयात् विशिष्टान्वयस्यौत्सर्गिकत्वादिति भावः। तस्यापि धूमस्यापि तदुपदर्शनेति व्याप्यत्वेनोपदर्शने इत्यर्थः। न च तादृशीधितौ यथार्थधूमज्ञानादित्यादिप्रयोगे पि धूमादेरित्यत्रापि धूमादेरि त्यनंतरं योजने न तादृशप्रयोगे धूमादेरपि व्याप्यत्वेनोपदर्शनप्रसंग इत्यर्थ इत्याशयः। अप्रयोजकत्व इति यदवच्छिन्नज्ञानस्य त्वादिनियमस्य तत्वादितया व्यभिचारेण न तादृशनियमः प्रामाणिक इत्याशयः। मन्मत इति यद्धर्मविशिष्टस्य व्याप्यत्वादिनियमो नीकर्तुन्न व्यस्य मत इत्यर्थः। एतेन यथार्थधूमज्ञानादित्यादिस्थले धूमादेर्ज्ञापकज्ञानविषयताबोधादाकांक्षासंभवे तादृशनियममनभ्युपगम्य व्याप्यत्वोपदर्शनस्य नवीनमते पि दुरपवादत्वेति नवीनो क्तेः परास्तं। तथा सति सर्वत्र यद्रूपेण तादृशनियमाभ्युपगमस्त त्

दी०

न रोधेन तद्ग्रहणस्य दुर्वारतापत्तेः तस्यैव धूमज्ञानस्यैव तद्भावात् धूमज्ञानस्य हेतुत्वेनान्वयसंभवे तदनुपपत्त्यभावात् तत्रेति धूम
ज्ञानादिस्थलेऽपि सर्वः धूमज्ञानज्ञानस्य हेतुत्वालाभेनेति शेषः ॥ विषयतावच्छेदकत्वलाभादिति ॥ न चास्तु तत्र धूमज्ञाने तन्निष्ठामकव्याप्त्यादौ

५५ 266

जिज्ञासानुपपत्तिरिति भावः ॥ तदुपपत्तिः व्याप्त्युपदर्शनोपपत्तिः धूमज्ञानज्ञानस्य हेतुत्वलाभादिति भावः ॥ तत्रेति अस्यैव विवरणं धू
मज्ञानादिस्थलेऽपीति एवं धूमज्ञानस्य व्याप्यत्वेनास्यैतदनुपपत्त्या धूमज्ञानादिस्थले ज्ञानज्ञानत्वस्य स्वीकारे नवक्ष्यमाणापत्तिरत आह
धूमस्यैवेति ॥ तदुपदर्शनानुपपत्तिरिति परंपरावच्छिन्नज्ञानस्यत्वादिति यस्मांगीकर्तुमतद्रूपस्यादिः ननु यत्र पंचम्याज्ञाप्यत्वमेव नास्त्यर्थत

तीप

त्र नवीनमते ज्ञानज्ञाप्यत्वलक्षणासंभवोऽत्यत आह पंचम्यास्त्विति निरूढेति तथा च धूमादिपदोत्तरपंचम्याः सर्वत्र ज्ञानज्ञाप्यत्व एवाभिहिता
त्पर्यसत्त्वान्न दोष इति भावः ॥ निरूढलक्षणेति ज्ञानज्ञानस्यादिं प्रत्विति विनिगमकाभावादिति भावः ॥ ननु वं चैत्रे घटज्ञानमित्या

ज्ञान ३

दावपि ज्ञानत्वेन बोधापत्तिरत आह समभिव्याहारेति पंचम्यास समभिव्याहारस्य नियामकत्वान्नातिप्रसंग इति भावः ॥ समानेति ज्ञा
नज्ञाप्यत्वेन निरूढलक्षणांगीकारेऽपि सर्वत्र पंचम्यांतद्बोधकत्वेन समभिव्याहारविशेषस्य नियामकत्वमावश्यकं वाच्यमिति भावः ॥
लाघवादिति तथा च लाघवमेव विनिगमकमिति भावः ॥ प्राहुरिति पूर्वमतोक्तदूषणानवकाशादेव प्रकर्षः ॥ हेतुपदप्रतिपाद्यमि

राम०

नस्यापीसाधुकरीसाधूमत्त्वानादित्यत्रधूमादेर्व्याप्यत्वोपदर्शनप्रसंगात्स्वरूपदोषानुद्धारेणानचज्ञानपदस्यैवस्वार्थशंकानवतारात्
वाद्धुरित्यत्रास्वरसोबोध्यः। द्रुतरेतिअन्यतादृशाबोधानुपधायकप्रतिज्ञायामव्याप्तिः बोधकत्वेस्वरूपयोग्यत्वानिवेशेपिउदाहर
णोऽतिव्याप्तिः। उदाहरणाबोध्यार्थप्रविष्टसाध्यादेः प्रतिज्ञाजन्यबोधे इतरान्वितत्वादिति चेन्न। ससंतस्यस्वाघटकपदांशादि
मत्पदघटितत्वेसतीत्यर्थकत्वेनादोषात्। इदं च सत्संतं च। द्वितीयेतिस्वीयमिसादिजनकत्वेसतीत्यंतमित्यर्थः। तृतीयेति अंसप
दघटत्वस्वादिबोधाजनकान्यत्वेचसतीत्यंतमित्यर्थः। अवयवांतरेति हेतूपनयादीत्यर्थः। अंसपदाभावादिति ननतादृशत्वमित्यग्रि
मेणान्विनंतादृशत्वंतादृशबोधजनकत्वात्। नेयंहेतूपनयनिगमनानांवारणाय द्वितीयसत्यंतेनेत्यादि। अतिप्रसक्त्वान अंसपदेपि
व्यापसज्यवृत्तिधर्मावच्छिन्नभेदसत्वादिति भावः। नचैवमुसत्तेरिति अंसपदसमभिव्याहृतभेदबोधकपदघटितेचैत्रस्य ○ पुत्र
भिन्नोयंपुत्रइत्यादौभेदानुयोगिनितदीयत्वंभेदप्रतियोगिनितदीयत्वंचासत्त्वेपिसिद्धं अन्यथाऽप्रसिद्ध्यापत्तेः मैत्रीयांशस्यपुत्रभि
न्नचैत्रीयांशस्यपुत्रेपितादृशप्रयोगापत्तेरितिभावः। स्वीयांत्यभिन्नेतिस्वीयत्वंस्वघटकत्वंतथाचस्वघटकपदांशपदभिन्नंयत्स्व
घटकपदंतद्घटितविशेष्यकबोधजनकत्वेसतीत्यर्थः। स्वघटकपदांशत्वंचकालिकसंबंधेनस्वघटकपदवद् ○ ध्वंसप्रतियोगित्वं

नच स्वघटकपदत्वं तद्ध्वंसप्रतियोगित्वस्यैव स्वघटकांशपदभिन्नत्वं निवेशनीयं लाघवादिति वाच्यं तद्घटितस्य जन्यसंसर्गस्यान्तरत्वेन प्रकृ
तेऽपि प्रयासं निवेशो वैयर्थ्यात्। उपनयादिघटकस्य पदमात्रस्य कालिकसंबंधेन यत्किंचित्स्वघटकध्वंसप्रतियोगित्वात् पदध्वंसप्रतियोगि
त्वासंभवेन न तत्रातिव्याप्तिरतः स्वघटके त्वंशस्य विशेषणापदविशेषणं। स्वीयपदभिन्नस्वघटकार्थकमिति शेषः। न चानुषंगपक्षे उपनयस्था
यिपदस्यापि स्वघटकत्वानपायान्न निगमनवारणमिति वाच्यं। एतल्लक्षणस्यानुषंगपक्षाभिप्रायकत्वेनादोषात्। उपनयादेरपि ता
दृशपदार्थविशेषणकान्वयबोधजनकत्वेन तत्रातिव्याप्तिवारणाय विशेष्यपदं मुख्यविशेष्यपरं। स्वीयपदनं संस्वीयांशपदभिन्नेदं
च एतावन्मात्रं च। दृष्टान्तविनिहेतुत्ववयववद्वृत्तिशेषः। तस्य स्वीयांशपंचमीरूपपदार्थहेतुत्वविशेष्यकान्वयबोधजनकत्वेन तन्निगमनलाभा
वान्नातिप्रसंगः पक्षाद्वैविभक्तं तत्पदार्थेति तस्यान्वयबोधवाक्यत्वादिति भावः। प्रकृते तु नञ्द्वयगर्भलक्षणे तु पंचम्यर्थस्यैवेति हेतुत्व
स्येति शेषः। तत्वेनेतीति तत्त्वेनेत्यस्य हेतुत्वेनेत्यर्थकत्वादिति भावः। तदर्थेति स्वीयानंशपदार्थेत्यर्थः। अप्रसिद्धिरिति तथा च तादृशबोध
जनकभिन्नत्वस्याप्रसिद्धौ प्रतियोग्यप्रसिद्ध्या असंभव इति भावः। आनियामिका। अप्रयोजिका। बोधाजनकपदेनेति। तथा च यदवयवजन्यबोध
विशेष्यतायां स्वीयांशपदजन्योपस्थितिप्रयोज्यत्वाभावस्तद्भिन्नत्वं तृतीयसंतार्थः पर्यवसन्नः। तादृशविशेष्यतायां च मुख्यत्वं नि

वैयर्थ्यं नातो भिन्नहेतुव्याप्यधूमवत्त्वादिप्रकारतानिरूपितधूमवत्त्वादिविशेष्यतायां तादृशधूमवत्त्वादिपक्षजन्योपस्थितिप्रयोज्यत्वे पुनर्यादृशविति
प्रसंगः। न च तादृशविशेष्यतायां तादृश्योपस्थितिप्रयोज्यत्वमेव सम्यक् तं न च तद्घटकगर्भतयेति वाच्यं। अनुयोगिनिरूपितत्वनिवेशेना

269

ननुगमात्। अंशतः पक्षत्वस्य वैयर्थ्यापातात् तत्स्थलस्मरणान्तरत्वेन प्रकृतेन तस्यानिवेशाच्च। अत एव बुद्धिस्थितनियामिकेति नञ्
भूमः। अग्नेश्च बोधजनकपदेनेति के चित् अग्निबोधजनकान्येति पाठोऽत्र सम्प्रामाणिकः। तस्याप्यसंभवमुक्तदोषदुष्टत्वात्। तत्रान
न्वितेति स्वघटकपदार्थाकांक्षादिमत्पदार्थघटितं यद्यत्वं तद्भिन्नत्वस्य सम्पर्कः तद्घटितत्वात् तस्य संतार्थत्वात्। ननु अग्निमत्संतेयपद्यात्स्वत्वस्य प्रति
योगिकोटौ निवेशः कृतः तथा च अयमसंतेन स्वत्वस्य प्रतियोगिकोटौ निवेशो निष्फलतानकतया नादृश इत्याह अस्य चेति अग्निमत्सं
ते स्वत्वस्य प्रतियोगिकोटौ निवेशस्य चैयर्थ्यं। हिंसितत्वाच्चान्यत्रापि स्वत्वस्य तद्व्यक्तिनिवेशात् तात्पर्यमस्येति भावः। अत एवास्य पदस्व
त्वस्यानुयोगिनि स्वत्वघटितत्वेननुगमं परिहरति अंशत पक्षत्वं चेति। स्थलकालमाहात्म्यप्रसिद्धिनिबंधनासंभववारणायाह स्मरणो
त्पत्तिके त्यादि सन्निपर्यंतमन्नवस्तु गतिमनुरुध्यान्तं स्मरणाहमीत्येव विवक्षितं ऽन्यथा निवेशप्रयोजनाभावात्। वस्तुतस्तु कालिकसं
बंधेन स्वीयपदस्व हन्य ध्वंसप्रतियोगिपदे स्वादिकालिकसंबंधेन स्वीयपदध्वंसव■स्पदे स्वादिवासम्यक् स्मरणत्वाघनिवेशनातिला

१०

51

घत्वादित्यतिध्येयं॥ तद्धारयतीति हित्वादिवारयतीत्यर्थः॥ तद्धारयंतं दाहरणावारयंतं। हेतुवयत्वादित्यपि दृष्टस्य शक्तिमत्त्वरूपनयांत्यपदार्थप्रसिद्ध
भावादित्याशयः॥ बोध्यमिति॥ अंशेत्यपदत्वलघटकपदस्यापि विभक्त्यंतरूपत्वादिति भावः॥ यथाश्रुतेतिविभक्त्यंतरूपपदार्थघटितेत्यर्थः॥ अति
व्याप्तिरिति॥ तयोरंशयोर्भूतसुभिन्नार्थमतुप्पदार्थविशेष्यकबोधजनकत्वादिति भावः॥ ननु तस्माद्धूम्रिमानित्यादिनिगमनस्य विभक्त्यंत
रूपांत्यपदात्मकमतुप्भिन्नपदार्थविशेष्यकबोधजनकत्वाभावान्न तत्रातिव्याप्तिसंभव इत्यत आह नेत्यादिघटनेति। अयमत्र संक्षेपः
स्वीयांत्यपदभिन्नपदे स्वस्य कालिकसंबंधेन स्वघटकपदवृत्त्यध्वंसप्रतियोगिपदभिन्नस्वघटकपदेत्यर्थः। तत्र पदत्रयमपि विभक्त्यंतरू
पं। आद्यं प्रथमपदस्य तथात्वे पुपनयनिगमनयोः स्वघटकसुपदवृत्त्यध्वंसप्रतियोगिपदभिन्नस्वघटके हं मतुप्पदार्थविशेष्यकान्व
यबोधजनकत्वेनातिव्याप्त्यापत्तेः। द्वितीयपदस्य तथात्वे इदं मतुप्पदयोर्वर्णसमुदायात्मकतया न हीयपूर्ववर्णेन तादृश्यविभक्त्यंतपदव
दृत्यध्वंसाप्रतियोगित्वेनांत्यपदत्वाभावादुक्तेनातिव्याप्तिः। तस्य विभक्त्यंतरूपत्वे तु विभक्त्यव्यवहितपूर्ववर्णस्य तादृशध्वंसप्रतियोगितया
नातिव्याप्तिः। एवं च तृतीयपदस्य तथात्वे तस्माद्भिघनः इत्यत्र तादृशध्वंसप्रतियोगिविभक्त्यंतपदं भिद् धातुरूपं तद्भिन्ना[illegible]न पदार्थवि
शेष्यकबोधजनकतयातिव्याप्तिः स्यादिति तद्वारणाय तादृशांत्यत्वं एवं च हेत्वादिघटितौ पदं विभक्त्यंतमित्यत्र परपदं द्वितीयसत्त्वं घटकसकलप

270

रामः

दपदपरं तेन निगमनहृत्यत्र निगमनमात्रोपादानं च तृतीयपदेन याव्यत्वं निगमनमात्रेऽतिव्याप्तिवारकं प्रथमद्वितीययोरुपनयेतिव्या
प्तावपि निगमनेऽव्याप्तिर्माभूत् सर्वसाधारण्येन उपनयस्य तु न सर्वसाधारण्यं तृतीये तत्रातिव्याप्तेरभावात् । तत्र प्रथमद्वितीययोरुप
नयस्याप्यस्य पदवत्त्वदूषणं तत्र पदस्य तथात्वे च हेतोः श्रोपलक्षकं । एतेन स्वघटकविभक्त्यन्तपदमध्ये पदं यमित्यस्य कोऽर्थः स्वघटकवि
भक्त्यन्तपदप्रागभावासमानकालीनविभक्त्यन्तपदमिति चेत् उपनयस्येदमादिपदस्य विभक्तिरूपपदप्रागभावसमानकालीनतया त
स्यापि तत्त्वं निर्वाहाय प्रथमविभक्त्यन्तत्वविशेषणमस्तु चरमं विभक्त्यन्तत्वविशेषणमनर्थकं । न च यमित्यत्र हि अत्रनं सत्वं स्वीय
विभक्त्यन्तपदप्रागभावसमानकालीनत्वपर्यवसितं । भिन्नभिन्नत्वनिवेशस्य व्यर्थत्वात् । एवं च तस्मात् दूषणहृत्यादिनिगमनस्या
ख्यानपदस्यानन्तरत्वमेव नास्तीति किमनेन स्वघटेविभक्त्यन्तत्वनिवेशेनेति दूषणं परास्तं अशरीरत्वासामंजस्यात् । एतत्स्वरूपासमू
लान्तु रोधेन स्वातन्त्र्येणाहीयधिकारीय तथा तन्मते च प्रागभावासत्वेन तत्कृतनिर्वचनस्यानो विल्पाप्ते सर्वं सुस्थं । वस्तुतः दत्ता
दिव दृष्यमाणारिसाऽनुशासनवैयर्थ्याभावादाह यदि चेति वैयर्थ्यमिति अव्ययस्य निर्विभक्तिकत्वेऽव्ययात्तासुपो भावेन तल्लोपा
नुशासनं व्यर्थं स्यादिति भावः । वाक्यमिति उक्तातिप्रसंगवारणायेवेत्याहि । साधुनामात्रं । तन्मात्रार्थमात्रपदेनार्थबोधककलख

टी०

वच्छेदः पदकार्येति समासादीत्यर्थः। विभक्त्यन्तस्य विभक्त्यन्तेन सह समासविधानेनाव्ययस्य विभक्तिमत्त्वेन ज्ञू समासाद्यनुपपत्तेरितिभा
वः। अर्थबोधकत्वस्यावच्छेदकमेव सुबुत्पत्तिनिर्हेति। अव्ययोत्तरविभक्तिकल्पने गौरवे तु लाघवान्नैवान्तिविभक्तिकत्वमेवयुक्तमिति मनसि
कृत्य तथा सति ठक्कारी त्यांनु[illegible]शासनवैयर्थ्यापत्तिरितिनतुदूरति। वस्तुतस्तु विभक्त्यर्थ इति कर्मत्वादावित्यर्थः। लाक्षणिकत्वेतिलक्ष
णामूलतात्पर्यग्राहकेत्यर्थः। अस्मद्यास्त्वः पश्यतीत्यादौ दर्शनेस्वर्गकर्मतान्वयबोधोनस्यात्कर्मत्वोपस्थापकान्तराभावादितिभावः॥
नन्वेवमव्ययानांसविभक्तिकत्वमेवास्तुकर्मत्वबोधकविभक्तिलोपविधायकतयानुशासनसार्थक्यस्यतथापिसंभवादतआहअथ
मीतितथाचानुशासनसार्थक्यस्योभयथासंभवेपितेषांसविभक्तिकत्वेविभक्तिकल्पनागौरवमधिकमितिलाघवेनतेषांविभक्तिरा
हित्यमेवसम्यगितिभावः। लक्षणापत्तिरितितथाचतत्रापिलोपानुशासनस्यतात्पर्यग्राहकतयालक्षणयैवनिर्वाहेदधिपद
स्यनिर्विभक्तिकत्वापत्तिरितिभावः। धात्वर्थेतिअत्राभेदान्वयिकसंबंधेनेतिनतुनिविष्टंसोमपाकइत्यादौलुप्तविभक्त्यनुसंधानेनैव
पाकबोधइत्याशयः। अन्यथादधिपदस्यैवदधिकर्मकेलक्षणायांमुस्पत्तिविरोधाभावेनदधिपदस्यनिविभक्तिकत्वस्यानुपपत्ता
पत्तेरितितिध्येयंअसमुत्पन्नेरितितथाचदधिपदार्थकर्मत्वस्यदर्शनान्वयासंभवेनसविभक्तिकत्वमावश्यकमितिभावः। इहापि

राम०

अखण्डेपि तथात्वात् उक्तपुरुषासविभक्तिकत्वं नन्विहाप्युक्तयुक्त्यापत्तिविरोधेन सविभक्तिकत्वमावश्यकमत आह इष्टेति। न च प्रयोगसाधु-
त्वार्थं समासघटितपदकार्यार्थं चाव्ययस्य सविभक्तिकत्वमावश्यकमिति वाच्यं। उक्तानुशासनसत्वे निर्विभक्तिकत्वेपि प्रयोगसाधुतासं-
पादकत्वमुक्तपदकार्यसंपादकत्वं चेत्यस्य वक्तुं शक्यत्वात् न च तत्सुखादिविधायकानुशासनबलात् पिपदकार्यनिर्वाहात् एवं च अ-
व्ययस्य निर्विभक्तिकत्वेप्यनुशासनवैयर्थ्यपरिहारादिकं विशेष्यकत्वाभ्युपगमात् विशेष्यकबोधजनकत्वात् तेन यावत्स्वलक्ष्यत्वे विभक्त्यंत-
पदप्रवेशे नाव्ययस्यातत्यात्वेनोक्तस्य लेशव्याप्तिर्दुर्वारेति भावः। ननु लक्षणस्याव्ययपदघटितविभक्त्यंताव्ययान्यतरघटितमिति न स्वरूपा-
मेयदुरूहत्वादाव्याप्तिः तथापि धर्मिकल्पनातः इति न्यायेन निर्विभक्तिकत्वे लाघवादत आह नवेति एकत्वानुभवादिति तत्र यावदव्य-
यस्य सविभक्तिकत्वे न तस्मान्नेतरराशीति निगमनेऽतिप्रसंगो दुर्वार एवेति भावः। विशेषणतावित्यतो रपि सार्थकत्वस्य मतान्तरे
भिरंगीकारादाह एवकारेतितदर्थश्च तत्रार्थे अंकुरविशेषः इति हेत्वाविति शेषः वज्रलेपादि इति हेतुभेदेनावयवभेदान्त दंकुरहेतु-
कनिगमनत्वस्यावयवतावच्छेदकतया तत्तदवच्छेदेन ताहशबोधजनकत्वादिति भावः। अंशे भिन्नमिथस्यास्या धारणात्वेपि अंशे
पदार्थविशेष्यकत्वमेव बोधे लभ्यते न तु क्रमंत्वपदार्थअंशे सपदार्थान्वितत्वमत आह यद्वेति विवक्षितमिति तत्र यावत्ताद्दशावि-

टी०

53

मत्तांतत्वस्याप्यपेऽसत्वेन तस्मान्नेतराणीतिनिगमनेनातिव्याप्तिरिति भावः। न प्रतिज्ञेनितव्याचनत्वोक्ता[illegible]प्तिर्नेत्याशयः। ननु मुख्यविशे
ष्यतानिवेशेपि तस्याः प्रकारतान्यविशेष्यत्वादिरूपतया तस्मान्नेतराणीतिनिगमनेऽतिव्याप्तिरेव तज्जन्यबोधे न जर्यभेदस्य मुख्यविशे
ष्यत्वादत आह सार्थेनितत्रिंस्यमिति। चेतावीजं च पर्वतकालीनालोकवान्पर्वतो वन्हिमानित्याद्यप्रतिज्ञायामव्याप्तिरेवेति। प्रकृतपक्षान्वितेत्या
दि। प्रकृतपक्षान्वितस्वार्थबोधकं प्रतिज्ञास्यवन्त्यादिपदं तदुपस्थापितार्थविषयादित्याह। अन्वितः स्वार्थो हि तत्त्ववयवार्थस्तद्बोधजनकत्वा
देत्ववयवेत्तत्स्वरूपासमन्वयः बोधकत्वाभावादिति। उपनयार्थस्य प्रकृतपक्षान्वितस्वार्थबोधकपदोपस्थापितत्वाभावादिति भावः।
निगमनमात्रायैवेतितत्पार्थोपनयेस्वार्थबोधकपदोपस्थापितपदमात्रव्याहृत्तिसंभवेपि प्रकृतपक्षस्वार्थबोधकपदोपस्थापित
पदयोर्व्यावृत्तिदानाय निगमनमात्रमुक्तमिति भावः। तत्र हि निगमने हि यत्तुइतरान्वितस्वार्थबोधकत्वं निगमनवत्प्रतिज्ञोपनययोर
पितत्पापिविशेषणतयान्वितत्वनिवेशनेन तद्वारणसंभवान्निगमनमात्रकथनमिति। तत्र त्रिंशत्संसमुदितप्रतिज्ञार्थस्येतरानन्वितत्व
मप्रतिज्ञायामतिव्याप्त्यप्रसक्तेः। इदानीमेव विशेषणतयान्वितत्वनिवेशो प्रमेयत्वमित्याद्यग्रिमग्रंथानुत्थानापत्तेश्च। गर्भमेवेति एव
कारेणास्वार्थबोधकपदोपस्थापितपदव्यव[illegible]च्छेदः। तदन्वितेति विसुगत्येत्यादिः। नन्वेवमपि पक्षस्येवोक्तरूपेणास्वार्थबोधकपदोप

274

रा०

स्थापितत पातदन्वितस्वार्थबोधकत्वान्नि गमनेतिव्याप्तिरेवेत्यत आह तत्पदहाने इति स्वार्थबोधकपदोपस्थापितपदहानेनेत्य
र्थः। तादृशेति प्रकृतपदोपस्थाप्यान्वितस्वार्थबोधकपदजन्योपस्थितीत्यर्थः। तद्द्वयेति तादृशोपस्थापितार्थान्वयेत्यर्थः। तत्र यत्राऽन्व
यांशे। अत एव तात्पर्यविषयतादृशवह्निपदार्थप्रतियोग्यन्वितत्वात्। तत्र विशिष्टप्रतिज्ञार्थे। अनन्वयादिति उक्तपंचम्यर्थस्येत्यादिः। वह्निमान् धूमादित्यादौ
स्रोके मुनिकन्याय परतयायोजनेनापि प्रमेयत्वमित्यादिग्रंथविरोधपरिहारसंभवादाह किं चेति प्रतिज्ञार्थे विशिष्टप्रतिज्ञार्थे अ
न्वयाभावेनापीति अपिना प्रकारतयाऽन्वयाभावसमुच्चयः। अन्यत्र प्रकारतयान्वयविवक्षणे गौरवं च धूमाद्यारीत्यादौ मुनिकन्या
यानुसरणं विनैव निर्वाहे तदनुसरणमप्यनुचितमित्यस्वरसादाह वस्तुतोऽपीति। पक्षतावच्छेदकरूपमात्रेणेति तत्पक्षतावच्छेद
केऽन्वयावच्छेदकतापक्षतावच्छेदकतापर्याप्त्यधिकरणपर्याप्तिकावच्छेदकतारूपाविवक्षणीयेत्याशयः। यत्रोपनयार्थेनतद्धी
यकेवलान्वयं पदार्थे निश्चयसमं केवलान्वयपदार्थेनैव वा समम् अन्वयबोधतात्पर्ये यानि गमनं प्रयुक्तं तत्रोक्तान्वयोऽस्त्येवेत्यत आह भावेवेति
दृष्टान्ततुरितिगोत्वं तादृशपक्षान्वययोग्यत्वस्य दुर्वचत्वं चास्वरसः। एतदस्वरसेनैव उक्तरीत्योपनयातिव्याप्तिरूपास्वरसादेवेत्यर्थः। अ
त्रेत्यादि इदं च तादृशबोधघटितलक्षणाक्रमानुसारेणैतत्प्रत्ययमं विशिष्टवैशिष्ट्यबोधाङ्गीकारेण विरोधशंकावकाशः। तृतीयद्वितितृतीय

त्वमपिगगनानाक्रमेरौवर्तेनतस्यवस्तुगत्याद्वितीयत्वेपिनासंगतिः तान्। त्रीन्बोधान् आदाय क्रमेणैकैकमादाय अत एवंनिगमन
स्यस्वार्थबोधजनकत्वेनातिव्याप्तेरेवउक्तमितिशेषः। नचस्वैकदेशार्थहेतुत्वस्यापिस्वार्थत्वेनतद्विशिष्टवैशिष्ट्यबोधजनकेनिगम
नेतिव्याप्तिर्दुर्वारैवेतिवाच्यं। स्वपदस्यन्यायावयवत्वविशिष्टपरतयाऽदोषात्। विशिष्टबोधजनकत्वेनस्वार्थविशिष्टबोधत्वावच्छि
न्नजनकत्वेनकथमितिनिगमनार्थोपस्थितेरपिस्वार्थविशिष्टबोधत्वावच्छिन्ननिरूपितजनकतामादायातिप्रसंगवारणायवि
शिष्टवैशिष्ट्यबोधत्वावच्छिन्ननिरूपितजनकत्वस्यनिवेशनतयाऽसंभवइतिभावः। तज्जनकत्वेतितयावोक्तधर्मावच्छिन्ननिरूपित
त्वानिवेशात्स्वार्थविशिष्टबोधत्वावच्छिन्ननिरूपितविशिष्टवैशिष्ट्यबोधजनकतामादायैवलक्षणासंगमनमितिभावः। अतिप्र
संगस्यचवक्ष्यमाणरीत्यानिगमनातिप्रसंगस्यचवारणादिति। नचतथापिनिगमनार्थविशिष्टोपनयार्थवैशिष्ट्यबोधस्यापिनिगम
नार्थविशिष्टबोधतयाऽतिप्रसंगोदुर्वारएवेतिवाच्यं। बोधेस्वतात्पर्यविषयत्वस्यापिनिवेशनीयतयाऽदोषात्। स्वन्याया[illegible]वयव
विशेषणत्वेऽतिप्रसंगवारणासंभवादाह स्वार्थविशिष्टबोधस्येति। निगमनस्यापिविशिष्टबोधजनकत्वैकदेशविशिष्टज्ञान
जनकतयाऽतिप्रसंगात्। स्वार्थेतिन्यायावयवत्वविशिष्टार्थपरं। अतिव्याप्तिरिति तद्वारणायविशिष्टबोधजनकत्वमुक्तमितिभावः।

नच द्वितीयशाब्दबोधस्यापि विशिष्टबोधजनकतोक्तहेयतादवस्थ्यमेवेति वाच्यं स्वार्थविशिष्टबोधविशेषणतास्य विशिष्टबोधजन
कत्वस्य स्वार्थविशिष्टविशिष्टबोधजनकत्व एव पर्यवसानात्। उदाहरणस्यैवेति एवकारेणान्वयव्यतिरेकस्यैकवाक्यता
विरहव्यवच्छेदः नाव्याप्तिरिति उदाहरणस्यैकवाक्यताविरहान्नाव्याप्तिरन्वयव्यतिरेकस्यैकवाक्यताविरहाभावान्नातिव्याप्तिरिति
भावः। इदं चोदाहरणत्वं च। अग्रेऽपि द्वितीयलक्षणेऽपि नचात्र विशेषलक्षणाद्यस्यान्वयव्यतिरेकोदाहरणेऽतिव्याप्तिस्तस्य
लक्षणाननुगमान्न्यूनतेति वाच्यं अन्वयव्यतिरेकोदाहरणस्यानंगीकारात् अत एव पूर्वं द्विविधिनिरूक्तानेव नैकदेशमयव्याप्तु
पन्यासोऽपि सुसंगत इतरेति। निगमनार्थविशेषणस्य स्वार्थविशेष्यकबोधजनकत्वाद्युपनयलक्षणासंगतिः स्वार्थविशेष्यकेति
विशेषणविशेष्यभाववैपरीत्यमात्रान्न लक्षणाभेदः। पूर्ववदिति प्रतिज्ञाद्यतिव्याप्तिवारणाय स्वार्थविशेष्यकत्वं बोधविशे
षणं तस्याः प्रतिज्ञायाः विशिष्टस्यानतिरिक्ततया विशिष्टे प्रतिज्ञार्थे पर्यवसिते परं परस्या हेत्वर्थस्य विशेषणत्वाद्दाहसाम्यादिति
नातिव्याप्तिरिति तथा च स्वाभिन्नोपस्यापितार्थप्रकारतानिरूपितस्वार्थमुख्यविशेष्यताकबोधजनकत्वं स्वार्थमुख्यविशे
ष्यतानिरूपितस्वभिन्नोपस्थापितार्थप्रकारताकबोधजनकत्वमित्युपनयलक्षणद्वयं स्वभिन्नावयवार्थीयमुख्यविशेष्य

तान्निरूपितस्वार्थप्रकारताकबोधजनकत्वं निगमनलक्षणं पर्यवसितं। पूर्वं हेतुलक्षणस्य प्रमेयत्वमभिधेयं प्रमेयत्वादित्यत्र प्रति
ज्ञायमानेति व्याप्तिनिराकरणप्रस्तावे। अभवानां यामवयवे विशेषमथाव्लयानया। अर्धापयं तु निशंकं बुधाद्वोधिमस्तुतां।। १।। इति श्री
पुराणतामकरमहादेवविरचितायां भवानंदीव्याख्यायां सर्वोपकारिण्यामवयवग्रंथव्याख्या समाप्ता।। श्री पदिकरः अंगांसहकारि
तियावत्। अहेतोरिति स्वज्ञानप्रतिबंधकज्ञानविषयवत्त्वविशेषणव्यावर्त्त्यत्वरूपो यो हेतुसंबंधाश्रयस्यैव ताद्वि। स्मात स्वादिति
एकसंबंधित्वज्ञानस्यापरसंबंधिस्मारकत्वादिति भावः।। तत्त्वनिर्णयवादिविजययोरिति इदं च कथाभेदेन वादकथायां निग्रहस्थानो
स्तत्त्वनिर्णयात् जल्पकथायां वादिनो विजयात् जयस्तु प्रतिवादिनोयमुत्कर्षः इति मध्यस्थादिसमवेतज्ञानमेव एककार्यकारित्व
मिति पाठः एककार्यत्वमिति पाठस्तु प्रामादिकः तस्य एकप्रयोज्यत्वात्मकतया संगतिलक्षणे व्याख्यातत्वेन प्रकृते ऽसंगतेः उभयस्या
पीति। न च उभयस्याप्यत्वस्य तत्त्वेपि न स्मृतिहिनिवार्यं हेतुसेपारणामजक्षपत्वे तत्र च स्वरूपमाराय याप्रुतलक्षणानित्याप्तेर्वाधितादिदुष्टहेतु
ष्वव्याप्तेरुपधेयसंकरेपीत्यादिग्रंथासंगतेः दुष्टहेतुसामान्यलक्षणत्वे च तेषां साहित्यात द्विभागासंगतेः। स्मृतिः स्वरूपमाराणलक्षणानुपपत्तिः। व्या
धितो। यथाश्रुतमिति ज्ञायमानस्य व्यभिचारादेः प्रतिबंधकत्वमाश्रित्य केचित् नित्यादिना दुष्टहेतुलक्षणस्योपवर्णनीयत्वाद्यथाश्रुत त्वोत्को

त्तीनां ननु केवलव्यभिचारादिज्ञानस्याविरोधितया व्यभिचरिताद्धेतुज्ञानस्यैव विरोधित्वेन पक्षधर्मतायामुक्तस्यापि दुष्टहेतुलक्षणत्वं संभवमिति चेन्न
तत्राह व्याख्यायां बाधादिस्थल इति बाधव्यभिचारादिज्ञानत्वेनैव प्रतिबंधकत्वं ननु बाधितव्यभिचरिताद्धेतुज्ञानत्वेन यत्रोक्तय यथाश्रुतस्य व्यभि
चारादिस्थले दुष्टहेतुलक्षणस्य संभवेऽपि बाधादिस्थले तन्न संभवतीत्येवाशयेनोक्तमिति यथाश्रुतलक्षणस्य न दुष्टहेतुलक्षणत्वं संभवतीत्याश
यः। लाघवे न समानविशेष्यकत्वप्रत्यासत्त्यैव व्यभिचारादिज्ञानस्य विरोधितया न केवलव्यभिचारादिज्ञानस्य विरोधितापत्तिरिति हृदयः।
उपधेयस्यादिमं यार्थः। तद्दुष्टत्वं हि व्यभिचाररूपदोषविशिष्टहेतुलक्षणाभिप्रायेण यायासव्यभिचारलक्षणस्य विरुद्धहेतावतिव्याप्ति
रितानस्याश्वसमाधानपरः एवं च दोषाणामेवलक्ष्यतया अतिव्याप्तिविरह इति न दुष्टत्वनाम्ब पमिति भावः। तेषां दोषाणां असंकीर्ण
त्वेति भिन्नत्वेत्यर्थः। उचितमिति अन्यथा तेषामभिन्नत्वे विरोधलक्षणस्य व्यभिचारे व्यभिचारलक्षणस्य च विरोधे गमनतया अतिव्या
प्त्यापत्तेरिति भावः। तेषामेव दुष्टहेतूनामेव असांकर्यस्य भेदस्य वक्तव्यतयेति वक्तुं योग्यतयेत्यर्थः। तथा सत्येव व्यभिचाररूपदो
षविशिष्टहेतुलक्षणस्य विरोधरूपदोषविशिष्टहेतौ विरोधरूपदोषविशिष्टहेतुलक्षणस्य च व्यभिचाररूपदोषविशिष्टहेतावति
व्याप्तिवारणसंभवादिति भावः। तन्मांकर्यमपीति दुष्टहेतूनामभिन्नत्वमपीत्यर्थः। अपिरवधारणार्थो भिन्नकमेस्यादित्यनंतरयो

वृ

श-

५०

न्यः॥ न चाव्यतत्सांकर्यं दोषः स्यादेवेति पर्यवसितं ॥ अयमाशयः दुष्टहेतूनामसांकर्येण कथने दोषाणामसांकर्येण कथनेऽपि व्यभिचारिहेतु
लक्षणस्य विरुद्धहेतावतिव्याप्तिवारणासंभवेन उपधेयसंकरेपीत्यादिग्रंथस्यासंगतत्वापत्तिरेतद्ग्रंथस्यातिव्याप्तिवारणमा
त्रफलकत्वादिति ॥ उपदर्शितरीत्या उपधेये त्यादिग्रंथस्य दुष्टहेत्वभिप्रायकत्वात्सेभवत्यप्रमेवास्वरसं हृदि निधायाह केचित्विति ॥
कारणपरत्वमिति अनुमितिपदस्योत्पत्त्यादिहेतुविशेषेति प्रवृत्तानुमितीति पर्यवसितं अन्यथानुमितिसामान्यप्रतिबंधकत्वाप्रसिद्ध्यासंभ
वापत्तेरिति भावः ॥ लक्षणादृष्टयमिति ॥ लक्ष्यतावच्छेदकभेदादिति भावः ॥ बाधवादित्रिप्रकृतानुमितिनिष्ठकार्यतानिरूपकसंबंधि
त्वेन लक्षणायामेकलक्षणाकल्पने लाघवादिति भावः ॥ कारणत्वादाविति [illegible] आदिना ज्ञानादिपरिग्र
हः ॥ कार्यधियेति वह्नित्यपूर्वक्षणावृत्तित्वरूपतया न स्वतादृश क्षणरूपतया तस्य घटत्वरूपत्वमित्यादिज्ञानरूपका लोपाधिरूपतया
कारणत्वस्य कारणतावच्छेदकत्वरूपतयानुमितिनिष्ठकार्यतानिरूपिकाया घटज्ञानाद्यात्मकहेतुविषयकपरामर्शनिष्ठकारणतो
तायां न दवच्छेदकघटज्ञानाद्यात्मकतया वा तत्कारणीभूताभावप्रतियोगीयथार्थज्ञानविषयेघटाभावादावपि प्रकृतानुमितावयं हे
यदतिव्यवहारापत्तिरिति भावः ॥ यथाश्रुते कारणत्वकारणाप्रसिद्ध्याऽसंगत्यापातादिति ध्येयं ॥ पाकर्येति संबंधित्वस्य कारणत्वा

तथाच कारणत्वस्यानियतत्व ४

280

रा४०

दावनुपायादाह संबंधिविधया निरूपकत्वेति संबंधिविधया साक्षात्कारजनकसाक्षात्कारविषयत्वेत्यर्थः। तेन संबंधित्वस्याव्याप्तावर्ज
कत्वेपि न क्षतिः प्रापकमिति न व्याप्यसंबंधिनिरूपकपदाभ्यामनुमित्यर्थलाभ इति भावः। कारणताघटकेति कारणत्वादि तद्घटकेत्य
र्थः। संबंधित्वादीति निरूपकपदाभ्यामनेनार्थलाभेन यद्यपि कथंचित्संबंधित्वलाभेन कारणत्वादिनत् घटकस्य ग्रहणत्वादिपदा
र्थानामपि कार्यतासंबंधित्वमस्त्येवेत्याशयः। अनुमितेः अनुमितिपदात् तस्यापि कारणत्वादिनत् घटकपदार्थस्यापि। एतदनु
मितौ। प्रकृतानुमितौ। अयं उक्तज्ञानविषयः व्यवहारायत्तिरिति उक्तरीत्या लाघवाभावादावपि तादृशज्ञानविषयत्वसत्त्वादिति भावः।
अनुमितित्वकारणयोः संबंधिविधया निरूपकत्वमुपपादयति अनुमितीत्यादि। अनुमितिसामान्येति। अनुमितिपदस्येत्यादिरित्य
संभवेति अनुमितिसामान्यप्रतिबंधकत्वाप्रसिद्धेरिति भावः। अनुमितिविशेषेति साध्यव्याप्यहेतुमानित्याद्याकारकानुमितेरित्यर्थः। उक्त
रूपेति अनुमितिनिष्ठकार्यतेत्यादिरूपार्थकरणप्रयासद्वयेत्यर्थः। अनुचितेति उक्तगुरुरूपेण लक्षणकल्पनमपेक्ष्य लघुनातादृशा
नुमितित्वेन लक्षणपालाघवादिति भावः। वस्तुतस्तु सामान्यरूपेण विशेषबोधस्य तात्पर्यसहकृतशब्दैरेवोपपत्तेः सामान्यशब्दस्य
विशेषपरत्वेन लक्षणापि नेति न दोषः चितं न तुल्यलक्षणायोग्यार्थानुसरणमिति ध्येयं। ननु लिंगोपधानांगीकर्तृमते तादृशानुमितिसंभ

टी० 282

वेपि तद्धर्मं गीकृत्य मणिकारमते तादृशानुमितिर्न संभवति। नच मणिकारमतेपि साध्यव्याप्यहेतुव्याप्यवान् साध्यव्याप्यहेतुमांश्च पक्ष इ
त्याकारकपरामर्शेण पक्षः साध्यव्याप्यहेतुमान् साध्यवांश्चेत्याकारकानुमितिसंभवत्येव। इति चिन्तावच्छेदकाकारं तं तादृशाकारपरमेवेति वा
च्यं। साध्यव्याप्यहेतुमत्तज्ज्ञानस्य सिद्धिविषयाप्रतिबंधकस्य सत्वे तादृशानुमितेरप्यसंभवादतआह साध्यव्याप्येति। तादृशानुमितिः पक्ष
स्साध्यव्याप्यहेतुमान् साध्यवांश्चेत्याकारकानुमितिः। संभवतीति मणिकारमतेपीत्यादिः। अनुमित्साविरहविशिष्टसिद्धेरेवानुमितिप्रतिबं
धकत्वादिति भावः। नच सर्वस्य सर्वदोत्कटेच्छाविरहेणानुमितौ मानाभावेन यत्र विषयेऽनुत्कटेच्छा तत्रानुमितिर्नोत्पद्यतां तत्र त्वदुक्तदोषः व्याप्तिरिति
वाच्यं। एतद्दूषणस्य देववदंतीत्यस्यावश्यमाराध्यत्वात्। एतद्दोषसमशीलदोषस्याप्येसादिनापि तत्समाधास्यमानत्वेनैतद्दोषस्याप्यपर्यनः
समाधास्यमानत्वात्। एतेन साध्यव्याप्यत्वादिकं लिंगोपधानमताभिप्रायेणोक्तं मणिकारमते सर्वत्र तादृशानुमित्यसंभवेनासामञ्जस्यापत्तेः
अत एव पक्षः साध्यसाध्यवान् साध्यवांश्चेति समूहालंबनानुमितिर्नोत्पद्यतेति यत्तेनैकदुक्तं यद्यपि विरोधितो साध्यव्याप्यहेतुमान् पक्षः साध्य
वानित्याकारानुमितिपरं वेति पाठः क्वचित् द्वितीयपक्षपदशून्यः पाठो लेखककरदोषात् तथात्वे ऽशतो बाधाद्यसंभवाद्धेत्वन्तरमिति परैरुक्तं तदु
भयमपि प्रयुक्तं। उक्तरीत्या सर्वसामञ्जस्यात् लिंगोपधानमतेनुमितेस्साध्यव्याप्यतायाद्याकारनियमेन तन्मताभिप्रायकत्वे आकारान्तरस्या

राम०

व्यावर्तकत्वापत्ते रन्वयस्यैव मध्यस्थपदस्य देहलीदीपकन्यायेनोभयत्रान्वयसंभवेन द्वितीयपदस्य वैयर्थ्यं च । न च हेतुतेति तद्धेतु
पदं तद्धेतुतावच्छेदकावच्छिन्नतद्धेतुपरं स्वमतेऽपि तेन तस्मिन्नेव हेतावेकरूपेणाव्यभिचारस्येह विरूपान्तरेणापरामर्षहेतुमित्युक्ते हेतावपि न
व्यभिचारः तद्धेताविति सप्तम्यर्थो विशेष्यत्वं प्रतिबध्यानुदयादिति कश्चिदप्रसिद्धेरित्याद्यादिति भावः । यत्र विषयविशेषे । एतन्ता
दृश्यानुमितेः साध्यव्याप्यहेतुमात्रस्य हेत्वादियुक्तानुमितेः अप्रसिद्धिः कदाप्यनुमानाद् सुतरामिति अव्याप्तिरित्यनुषज्यते न तदभावं धर्मिता
वच्छेदकीभूय न तद्ज्ञानबुद्धेरनाहार्यायाश्चानुदयेन तादृश्यानुमितेरप्रसिद्धत्वादिति भावः । पूर्वं संभवदुक्तिकायाश्चानुमितेरप्रसिद्धेरुक्तादृशा
नीमसंभवदुक्तिकायाश्चेति सुतरामित्युक्तं । मेयत्वप्रतियोगिकत्वस्येति । मेयत्वत्वावच्छिन्नप्रतियोगिताकत्वस्येत्यर्थः मेयत्वभेदाद्यप्र
सिद्धस्येति शेषः । अप्राभावस्य इतिमनुसाध्याभाववद्वृत्तित्वरूपव्याप्तिः साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियो
गिताघटिततया तत्तज्ज्ञानस्य प्रतियोगितांशेनदुभयविषयकव्यभिचारत्वात् तस्यैव प्रतिबंधकतया मेयाद्यैमेयत्वत्वावच्छिन्नप्रतियोगिताक
त्वस्याप्रसिद्धावपि साध्यतावच्छेदकस्वरूपसंबंधावच्छिन्नप्रमेयत्वत्वावच्छिन्नप्रतियोगिताप्रसिद्ध्या तादृशाभावानुपपत्तिः न च मेयत्वत्वा
वच्छिन्नप्रतियोगितांशे स्वरूपसंबंधावच्छिन्नत्वस्य भ्रमः संभवत्येवेति वाच्यं । तथापि लाघवेन प्रतियोगितासंसर्गकत्वाभिज्ञानस्यैवानुमि

तिहेतुतयातत्प्रकारकत्वस्य भिचारित्वात्तात्पतिबध्यत्वात्। न च तादृशप्रतियोगितारूपसंबंधांशएव स्वरूपसंबंधावच्छिन्नत्वस्याप्रमाण्युपेय
इति वाच्यं संबंधांशे तत्प्रकारकत्वघटितत्रमत्वस्यासंभवाद्वितिचेन्मैवं। स्वरूपसंबंधावच्छिन्नमेयत्वत्वावच्छिन्नप्रतियोगितारूपवैत्तानि
कविशिष्टसंबंधेनाभावांशे मेयत्वप्रकारकत्रमत्वस्याऽसंभवस्याभावान्न च वैत्तानिकविशिष्टस्य संबंधातत्वस्य कोऽर्थ इति वाच्यं स्वरूपसंबंधावच्छि
न्नमेयत्वत्वावच्छिन्नप्रतियोगितानिरूपितधीविषयतावच्छिन्नपर्याप्तिकतादृशधीविषयतावत्पदार्थनिष्ठसंसर्गविधविषयत्वस्य तदर्थत्वात्
तादृशविषयत्वे मेयत्वेन सह भावस्य संबंधत्वाभावेन तादृशतानस्य प्रमत्वं संपाद्य। अत एव न जनतादृशविषयण्यांशे हि तेनो वह्निर्नि
रती स्याद्धैर्य्यात्स्वात्रोक्तरीत्यैवोपपत्तिः कृतेतिसंप्रदायः। नवीनास्तु स्वावच्छिन्नसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वसंबं
धेन साध्यतावच्छेदकवत्वमेवाभावस्यान्यव्याप्तिघटकं लाघवात्तथा च तादृशसंबंधेनाभावांशे साध्यतावच्छेदकप्रकारकत्वभिचारित्वा
नस्य व्याप्तिग्रहविरोधितया घटत्वादेः प्रसिद्धेन तादृशसंबंधेन मेयत्ववत्वादेरभावांशेऽप्रमात्मक एव तादृशोऽग्रह इति न किंचिदनुपपन्न
मित्याहुः॥ तन्न्विंसंयुतातिस्समवायेनैव स्वरूपतः प्रकारतया वह्न्यादिसाध्यकेऽभावे तत्संबंधेन वह्नित्वादेः स्वरूपतः प्रकारत्वासंभ
वेन पर्वतो वह्निमान् इत्याद्यनुमितेर्दुरूपपादत्वात्। तत्संबंधेन। तत्संबंधेनापि। साध्यविधिविषयकेति साध्यादिमात्रविषयकेत्यर्थः। अ

यादृक्केनित्तस्यप्रागत्तिवंधकतावच्छेदकानाक्रांतत्वादितिभावः॥ साध्यसाध्यादि। ननुविशिष्टस्यानतिरिक्ततयात्मविषयकत्वंदुःशकंपदार्थ
प्रसिद्ध्यानाहार्यविशिष्टस्यप्रसिद्धत्वमेवेत्यतआह तत्प्रविषयेतिविवक्षणीयंतिवक्ष्यमाणरीत्येत्यादि। अनतिरिक्तवृत्तित्वाभावा
दितितथाचविशिष्टस्याप्रसिद्धत्वमेवेतिभावः। माम्मास्तुदोषितोहेत्वाभासत्वापत्तिरितिएतदनंतरंसाध्यादेरपीत्यपियोजनीयःस
त्वासंभवापत्तिसमुच्चायकः तथाचसाध्यादेःप्रत्येकंहेत्वाभासत्वापत्तिः एवंचवक्ष्यमाणरीत्याप्रमेयत्वविशिष्टव्यभिचारादावतिप्रसं
गवारणायतादृशज्ञानविषयांतरघटितत्वविशेषणस्यावश्यकतयाव्यभिचारादेस्तादृशज्ञानविषयांतरसाध्यादिघटितत्वेनताव
च्छेदकताभावेनासंभवापत्तिरित्याशयः एवंचपक्षेकमितस्यतनप्रसक्तित्वादिनोपपर्यः ननुसाध्यतावच्छेदकावच्छिन्नस्यासपर्यः तथा
सतितस्यतादृशज्ञानविषयांतरसाध्यतावच्छेदकादिघटितत्वेनहेत्वाभासत्वापत्त्यसंगत्यापत्तेः। एतेनसाध्यादेर्दोषत्वेनकापिक्षतिः
नचतथासतिअत्रहेतौसाध्यंदोषइत्यादिव्यवहारःस्यादितिवाच्यं॥ संबंधस्यफलबलकल्प्यतयाप्रकृतेतादृशव्यवहाराभावेनहेतौसं
बंधाकल्पनादेवतादृशव्यवहारवारणासंभवादितिप्रत्युक्तंतथाप्यसंभवापत्तिसत्वात्। साध्यादेर्हेत्वाभासत्वापत्तेर्व्यभिचारादावसंभ
वापत्तेश्चवारणार्थमाद्यंकंतेश्रयेतिविशिष्येतिसाध्याभाववद्वृत्तित्वादिविशिष्टसाधनादौसपर्यः तथाचयादृशविशिष्टविषयक

285

द्वी०

44

त्वं पक्ष्यार्थज्ञानस्यानुमितिप्रतिबंधकतानतिरिक्तवृत्तित्वमेव लक्षणमिति भावः। ज्ञानं। ज्ञातसामान्यं। तद्घटकं। विशिष्टघटकं। प्रत्येकं
साध्याद्विनिविशिष्टत्वं नत्वाद्यप्रतिबंधकतानतिरिक्तवृत्ति। ननु पूर्वोक्तहेत्वाभासलक्षणस्य संभवाद्यप्रसिद्धिविरहेपि भ्रमत्वविषयविशिष्टेऽतिव्याप्तिवा
रणाय यथार्थपदं सार्थकमत आह भ्रमेति। तथा च विशेषणतावच्छेदकीभूतपर्याप्तप्रकारताप्रतियोगित्वसंबंधान्तरेणाविशिष्टवैशि
ष्ट्यबोधसाधारणतया विशिष्टबुद्धित्वविशेषणतावच्छेदकतादृशधर्मसंबंधेन पर्याप्तप्रकारताप्रतियोगित्वमेव तथात्वं न भ्रमे इति भाव इति
प्राहुः। कुर्वन्तीति मिश्रा इत्यादिशेषः तथा च दुष्टहेतुलक्षणत्वं। उचितमिति प्रथमस्य दुष्टहेतुलक्षणत्वे तदनुरोधेनाग्रिमहेत्वाभास
पदस्य दुष्टहेतुपरत्वमेव वाच्यं एवं मंत्स्यपोऽर्हति दोषलक्षणपरत्वे तदनुरोधेन तस्य हेतुदोषपरत्वं वाच्यं तच्च न संभवति सद्धेतुदुष्टत्वापत्तेरित्यापा
दितत्र यथाश्रुतमेव दुष्टहेतुलक्षणपरत्वमुचितमिति भावः॥ एतावतैव दुष्टहेतुलक्षणतयैव। अत एव। पक्ष्यार्थपदं तथा पाठे तज्ज्ञायमान
सत्प्रतिपक्षादितत्तीव्रलक्षणस्याद्यप्रतिपाठानुसारेणोक्तार्थः। वस्तुतस्तादृशपाठो नास्तीत्याशयः। द्विधिर्तीज्ञायमानव्यभिचारादेरिति ननु ज्ञाय
मानव्यभिचारादेः केन रूपेणाप्रतिबंधकत्वानवच्छिन्नज्ञायमानसाध्याभाववद्वृत्तिहेतुत्वादिनेति चान्यन्नाप्रसिद्धिनैनरूपेणाघटाघटवगाहिज्ञानमहृत्वा
यामनुमित्याद्यतोरिति चेन्न एतन्मतेनानाहार्याप्रमाणव्याप्यानुमितिविरहत्वात् मात्रमात्रसुवृत्तार्थायर्थमनेज्ञानस्यज्ञायमानालंगस्यवानुमितिहे

286

राम०

तुल्यत्वज्ञानस्य ज्ञापमानस्य व्यभिचारादेर्ग्राह्यानुमितिप्रतिबंधकत्वमित्याशयेनैतल्लक्षणस्य ज्ञानेच दृष्टांतासिद्धिः। लिंगज्ञानस्यानुमितिहेतुत्वेपि
विशेषकारणतानवच्छेदकं प्रमाणमसति बाधके विशेषणस्यापि कारणत्वं गृह्णातीति नियमेन ज्ञापमानलिंगस्याप्यनुमितिहेतुत्वमित्या
शयसिद्धांतोक्तेः। एवं चोक्तभ्रमदशायां विषयासत्वेपि तादृशज्ञानादेवानुमितिप्रतिबंधः। एवं च ज्ञापमानत्वे विशेष्यविशेषणाभावाय
त्र धूमाभाववद्वह्निमानिति विशिष्टवैशिष्ट्यविपर्यासितज्ञानविषयत्वं तेन तत्तान्नानो विशिष्टेन तेन ज्ञानत्वेन व्यभिचारादेः प्रतिबंधकत्वात्तया
चानुमितिप्रतिबंधकतायाः स्वरूपसंबंधरूपावच्छेदकत्वसंघटनादृशविशिष्टान्वेतेन संबंधेन तादृशज्ञानवत्त्वं वा तादृशविषयतापर्याप्त्यधि
करणत्वं हेत्वाभासलक्षणं तत्प्रकारकप्रमाविषयत्वं च दुष्टहेतुत्वं तेन तीव्रलक्षणेपि बोध्यमिति प्राहुः। व्याख्यातः। प्रकारकत्वस्येति विषय
कत्वस्य पर्याप्तत्वेन वह्निर्धूमव्यभिचारीत्यादिभ्रमविषये धूमादावतिप्रसंग इतीति भावः। प्रकारकत्वस्य पर्याप्त्यन्वितेन तत्प्रकारतानिरूपितत्ववि
शेष्यत्वस्य लाभेन नतत्रातिप्रसंगः। ननु सद्धेतावपि कालिकादिसंबंधेन प्रसिद्धव्यभिचारादिसत्वेन तत्प्रकारकयथार्थज्ञानविषयत्वस्या
तिप्रसंग इत्यत आह अत्र चेति। विशिष्यस्येति व्यभिचारादेरिति शेषः। प्रत्युक्तमिति धूमव्याप्यस्य प्रकृतहेतुतावच्छेदकवह्नित्वाना
क्रांततयानहेतुयोगिकैकज्ञानविषयत्वाद्धेतुत्वव्यवहारानियामकत्वादिति भावः। ननु वाद्दूर्धनप्रभववह्नेः सादाक्रांततयान हेतुयोगि

२१०

कोक्तसंबंधस्य दुष्टत्वव्यवहारानियामकत्वे यत्तत्रापि तेन व्याप्तिर्दुर्वारेत्यत आह । एतस्येति । एकज्ञानविषयत्वादिसंबंधस्येत्यर्थः । संबंधता
पि । दुष्टत्वव्यवहारनियामकसंबंधतापि प्रकृते नेति । प्रकृतहेतुतावच्छेदकस्यानुयोगितावच्छेदकत्वेनेत्यर्थः । धर्मान्तरेति धर्मान्तरस्यानु
योगितावच्छेदकत्वेनेत्यर्थः । दुष्टत्वप्रतीतिकत्वादेव तस्य तादृशसंबंधत्वस्याहंतमत आह नेनेति । नद्धत्वेति यत्किंचिद्धर्मत्वेनेत्यर्थः । न यावद्ध
मस्य वस्तुसाधकतया तस्य न व्यवहारनियामकसंबंधत्वमिति भावः । ननन्वेति । तत्रादिदृष्टप्रमेयवन्हित्वविशिष्टेतया चतस्यैवानुयोगिता
वच्छेदकतया तद्वच्छिन्नानुयोगिकस्य तस्य तादृशसंबंधत्वाभावेन यथार्थज्ञानविषयत्वाभावान्न तत्रापि व्याप्तिरिति भावः । सद्धेताविष
इतिप्रथमेति । ननु तादृशसाध्यहेतुकानुमितिप्रतिबंधकस्य विशिष्टस्यैव तत्त्वे साध्यहेतोर्दोषत्वेन सद्धेतौ तस्याप्रसिद्ध्या प्रमासंभवः ।
कश्चिदप्रसिद्धस्यैवास्मत्प्रमांगीकारादिति चेन्न पर्वतेपक्षे वन्हिसाध्ये धूमो दुष्ट इत्याद्याकारकज्ञाने ऽनुमितिप्रतिबंधकत्वस्य दोषत्वघटकत्वाने
यानुमितित्वेन हृदादिपक्षकवन्हिसाध्यकानुमित्यादेर्भावेन तत्प्रमासंभवात् । सामान्येन यस्य मिति । सद्धेतुष्वितिइत्यादिन्यायस्यानभ्युपगमे
मात्रिमहेत्वाभासपदस्य दोषदुष्टहेतूभयपरत्वासंभवादित्याशयः । प्राहुरितीति स्वोक्तरीत्या दोषपदस्य गौरवमेवास्वरसः । स च स्फुट एवात्रो
क्त इति ध्येयं । तद्वत्त्वादिति बाधादिज्ञाने चेति चकारो न योज्यः । तथा च बाधादिज्ञानमेव तद्वत्त्वाद्युल्लेखेत्यर्थः । साध्याभावविषयकत्वस्यानतिरि

288

केवलनिलरूपावच्छेदकत्वाभावात्तेनैवसादिनातिप्रसंगाभिधानमसंगतमतस्तद्दोषमाह विशिष्टेत्यादिनान्वनित्वाभावादिति हृदत्वा
दिनाप्रमेयत्वादिनावधूमाभावविशिष्टहृदादिविषयकज्ञानस्याप्रतिबंधकत्वादिति भावः। धूमाभाववद्विशिष्टहृदत्वादिनाघटादिवि
षयकज्ञानस्यापि प्रतिबंधकतयाधूमाभाववद्विशिष्टहृदादिविषयतायाः स्वरूपसंबंधरूपावच्छेदकतापर्याप्त्यधिकरणत्वाभावादाह
कोटिनिविष्टत्वमितितस्याप्रपिहृदत्वावच्छिन्नविषयतात्वादिनाकोटिनिविष्टत्वमस्त्येवेतिनदोषइतिभावः। इष्टापत्ताविति इष्टापत्ता
वभ्युपगम्यमानायामपीत्यर्थः। तेनपूर्वोक्तिरित्यत्रहेतौ साध्यदोषः स्यादितिव्यवहारायत्वादिष्टापत्त्यसंभवेपिनक्षतिः हेत्वंतरं। अ
तिप्रसंगं येनसंबंधेनेत्यादि। यत्संबंधावच्छिन्नधर्मितावद्धत्वं ज्ञाननिष्ठप्रतिबंधकतायाविषयतयावच्छेदकमित्यर्थः। तेनसमूहालं
बनमादायनदोषः। स्वरूपसंबंधेनैवआधेयत्वावच्छिन्नविशेष्यतानयैवारव्यमग्रेपि। असत्त्वादितिआभाववनिष्ठाधेयतानिरूपितभाववन्निष्ठा
धेयतायाभेदेनवन्ह्यभाववत्त्वाधेयतानोधूमवत्त्वाधेयतायावैलक्षण्यादितिभावः। पक्षविशेष्यकेत्युक्तमितिइदमुपलक्षणं। सा
ध्यंविहायसाध्याभावानुधावनमित्यपि इदंसंधूमवत्तितावेति। एवंतद्वन्हिविशेष्यतानोधूमवत्त्वविशेष्यतानायाश्चवैलक्षण्या
दितिभावः। वस्तुतस्तुसमानप्रकारकत्वेनैवज्ञानस्यप्रतिबंधकतयापक्षप्रकारकत्वममादायदोषासंभवात्पक्षविशेष्यकेत्युक्तमिति

289

ध्येयं संभवत्येवेति वस्तुभावनिराधेयतायाः हेतुत्वाभावस्य हेतुविशिष्टाधेयतायाश्चावैलक्षण्यादिति भावः। प्रसिद्धमेव वह्निमान्धूमादित्यादौ
विपर्ययः अर्थपर्यवसितेत्यपि शब्देन यथाश्रुतस्याप्रसिद्धिः यत्नेनैतस्य समुच्चयः दोषः अतिप्रसंगः इदं यत्र विशेष्यके निश्चयेन यत्र विशे
षणाभावव्यभिचारसाध्याभावस्याप्रकारत्वेन दोषासंभवादिति भावः। ठक्कुरोक्तस्यैव सामंजस्यं यत्प्रकारत्वेनेत्यत्र पर्यवसितानुसरणात् दोषानुत्थितत्वस्य
स्वरसादाहुः केचिदिति। तत्र अबाधितव्यभिचारिणि पर्वतो धूमवान् वह्नेरित्यादौ वह्न्यभाववत्त्वरूपेरतोऽसिद्धमुपलक्षणं हृदत्वादिनापि यादि
विषयिणीत्यपि द्रष्टव्यं। ननु वह्निनिर्वाहितेऽकृतानेऽसत्त्वादिति भावः। अप्रामाण्यज्ञानास्कन्दितासाधारणास्यविशिष्टविषयत्वस्य प्र
तिबंधकतानतिरिक्तवृत्तित्वासंभवादाहृत्य चेति। अप्रामाण्यज्ञानाभावविशिष्टेति इदं च प्रतिबंधकतावच्छेदककोटिप्रविष्टतानाहार्यत्वादि
रप्युपलक्षकं। वस्तुतस्त्वाहार्यत्वानास्थानयोरेकतरमिति न्यायेनाप्रामाण्यज्ञानास्कन्दितत्वापि पमेन पूर्वोपस्थितविरोधिकोटिविषयक
त्वेन नियमतः संशयरूपतया बाधत्वाश्रुतमेव सम्यक् एवमन्तेऽपि तत्त्वे वह्निः कपिसंयोगेन व्याप्यादित्यादौ साध्याभाववत्त्व इति व्याप्तिः अ
संभववारणायाप्रामाण्यज्ञानाभावादेरिव व्याप्यवृत्तित्वज्ञानाभावस्यापि लक्षणे निवेशादिति चेन्न व्याप्यवृत्तित्वेन विरोधिनिश्चयस्यैव प्र
तिबंधकत्वेनात्र विशिष्टाप्रसिद्ध्याऽतिव्याप्त्यभावात् केचित्तु नाहार्यविषयताया विरोधिविषयतायां विशेषणेनन्द्वारणामित्याहुः। अपरे

तुतत्र कपिसंयोगाभाववद्वृत्तित्वादिकं दोषएव तन्न्यायावनं तु तस्य संप्रदायविरोधादेव न क्रियत इत्याहुः। ननु प्रमेयमेकत्र वृत्तिमन्निरूपितत्वाच स्य
भाववान् वृत्तेः जातिमान् वस्तुत्वभाववान् वृत्तेर्जातिमद्भाववानित्यादिज्ञान साधारणं तादृशनिश्चयत्वं न प्रतिबंधकतानतिरिक्तवृत्ती
त्वेन त्वाह किंच लक्षणाविषयता ग्राह्यिति तेन विलक्षणाविषयताभिवेशेन क्षतिः असंभवः। हृदविशेष्यके निहृदविशेष्यतानिरूपकेन
र्थः। हृदं चवव्रभावप्रकारत्वान्विते। वन्हभावप्रकारत्वादीति। नचैतादृशवैलक्षण्यस्यकस्यविषयतानिष्ठत्वं स्वस्य स्वानिष्ठत्वादितिवाच्यं
भावप्रधाननिर्देशानुतादृश्येन स्वस्य स्वनिष्ठत्वाप्रयोजकत्वाभावादिति प्रकृतपक्षे कपक्षेऽन साध्यकप्रकृते न हेतुकानुमितिप्रतिबंधकत्व
स्यैवनिवेशादिति भावः। व्यभिचारज्ञानत्वादेरेवव्यभिचारविषयकज्ञानत्वादेरेव एवकारेण व्यभिचारविषयत्वादिव्यवच्छेदः। भ्रमेपि
सत्वादिति न तत्र चतादृशबाधविषयकत्वस्याभावादिति दोषः। नव्याववबाधविषयत्वस्यानुमितिनिष्ठत्वेन संभवतीति भावः। विषयकत्वस्यैव
विषयकत्वस्यापि असंभवादिति यथार्थेनैव लक्षणादिति भावः। इदमुपलक्षणं भ्रमनिर्णीतिभिन्नवन्हिमत्वस्यापि तन्मात्रेऽसंभवेन मिश्रप
त्वादिविवक्षायां यथार्थैरपि संभव इत्यपि बोध्यं। तेनेत्यादि व्याख्यानेनेति शेषमाह स्वरूपासिद्धीति उक्त स्थलेषु मा भावस्वरूपवत्त्वमकेत्या
दि। ज्ञानेनापीति प्रमात्मकज्ञानेनापीत्यर्थः। वन्हिव्याप्यपर्वतेधूमप्रत्यक्षस्यापि सत्वादिति भावः। विशिष्यसत्वे पर्यन्तेति इदमुपल

दी०

६२

स्यरणोऽन्यमपर्यन्तस्यापि दृष्टव्यं परपृष्ठे पादि। एवं च हेतौ दुष्टत्वं पारिभाषिकमेवेति ध्येयं। नन्वेवं विशेषणीयं चेत्यादिकमसंगतं प्रमेयत्वविशिष्टव्यभि
चारादिज्ञानस्य स्वरूपसंबंधरूपावच्छेदकत्वाभावादेवानतिप्रसंगादत आह इत्थं चेति यथाश्रुते तिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशा
भिप्राये तादृशनिष्कर्षेत्तत्र इदमेवेति भावः। नवीनास्तु हेत्वाभासनिष्कर्षस्यावश्यकतया विशेषणीयं चेत्यादि ग्रन्थस्य संगतिरित्याहुः। नियत
तसमूहालंबनानभ्युपगमेऽपि विशेषणीयं चेत्यादिकं तदभ्युपगमे तु तन्निष्कर्षे विशिष्टान्तरस्यापि न विशेषणीयमिति दीधितिकृतो व्याख्याया
अविरोधिविषयताप्रयुक्तस्य स्यानिवेशेनोदासीनपदार्थघटितत्वाभिप्रायस्येवेत्यस्य रसादाहुः केचित्त्विति। न चापि वेति उक्तानतिरिक्तवृत्तित्वरूपत्व
र्यः। इदं चावच्छेदकविशेषणं। तत्र प्रमेयत्वविशिष्टव्यभिचारे। व्यभिचार इति तिनामिति व्याप्तिरिति शेषः। ननु प्रमेयत्वविशिष्टव्यभिचारादिहेतु
दोषत्वेन संग्राह्यत्वविशिष्टस्यानतिरिक्तत्वात् नीलधूमत्वादिव्याप्यतावच्छेदकत्वेपि नीलधूमादिस्तु द्वावनेनैव प्रमेयव्यभिचाराद्युद्भाव
नेकेवलं तादृशनिग्रहो भवति शब्दाधिक्यादित्यत आह तत्र वदन्ति प्रमेयत्वविशिष्टव्यभिचारादावित्यस्य व्यभिचारादिविशिष्टप्रमेयत्वादिवैशि
ष्ट्यस्येत्यर्थः। अत [illegible] विप्रमेयत्वादिविशिष्टे सव्यभिचारादाविति पाठः। एवं च येन ज्ञानेन शुद्धवह्नित्वावच्छेदेन धूमाद्यभावकूटमिति वंध
माद्यभावकूटाभिवह्नित्वावच्छेदेन प्रमेयत्वादिकं गृहीतं तादृशज्ञानीयविशिष्टवैशिष्ट्यविषयतायाः प्रकृतानुमितिप्रतिबंधकतानति

राम०

62

292

रिक्तवृत्तित्वापातात् तत्र तादृशावच्छेदेऽतिव्याप्तिरिति पर्यवसानात्रानुपपत्तिरिति। अव्याप्तिरिति ननु अनुमितेरनाहार्यत्वनियमेनात्र धूमत्वाभि
वारिवह्निमान् पर्वतो धूमवानत्र धूमव्याप्यवह्निमानिति समूहालंबनानुमितेरप्रसिद्ध्या तादृशानुमितिप्रतिबंधकताघटितलक्षणस्य नाव्याप्ति
संभव इति चेन्न तथाप्यनुमितिपदस्यानुमितित्वकारणतान्यतरपरत्वे प्रथमकल्पे व्याप्तेर्दुर्वचत्वात्। यद्धर्मत्वमिति इदं च प्रतियोगिकोऽयं स्व
त्वनिवेशे सत्वनाय अन्यथानुयोगितास्वत्वनिवेशे व्यभिचारादेः स्वावच्छिन्नप्रतिबंधकतासामान्यावच्छेदकस्वाविषयकत्वनिवेशे विषयाप्रसि
द्ध्याऽसंभवापत्तेरिति ध्येयं। प्रसिद्धमिति तथा च प्रमेयत्वविशिष्टव्यभिचारावच्छिन्नाव्यभिचारनिष्ठप्रत्वावच्छिन्नप्रतिबंधकतैव न स्वाश्र
के व्यभिचारोऽप्यवच्छेदक इति तादृशं च यद्धर्मत्वं तद्दंतर्गतप्रमेयत्वविशिष्टव्यभिचारघटितत्वस्यात्राभावान्नोक्तातिव्याप्तिरिति भावः उ
क्तेति धूमाभाववत्तादृशविशिष्टपक्षात्मकव्यभिचारघटितत्वस्यापनात् व्याप्तिरिति अयमाशयः प्रकृते धूमाभाववत्तादृशविशिष्टपक्षात्म
कबाधावच्छिन्नाबाधनिष्ठप्रत्वावच्छिन्नाव्यभिचारनिष्ठप्रत्वावच्छिन्नाच प्रतिबंधकतानिरूपकबाधस्वाविषयत्वे योक्तप्रतिबंधकताद्युपाननि
रिक्तवृत्तित्वात् तथा च प्रतिबंधकतासामान्यांतर्गतता यादृशबाधायाः प्रतिबंधकताया व्यभिचारो नावच्छेदकः अतिरिक्तवृत्तित्वात् नापि धू
माभाववत्पर्वतात्मकबाधः तत्र एव नाप्युक्तबाधः तस्य स्वाविषयकप्रतीतिविषयत्वाभावादिति तादृशं यद्धर्मत्वं तद्दंतर्गतो नोक्तबाधः किं

१३

श०　63

तुप्रमेयत्वादिविशिष्टेऽन्वाधय्यवतद्घटितत्वस्पोऽन्वाधेसत्वान्नाव्याप्तिरिति। सामान्यलक्षणव्यापकत्वपर्यवसानेनतन्निवेशोगौरवादृश्च
स्तुतस्मिन्निति। यथाकथंचित्साजात्यस्यातिप्रसक्तत्वादाह सजातीयं चेति। आभासतावच्छेदकेति हेत्वाभासविभाजकरूपेणर्थः। अत्राभासता　294
वच्छेदकत्वं व्यभिचारत्वादीनां परिचायकतयोक्तं ननु तद्रूपिनिविष्टं एतेवाभासतावच्छेदकत्वस्य प्रागत्तत्वात्हि रसमसंगतमिति तद्रूपवत्तां प्रयुक्ते।
नादृशेति। उक्तान्वाधघटकेमर्थः वाधेति उक्तान्वाधेत्यर्थः इतीतिनाव्याप्तिरिसस्यानुषंगेणान्वयः। पूर्याभाववत्तादृशविशिष्टयसाध्यकवर्ध
स्वस्वसमानजातीयतादृशप्रतिबंधकतावच्छेदकांतरं यत्तादृशविशिष्टयसवत्त्वि साध्याभावाप्रमकवाधांतरेनद्घटितत्वान्नाव्याप्तिरित्याश
यः। अत्रेदं बोध्यं अत्र स्वस्वमनुयोगीत्येवनिविष्टं अतएवात्रयघटत्वमिति नोक्तं साजात्यतियामकं व्यभिचारत्वादिकमपि साजात्यघटि
विशिष्टोतरघटितत्वेन घटितमेवोपादेयं तेन प्रमेयत्वादिविशिष्टव्यभिचारादेर्हेत्वाभासत्वविरहेपि हेत्वाभासविभाजकव्यभिचारत्वादिना
तत्सजातीयाप्रसिद्ध्यातस्यस्वपदेनोपादानस्याशक्यतयानतत्राप्यव्याप्तिः। अथैवं यद्विषयकनिश्चयस्यविरोधिविषयताप्रयुक्तोभया
भावदृति वत्पमाणत्वस्तोविशेषविषयताप्रयुक्तपदेवैयर्थ्यं तत्रापि प्रमेयत्वविशिष्टव्यभिचारादावतिप्रसंगवारणायैतादृशीति स्वु
सरणीयतयोदासीनघटादेस्तादृशरूपेणासजातीयाप्रसिद्धेवतत्रातिप्रसंगवारणासंभवादिति चेन्नतत्रात्रचरंतीमतेन सूत्रणीयास्वरस　राम०

एतद्घटकस्यापि निवेशेनानुपपत्त्यभावात्। वस्तुतस्तु तादृशज्ञानविरोधित्वमिति निष्कृष्टतल्लक्षणे विशिष्यान्तराघटितत्वं न निवेश्य
मिति वक्ष्यते। एतेन च स्वप्रमाणत्वम् एको विरोधिविषयताप्रयुक्तपदस्योक्तरीत्यावैयर्थ्यपरिहाराय अत्र स्वत्वं प्रतियोगिकोटौ निवेशनीयं
स्वसजातीयविशिष्यान्तराघटितं यद्घटितत्वं तद्विषयकप्रतीतिविषयत्वस्य विवक्षयाऽनुयोगिनि स्वत्वानन्तर्भावेनोदासीनघटादिपदार्थेऽति
प्रसङ्गवारणाय यत्नस्सार्थकमित्युपेयं। अथैवं व्यभिचारविशिष्टमेयत्वादेः स्वसजातीयाप्रसिद्ध्या तस्य स्वपदेनोपादातुमशक्यत
या मेयत्वविशिष्टव्यभिचारादेरेव स्वपदेनोपादेयतया तस्मिंश्च तत्रातिप्रसंगः, न च मेयत्वादिविशिष्टव्यभिचारादेरपि स्वसजाती
याप्रसिद्ध्या कथं स्वपदेनोपादानमिति वाच्यं। विशिष्यान्तराघटितत्वाघटितव्यभिचारादिविभाजकघटितसामान्यस्य तद्दृष्टकव्यभिचार
व प्रसिद्धेरिति चेन्न। विशिष्यान्तराघटितत्वेनाघटितस्य साध्यसाधनग्रहाविरोधित्वान्न निरुक्तविषयतासंबन्धेन व्याप्तिग्रहप्रतिबन्धकत्वानि
रुक्तवह्निमत्त्वादिरूपस्य व्यभिचारादिविभाजकस्यानन्तर्भावेन तादृशरूपस्य व्यभिचारविशिष्टमेयत्वादिमेयत्वादिविशिष्टव्यभिचारादिसा
धारणतया तस्य स्वपदेनोपादानसंभवेन तत्र तत्रातिप्रसंगात्। एवं च व्यभिचारादिघटितबाधादावपि विशिष्यान्तराघटितत्वाघटितव्य
भिचारत्वादिमत्त्वेन तद्दृष्टकव्यभिचारादेर्व्यभिचारत्वादिना तत्सजातीयतया तत्संग्रहानुपपत्तितादवस्थ्याद्वस्तुतस्त्वत्र मादिनोक्तप्रकारेः

295

टी० 64

संगततया चेन्निनवीनैमस्मिन्प्रोक्तदूषणोपरास्तं उक्तरीत्या सर्वसामंजस्यात्‌। नन्वेवं व्यभिचाराद्यसंभवः। तत्र तादृशस्वसमानजातीया
प्रसिद्धेरतस्साहचर्याच्चेत्याहिन्नाप्तमिति व्यभिचारांतरस्यैव तादृशस्य प्रसिद्धेरिति भावः। अप्रसिद्ध्या व्यभिचाराद्येतरमाद्यपलक्षणा
गमनेऽप्यसंभव इति तादृशस्वसमानजातीयाप्रसिद्धेरिति भावः। अथैवं वह्निसमानाधिकरणाभावप्रतियोगितावच्छेदकधूमत्वावच्छिन्न
साध्यके वह्निसमानाधिकरणाभावप्रतियोगितावच्छेदकधूमत्वावच्छिन्नाभाववद्वृत्तिवह्निरूपव्यभिचारेऽव्याप्तिस्तस्यातादृशस्वसजातीय
व्यभिचारांतरघटितत्वादिति चेन्न। लघुधूमत्वसमनियतोक्तधूमत्वरूपसाध्यतावच्छेदकस्य गुरुतया अभावप्रतियोगितानवच्छेदकत्वेनता
दृशव्यभिचारासिद्धेः। तत्र धूमत्वावच्छिन्नाभाववद्वृत्तिवह्नेरेव व्यभिचारत्वांगीकारात्‌। एतेन नीलोपेतस्य भाववानिलाद्यैव वह्निमद्देतन्त्व
रूपस्वजातीयविशिष्टांतरघटितेवह्निमद्देन नीलादिरूपवाधे व्याप्यादद्दमसंगतमिति मान्योक्तदूषणोपरास्तं तत्र वह्निमद्देनत्वरूपस्य
ववाधत्वांगीकारात्‌। नचैवं धूमव्यभिचारिवह्निमान्पर्वतो धूमवान्वह्नेरित्यादावपि धूमाभाववत्पर्वतो हेरेव वाधत्वांगीकारसंभवेन धूमा
भाववत्तादृशविशिष्टपक्षात्मकवाधेऽव्याप्त्यसंभवेन तदुद्धारणायासोऽनुचित इति वाच्यं तत्र पर्वतत्वसामानाधिकरण्येन तादृशवाधस्यावि
शिष्टपक्षकानुमित्यविरोधितया पर्वतत्वावच्छेदेन तादृशवाधस्यैव विशिष्टपक्षप्रसिद्ध्या वाधत्वांगीकारासंभवेनोक्तविशिष्टपक्षात्मक

296

राम०

बाधस्यैव लक्ष्यत्वांगीकारस्यावश्यकत्वात् । केचित्तु तादृशावच्छेदकमित्यस्यैकधर्मावच्छिन्नप्रतिबंध्यतानिरूपितप्रतिबंधकतावच्छेदक
मित्यर्थः । तेन बाधाव्याप्तिरिति प्राहुः । एवं विशिष्टान्तराघटितत्वनिवेशः । एवं साध्याभाववद्वृत्तिसाधनमात्रस्य हेत्वाभासत्वे । यादृशपक्षेय
मिति यद्धर्मावच्छिन्नोपाध्यर्थकमित्यादिना स्याद्वितीयोऽतिनच पारिभाषिकमेव हेतुदोषत्वमिति वाच्यं । संभवतो योगार्थस्य त्यागायोगात् । इ
ष्टं च निपतनसमूहालंबनानुपगमेनानतिप्रसक्तवृत्तिसंघटितमेवलक्षणं तासम्यगित्याशयेन तेन तदुपगमे यद्रूपावच्छिन्नत्वेनोपस्थि
तस्य पक्षतेसायुक्तस्वरूपसंबंधरूपावच्छेदकत्वघटितलक्षणस्य मतेऽपि हेतुदोषत्वस्य पारिभाषिकत्वस्यावश्यकतया नासंगतिः । संत
त्यमानत्वेति निश्चयाभावरोगावंतु: यत्किंचिद्विशेषणोपलक्षकं विशिष्टधूमत्वेनास्यवह्निजन्यतावच्छेदकत्वे जात्यविशिष्टेनेत्यर्थः इत्यस्यापि । तत्र
वह्नित्वावच्छिन्नसाध्यकधूमत्वावच्छिन्नहेतुकस्थले प्रापार्थकत्वमेवेति निष्कृष्टत्वानन्तु यद्यपार्थकं तन्तु निग्रहस्थानं विशेषणमेवेति
भावः । अत एवाप्रार्थकत्वनिरासार्थमेव । केचित्तु पक्षादरसंग्रहाशयेनैव स्वसंमतं मतमाह निर्वह्निरिति हेत्वाभास एवेति । अत्र न
व्याप्यतत्रापार्थकस्वरूपं निग्रहस्थानदोषेणतत्ततु प्रामयोः कुर्पिग्रह सोऽपि हेतोर्दुष्टत्वव्यवहारो न स्यादित्याशयः । अत एव तत्र हेत्वाभासत्वा
देवापर्वतोग्निमानित्युक्तस्य न तस्य समर्थीलत्वादिति भावः । वस्तुमात्रोपाति पक्षविषयकनिश्चयस्यैवोपाहेयत्वाद्यर्थः । तेन पक्षसाध्यसाधनानामपि द

त्वाद्यपि लक्ष्यतेति वेश्या नीलत्वाहि नासिद्ध्यंतव क्ष्यमाणाप्रकारेणाऽप्रपरईति सिद्धंतव क्ष्यमाणाप्रकारस्यापि वक्ष्यमाणारीत्या दुष्टत्वमे
वास्वरसः ताद्रूप्येति विरोधिविषयकत्वोप्यर्थः अन्नयद्विषयकनिश्चयनिष्ठविरोधिताविषयिता याऽजभयाभावव्याप्यत्वं स्वाश्रयतादृशा
निश्चयाव्यवहितोत्तरानुमितित्वाहि संबंधेन तादृशासंबंधेन त्वाभावैव तदुत्तरमनुमितावित्युक्तं एवं च विरोधिविषयकयद्विषयकनिश्च
याव्यवहितोत्तरानुमितित्वाहि व्यापकत्वात्तादृशोभयाभावइति पर्यवसितमिमाशयेनाहतयावेति। हृदो निर्वह्निरिति निश्चयेति त्वाहि
व्यापकत्वात्तादृशोभयाभावइति पर्यवसितमिमाशयेनाहतयावेति। हृद इदमुपलक्षणं पर्वतपक्षकस्थलेनिर्वह्निः पर्वतोवह्निमाप
त्याद्यौपर्वतो निर्वह्निरित्याहि निश्चयाव्यवहितोत्तरतादृशज्ञानेन निर्वह्निपर्वतत्वविशिष्टवत्त्वावगाहित्वाभाववति याभावादुभयाभावनियम
इत्यपि द्रष्टव्यं। तत्र विरोधिविषयकयद्विषयकनिश्चयेतादृशज्ञानेन वह्निव्याप्यधूमवान्वह्निमानित्याकारकानाहार्यमानसज्ञाने
रावमन्येपि इत्यवगाहित्वेनित्याकारकपक्षसाध्यवैशिष्ट्यावगाहित्वघटितोभयावगाहित्वेत्यर्थः। संशयानंतरमिति तादृशज्ञानर
त्वस्यानुषंगः तादृशावगाहित्वेति हृदो वह्निमानित्यवगाहित्वघटितोभयावगाहित्वेत्यर्थः। तादृशबाधादीति बाधादिज्ञानव्यवहितो
त्तरेतादृशज्ञानेनतथावगाहित्वादृश्यवहितेति तेपूर्वकालीनेनतादृशज्ञानेनतथावगाहित्वादुत्तरेतीति भावः। पांखोपीत इतीतियीतत्वव्या

प्यपशंखत्ववान् शंखः पीत इत्याकारके पर्यः। मैनेत्यादि वस्तुमात्राहीनाहआहार्यत्वं चेति। नन्वेवं मानसपदं व्यर्थं प्रत्यक्षसामा
न्यनिवेशेपि शंखः पीत इति चाक्षुषस्यापि यविशेषजन्यत्वेनाहार्यत्वात् दोषाविशेषानवकाशादत आह दोषविशेषेति। मानसप्र
मजनकस्येति शंखे पीतत्वादि चाक्षुषप्रमजनकानेतदोषाणां प्रवेशे गौरवादिति भावः। मतविरोधं परिहरति इत्यपेति।। साध्या
प्रसिद्धेति साध्याप्रसिद्धिसंग्रहाय साध्यतावच्छेदकविशिष्टइति बाधप्रतिरोधसंग्रहाय साध्यवैशिष्ट्येतीति भावः। सव्यभिचारे
ति सव्यभिचारसंग्रहाय साध्यतावच्छेदकेत्यादि व्याप्तिविशिष्टोक्तं साधनाप्रसिद्धिसंग्रहाय हेतुतावच्छेदकविशिष्टेति स्वरूपासि
द्धिसंग्रहाय विशिष्टहेतुमत्वेनेति भावः स्वरूपासिद्धाविति नान्यतिव्याप्तिनाविरोधपरिग्रहः व्याप्तिघटकसाध्यसामानाधिकरण्य
शो याद्दानस्यात्तत्संग्रहाय पोजनकत्वादिति भावः। इत्यपीति नेति। अत्र ताहृशनिश्चयापाभवहितोत्तरत्वस्याप्रवेशो नाहार्यताहृशा
वगाहित्वाभावमलद्भ्याभावरसुकोनिर्वह्नि? पर्वतो वह्निमानित्यादि स्थलीयबाधाद्यवच्छिन्नस्तत्र नाहार्यताहृशावगाहित्वाभाव
सिद्धेरतत्सत्त्वारिपाराः एवं प्रकृतपक्षे प्रकृतसाध्यताघाप्याभयवैशिष्ट्यावगाहित्वाभावोपिनोक्तः (किंतु पक्ष गवगाहित्वद्वय)
मुक्तं। अन्येवमपि याहृशहेत्वाभासनिश्चयाव्यवहितोत्तरमताह) यत्र प्रकृतपक्षे प्रकृतसाध्यतघाप्याभयवैशिष्ट्यावगाहि

टी०

66

स्वमप्रसिद्धं तत्र वा बाधादेरसंग्रहापत्तेः किंतु पृथगवगाहित्वद्वयमुक्तं । अथैवमपि यादृशहेत्वाभासनिष्ठप्रायत्वविशिष्टोत्तरमनाहार्यमान
सज्ञानमप्रसिद्धं तत्राव्याप्तिर्दुर्वारैवेति चेन्न तत्र तस्यालक्ष्यत्वात् । वस्तुतस्तु स्वयमप्यस्वरसात्र तद्वदितीत्यनेन सूचनीयास्वरसमध्ये बोध्य इति
ध्येयं केचित्तु यादृशविषयकनिष्ठप्रयोज्यत्वस्वव्यापकत्वेनावगाहित्वद्वयानाहार्यमानसज्ञानत्वे तन्नेतयाभावो वाच्यस्तथा च नोक्तदोष इत्याहुः
अपरे तु लौकिकेन स्वबाधनिष्ठप्रयोज्यत्वरलौकिकत्तयात्तानात्वप्तमनिसति लौकिकसन्निकर्षदोषविशेषजन्येतरयरं तेन शंखो न पीतो हं
न गौर इत्यादि बाधनिष्ठप्रयोज्यत्वरं शंखः पीतो हं गौर इत्यादिदोषजन्यज्ञानोत्पन्नावपि न क्षतिः न वा यद् हेत्वाभासनिष्ठप्रयोज्यतरंनानाहार्यमान
सोत्पत्तिसत्त्वाव्याप्तिरित्याहुः । आश्रयासिद्ध्यादावितिस्वादिना साध्याप्रसिद्ध्यादिपरिग्रहः । नादृशालानेतितत्पायवपक्षतावच्छेदकाव
वच्छिन्नविषयतानिरूपितसाध्यतावच्छेदकावच्छिन्नविषयत्वादेरभावो निवेशनीय इति भावः । अन्वयसाधारणेति तस्या एव व्याप्तिपक्ष
धर्मिसिद्ध्यभिमानः स्वप्न्यगासंगतिरिति तस्याव्यतिरेकव्याप्तिविशिष्टवैधर्म्यावगाहित्वस्यान्वयव्याप्तिविशिष्टवैशिष्ट्यावगाहि
त्वपक्षतावच्छेदकविशिष्टे साध्यवैशिष्ट्यावगाहित्वेतत्त्वावच्छिन्नाभावो निवेशनीय इति भावः । दीधितौ वाहार्यज्ञाने यदेतिनवत्वा
देरव्याप्यवृत्तित्वग्रहदशायां तादृशावगाहित्वप्रसिद्धिरनाहार्यज्ञानेऽपि संभवतीति वाच्यं । निर्विकल्पत्वे रित्याहो निरर्थयपक्षतावच्छेदके भावेव

300

रा१०

वन्ह्यादेर्विरोधप्रतियोगितायामपसंबंधेनावच्छेदकत्वं तयातदालंबनादेरप्याप्रसिद्धिरूपमहासंभवात। ननु विरोधिविषयत्वाविशेषेऽपि निर्वन्हि
र्वन्हिमानित्यादेर्नकोहेत्वाभासः स्यात् तत्र हि निर्वन्हिः निर्वन्हिरूपबाधस्य वन्हिमान्निर्वन्हिरूपाश्रयासिद्धेश्चानवकाशत्वं संभवति नाद्वि
ययकनिश्चयस्याविरोधिविषयत्वाप्रसिद्धेः आद्येत्वस्यस्वधर्मितावच्छेदकत्वाभावात् द्वितीये आहार्यज्ञानस्याविरोधित्वादित्यत आह आ
ख्यायां निर्वन्हिः पर्वतइत्यादि। सएव निर्वन्हिपर्वतस्तथा सएव निर्वन्हिहृदएव। इत्यर्थेति। न वेदमसंगतं धर्मितावच्छेदकभेदादिति
वाच्यं। समानविशेष्यत्वेनैव ग्राह्याभावादिग्रहस्य प्रतिबंधकत्वमित्याशयात्। भ्रमयातिर्वन्हिः पर्वतो वान्हिमानित्यादावप्रतिबंधकता ए
तेन निर्वन्हिर्वन्हिमानित्यादौ हृदत्वादिविशिष्टे बस्वभावस्य हेतुत्वेऽपि वस्तुमात्रस्य वृत्तेः पक्षत्वस्वीकारे तु चिंतः। तत्र हेतुत्वव्यवहाराभावान्नतप्र
मितेतुल्यं प्रकृतेऽपि धर्मितावच्छेदकभेदादिति दूषणोद्धारवनं निरस्तं निर्वन्हि हृदादौ हृदो वन्हिमानित्यादिस्थले हेतुत्वस्य सर्वानुमतत्वेन तत्र
तयावस्तुमात्रे हेतुत्वस्याकुत्राप्यक्लृप्तत्वात्। वैयर्थ्येण गुरयोतित्याप्येनतुल्यत्वाभावाच्च। सः वन्हिमत्पर्वतः। निर्वन्हित्वावच्छिन्नेति निर्वन्हि
त्वघटितधर्मावच्छिन्नेत्यर्थः। ननु वन्हिमत्पर्वत इत्याश्रयासिद्धिस्थानस्य पर्वतो निर्वन्हिरित्यस्य ग्रह विरोधित्वेपि निर्वन्हित्वेत्यर्थः। ननु वन्हिम
त्पर्वतरूपबाधस्थानस्य पर्वतो वन्हिमत्व ग्रह विरोधित्वेपि निर्वन्हिर्वन्हिमानित्यगाहित्वाभावान्न विरोधित्वविषयताप्रयुक्तः आपत्ता

टी० 67

नस्य वह्निमत्तांशस्य महाविरोधित्वात् द्वितीयस्तानस्य पर्वतो निर्वह्नित्वांशस्य महाविरोधित्वादित्यत आह निर्वह्निर्वह्निमानित्यत्रेति ॥ निर्वह्नित्वमहि
मत्त्वांशयोः तद्रूपयोः अत्र तद्रूपद्वयस्य पक्षे परस्पराश्रयासिद्धौ बाधे वान्वयाबोधः तादृशेति वह्निमत्त्वनिरूपणार्थः ॥ तादृशेति निर्वह्निपर्वतेत्यर्थः
सत्त्वादिति तयोर्यत्किंचिदेकदेशविरोधे नैव तादृशविशिष्टावगाहित्वाभावस्य विरोधिविषयताप्रयुक्तत्वं अन्यथा ह्रदो वह्निमान् निर्वह्निः पर्वतो व
ह्निमानित्यत्राप्यनिर्वाहादिति भावः ॥ ननु वस्तुमात्रनिष्ठस्यापि विरोधिविषयत्वमस्य वस्तुमात्रस्यैव केनचित्सह विरोधित्वादत आह ग्रा
ह्याभावेति तस्य विरोधिविषयत्वेऽस्य साध्यस्य विरोधित्वान विषयत्वेन साध्यनिष्ठस्य पर्याप्तत्वविरोधिविषयताया नैव पूर्वोक्तविरोधिविष
यकत्वाभावात् न द्वारेणासिद्ध्याशयेनाह व्याप्यत्वाभावे सतीति नीलघटादाविति तस्य पक्षवृत्तित्वेऽपि यत्तद्रूपेणोपाधितोऽशक्यत्वादिति भावः ॥ स्वरूपसंबं
धविशेष इति स च द्वयोर्व्यतिरेक इत्यग्निमान्वयीत त्रमानमाद्यभवति हीति ॥ स्वरूपकथनमात्रमिति मात्रपदेन व्यावर्तकत्वस्य व्यवच्छेदः ॥ न त्वाव
तादृशप्रयुक्तत्वलाभायैवेतदिति भावः ॥ याद्रूप्यकेति यादृशविषयतापर्याप्त्यधिकरणेत्यर्थः ॥ निष्ठस्येति विरोधिविषयतानिरूपितं निरूपि
तत्वं च बोध्यम् ॥ विरोधीति वस्तुगत्या विरोधी यो हेत्वाभासस्तन्निष्ठेत्यर्थः ॥ यत्किंचिज्ज्ञान इति इदमपि स्वरूपकथनमात्रं घटादिनिष्ठतादृश
वगाहित्वाभावस्य स्वतःसिद्धतया किंचिदप्रयुक्तत्वेनार्थत एव तल्लाभात् तादृशावगाहित्वाभावः तादृशोभयाभावः तथा च यादृशविषय

302

राम०

तापर्याप्तविकरणानिरूपणीयविरोधिनिरूपितविषयतायास्तादृशप्रयुक्तत्वाश्रयस्तादृशोभयाभावस्तादृशविषयत्वपर्याप्त्यधिकरणत्वं हे
तुदोषत्वमिति पर्यवसितोऽर्थः। यत्तु ह्रदो वह्न्यभाववानित्याद्यनिरूप्यानन्तरोत्पन्नघटादिज्ञानेन तादृशानिरूप्यत्वेऽपि ह्रदत्वादिविशिष्टनिरूपितवि
षयताप्रयुक्तस्तादृशोभयाभावोऽस्त्येव वह्न्यभावादिविशिष्टह्रदादिविषयताया वह्न्यादेः तत्तयानिह्रदत्वादिविशिष्टविषयताया अपिप्र
योजकत्वात्तत्तया बाधाघायकदेशे ह्रदत्वादिविशिष्टे इति व्याप्तिरिति यच्छिष्यकानिरूप्यायावहितोत्तरक्षणोत्पाद्यमानसत्तानसामान्ये विरोधि
विषयताप्रयुक्तोभयाभाववत्त्वं निवेश्यं तथा सति ह्रदादिनिरूप्यानन्तरोत्पन्नतादृशज्ञानसामान्यान्तर्गतह्रदत्वादिनिरूप्यानन्तरजाते ह्र
दो वह्निमान् वह्निव्याप्यधूमवांश्चेत्याकारकज्ञाने विरोधिविषयताप्रयुक्ततादृशोभयाभावासत्त्वान्नातिव्याप्तिः। एवं च तद्वत्तरमिलाद्वे
स्वरूपकथनमात्रमिति नवीनैरुक्तं। तत्र सत्ता वह्न्यभाववद्ध्रदादिनिरूप्यनिरूपकभावापन्नविषयताया एव प्रतिबंधकतावच्छेदकत्वेन ता
दृशोभयाभावप्रयोजकत्वात्। अन्यथा विशिष्टान्तराघटितत्वमपि विशेषणमत्र नदेयं। प्रमेयत्ववह्निघटितविशिष्टनिरूपितादृशविषय
ताया स्तादृशोभयाभावाप्रयोजकत्वात् वह्न्यभाववद्ध्रदादिनिरूप्यानन्तरं ह्रदो वह्निमत्प्रमेयव्याप्यवगाहिनादृशज्ञानेन जायते किंतु घटा
दाविव तादृशज्ञानं जायते तन्निष्ठस्तादृशोभयाभावश्च वह्न्यभाववद्ध्रदादिनिरूपितादृशविषयताप्रयुक्त इति वह्न्यभाववद्ध्रदादौ लक्षणास

मन्वयः वह्निमत्पर्वतादिरूपाश्रयासिद्ध्यादिनिषेधविषयताप्रयुक्तश्चेत्तन्निश्चयानंतरोत्पन्नघटादिज्ञाने आह व्यर्थज्ञानानिषेधतादृशावगाहित्व
योर्व्यतिरेकइत्यादि वह्निः पर्वतो वह्निमानित्यादौ लक्षणासमन्वयः । न च तादृशावगाहिज्ञानाभावस्य विरोधिविषयताशालिज्ञानप्रयुक्तो
न यातादृशावगाहित्वाभावे विरोधिविषयताप्रयुक्तत्वं कथमिति वाच्यं प्रतिबध्यतावच्छेदकधर्माभावस्य स्वाश्रयाव्यवहितपूर्ववर्त्तिनि
षप्रतिबंधकतावच्छेदकधर्मप्रयुक्तत्वात् । न च तादृशबोधेशिष्टावगाहित्वयोः प्रत्येकाभावस्यैव तत्प्रयुक्तत्वेन तन्मयाभावइति वाच्यं तत्प्रयुक्तप्र
त्येकाभावप्रयुक्तोभयाभावस्य सुतरां तत्प्रयुक्तत्वात् । विरोधिविषयत्वेति विरोधिनिषेधविषयतेत्यर्थः तस्य लक्षणांतरत्वेन यथासंनिवेशो
न वैयर्थ्यमत आह किंचेति किंचिदिति छायास्येत्यादि न नु तस्य छायाविरहप्रयुक्तत्वेऽपि पर्वतत्वविशिष्टवह्न्यभावत्वविशिष्टवह्न्यभाववैशिष्ट्यावगा
हित्वरूपव्यापकव्यतिरेकस्य विरोधिविषयताप्रयुक्तत्वेन तत्प्रयुक्तस्य सुतरां विरोधिविषयताप्रयुक्तत्वमिति नाव्याप्तिरत आह तत्प्रयुक्त
त्वाप्रवेशेनेति तत्प्रयुक्तलाघवेनेत्यर्थः तथा च लाघवादेव लक्षणांतरप्रतायनमित्याशयः । तथैव । तथासतीत्याद्युक्तरीत्यैवेने
नवच्छिन्नमात्रालक्षणत्वामंतरवच्छिन्नमात्रालक्षणतास्यैव तथासतीत्यादिनोक्तत्वात् यावच्छिन्नमात्रालक्षणतास्य तथासतीत्यादिनानुक्तत्वेऽपि न
स्मृतिः एतेनात्राभावाधिकरणतायामेव विरोधिविषयताप्रयुक्तत्वं निवेश्यते तथा चाभावाभेदेपि तदधिकरणतानामधिकरणाभेद

राम०

304

नभिन्नतया विशेषितानन्तं तत्तत्प्रकारताकेन तादृशवैशिष्ट्यावगाहित्वाभावाधिकरणतायां विनिगमनाविरहेण पूर्वं ज्ञानीयविरोधिविष

यतायास्त्रापि प्रयोजकत्वकल्पनात्वाम्मिति नवीनैरुक्तं तदपि परास्तं तथासत्यधिकरणभेदभिन्नानन्ताधिकरणतानां स्वरूपतो निवेशे महा

गौरवप्रसंगात् तद्विषयकज्ञानमिति तत्सामान्यमपि पर्यवसन्नेन पूर्वोक्तघटादिविषयकसमूहालंबनस्याविरोधिविषयकत्वेपि तद्घटादावति

प्रसंगः तथात्वात् अविरोधित्वात् अनुमितजनकज्ञानविषयविषयकज्ञानत्वेन तज्ज्ञानीयकोटिशिरोवेष्टनेन तन्निष्पादयावतां स्वपत्तेश्चाह निर्वह्निरि

त्वादिः लक्षणासमन्वय इति इदमुपलक्षणं एवं निर्वह्नित्वाभाववद्धीविषयपर्वतरूपायाः सिद्धावपि निर्वह्निः पर्वतो वह्निमानिति तद्वि

षयकसाध्यलक्षणाविषयको निर्वह्निः पर्वत इति ग्रहस्तद्विरोधी वानिर्वह्नित्वाभाववान् पर्वत इति ग्रहः तद्विषयत्वात् लक्षणासमन्वयपर

त्वमपि बोध्यं तादृशावगाहित्वावच्छिन्नविषयतेति अत्रावच्छिन्नत्वमवच्छेदकतानिरूपकत्वमवच्छेदकत्वं वानतिरिक्तवृत्तित्वं तेन ता

दृशावगाहित्वव्यापकविषयतेति बोध्यं तादृशविषयतावच्छिन्नप्रतिबध्यतेत्युक्तौ निर्वह्निः पर्वतो वह्निमानिति सा हि तादृशाहार्यता

नंतर्गतपर्वतो वह्निमानिति सादिविषयतैव तादृशीनमनाहार्यताभीयाज्ञानस्वरूपविषयताया ज्ञानभेदेन भेदात् तत्स्वाश्रयप्रतिबध्य

तावच्छेदकत्वं अनाहार्यज्ञानमात्रवृत्तिविषयताया एव बाधादिप्रतिबध्यतावच्छेदकत्वात् इति तदवच्छिन्नप्रतिबध्यताप्रसिद्धानन्या

305

र्दं

२१० 69

त्वीयहेतौः व्याप्तिरितितादृशविषयतासमानाकारविषयतावच्छिन्नप्रतिबध्यतेत्युक्तेसमानाकारत्वंचतन्निरूपकातिरिक्तानिरूपकत्वंनचसर्व
मनिसंप्रमेयत्वादित्याहेतन्निरूपकातिरिक्ताप्रसिद्धेरितिवाच्यंतन्निरूपकतावच्छेदकाभिन्नानिरूपकतानवच्छेदकधर्मवत्त्वस्यतदर्थत्वात्। एवंचतत्राना 306
हार्यज्ञानीयवत्वेनोवह्निमानित्यादिविषयतायाअपितादृशविषयतासमानाकारत्वेनतदवच्छिन्नप्रतिबध्यताघटितलक्षणस्यासत्त्वस्यतस्यसत्त्वीय
हेतौसत्त्वान्नाव्याप्तिः विषयतासंबंधेनेतिनकामिनीजिज्ञासीयविषयतयानादृशप्रतिबंधकतावच्छेदकेकामिनीजिज्ञासेतिनाव्याप्तिरितिवाच्यंत
त्रकामिनीभिन्नत्वेनकामिनीभिन्नविषयतायाअवच्छिन्नयाःप्रतिबध्यतावच्छेदकत्वेनास्याश्चतादृशविषयतासमानाकारत्वाभावात् विषयताव
च्छिन्नविषयतेतिविषयताव्यापकविषयतेत्यर्थः। समानाकारत्वाभावादितिहृदहेवह्निमानित्यादिविषयताव्यापकत्वस्यहृदहोघटवानितिवि
षयतायामभावादित्यर्थः। समानाकारिकायाइतिहृदहेवह्निमानितिविषयताव्यापकहृदहेतिविषयतासमानाकारिकायाइत्यर्थः। रासभाद्य
वितिरासभेतादृशप्रतिबंधकतानवच्छेदकत्वाद्बाधादेकदेशेचतादृशावच्छेदकतायाव्याप्यधिकरणत्वाभावान्नाव्याप्तिरित्याशयः। ननुवह्न्य
भावत्वादिनाघटाघटवत्तादिनाबाधोऽपिप्रतिबंधकत्वेनवह्न्यभावत्वाद्यवच्छिन्नप्रकारतानिरूपितहृदत्वाद्यवच्छिन्नविशेष्यताकनिश्चयत्वमेवता राम०
दृशप्रतिबंधकतावच्छेदकंननुविषयतंयाकन्यभाववद्धृदादिकमित्यसंभवः। नचावच्छेदकत्वस्याननुगतिरिक्तवृत्तित्वरूपस्यविवक्षणान्नदोषइति

साध्यं। तथा सति साध्यवत्त्वस्य स्वविषयतासंबंधेन सिसाधयिषाकालीनसाध्यनिश्चयावच्छिन्नतयातिरिक्तत्वमिति येन सिद्धसाधनस्य दुष्ट-
सप्रतिबंधकत्वं चेत्पाद्यग्निमत्त्वयाः संगतेरिति चेन्न। समानविषयकत्वेनैव प्रतिबंधकतया बाधाभावत्वादिनाघटावगाहितानस्यैव प्रति-
बंधकत्वमित्याशयात्। अथ वा पूर्वोपदर्शितरीत्या पदार्थावच्छिन्नत्वेनोपस्थिते धर्मितावच्छेदकावच्छिन्नवत्ताज्ञानत्वेन निरुक्तप्रतिबंधकता-
याः स्वरूपसंबंधरूपावच्छेदकतापर्याप्त्यधिकरणं तद्धर्मावच्छिन्ने तत्प्रकारावच्छिन्नत्वस्य तद्घटितत्वात्पर्यात्। अत एवात्र विशिष्टांतराघ-
टितत्वमपि न निर्विषयप्रयोजनाभावात्। ग्राह्याभावमुद्दिश्येति ग्राह्याभावतद्व्याप्यावगाहित्वान्यतरमुद्दिश्येत्यर्थः। तेन सत्प्रतिपक्षसंग्रहः।
यत्तु ग्राह्याभावत्वादेरननुगतत्वाद्दुर्वचत्वाच्चेयमिदमिति तदसत् व्याख्यातैवैतस्याः स्वरसत्वेन व्यभिचारत्वाभावात्। अलं सत्प्रतिपक्षतासमन्वयः। तत्स्व-
लीयव्यभिचारेऽप्याप्रिग्रहविरोधित्वरूपव्यभिचारत्वसत्प्रतिपक्षतासमन्वयः। अस्मिन्मते स्वरसमाह अत्र चेत्यादिना लक्ष्यत्वेनाभिमतयोश्चैतत्सम-
शीलस्य तस्यापि लक्ष्यत्वेन तन्नामाभिर्दुर्वचत्वेति भावः। तत्रापि दोषमाह तत्र चेति पर्वतो नामवानित्यादावित्यर्थः। निर्वह्निर्वह्निमानित्यादा-
विति आदिनापूर्वोक्तस्य वह्निमान्निर्वह्निरित्यस्य परिग्रहः। तत्रापि वह्निमत्त्वविशिष्टेऽहंत्वविशिष्टे यो निर्वह्नित्वग्रहो वह्निमानयं निर्व-
ह्निरिति ग्रहस्तत्समानविषयकोऽयं निर्वह्निरिति ग्रहस्तद्विरोधी वा यन्निर्वह्नित्वाभाववानिति ग्रहः इति तत्र बाधत्वसत्प्रतिपक्षसमन्वयो बोध्यः

307

दी० 70

हेतुस्तत्रैवनिरुक्तस्यातिप्रसंगादित्यग्रिमेणान्वयः लक्ष्यतो निवेशादिति निर्वह्निर्वह्निमानित्याद्यनुरोधादिति भावः। पर्वतीयमिति इदंत्वाव
च्छेदेनायं गृह्योबोध्यः। एवमग्रेपि। अयं वह्न्यभाववानिति अयंपदेत्व सामानाधिकरण्येन अतिप्रसंगादिति सामानाधिकरण्येन गृह्य
स्यावच्छेदकावच्छेदेन गृह्यविरोधित्वादिति भावः। ननु हेत्वाभासत्वस्य रास्यय पक्षतावच्छेदकादिभेदेन भिन्नतया निर्वह्निर्वह्निमानित्यादा ३०४
वेवेदंत्वघटितं तत्रासंभवेति नोक्तदोष इत्यत आह किंचेति निर्वह्निः पर्वत इति निर्वह्निपर्वतत्वावच्छिन्न इत्यर्थः। तादृश्येति पक्षतावच्छेदक
निष्ठत्यर्थः। तद्विषयइति निर्वह्निः पर्वतो वह्निमानित्यादिग्रहविषय इत्यर्थः तादृश्यावच्छेदकतात्वभिन्नं यन्नद्विषयतानवच्छेदकं तादृ
शयतानवच्छेदकमेयत्वादिसत्त्वेन तद्विषयाप्रसिद्धिनिर्वचनोक्तसर्वमनित्यं प्रकथनदोषाभावेन तत्सुयेत्यदोषांतरमाहुरतयासतोति त्व
हुक्तरीत्या तादृश्यावच्छेदकस भिन्नमित्यादिरीत्यानतुक्तरीत्या स्य लक्षणं वा गीकारान्न दोषः निर्वह्निः पर्वतो वह्निमानित्यादौ न कोपि हे
त्वाभासो गीक्रियते यादृशपक्षकयादृशसाध्यकयादृशहेतुकानुमितिः प्रामाणिकी तादृशहेतुदोषारम्भलक्ष्याः प्रकृतस्यलेवानुमि
तेरलीकतया हेतुदोषानंगीकारे पक्षाप्रसिद्ध्यभावात् पर्वतान्यः पर्वत इत्याद्यसिद्धिग्रंथ मतांतरानुसारेणाश्रयासिद्ध्यादेः पक्षदोषत्वानु
रोधेन निर्घर्मितावच्छेदकतानं प्रत्यपि विरोधित्वमित्यादिरीत्या कथं चिन्त्ये यइत्यत आह एवमिति। दुर्वचमिति इदमुपलक्षणं अन्यथा राम०

भावघटनादिपरिष्कारेऽपि न्यायैवनिर्वह्निः पर्वतो वह्निमानित्यादौ हेतुदोषानुपगमे यद्विषयो येनेत्यादिप्रयासस्तु तोनानलनलक्षणास्यैव स
म्पादकत्वादित्यपि दूषणं। अननुगमात्। अननुगमप्रसंगात्।। तथाच परिष्कृतं यथाश्रुतं च यद्विषयत्वेनेत्यादिलक्षणं तु दुष्टमिति ता
त्पर्यं। एतद्दोषेति। आदिना यत्र विषयविशेषे साध्यतद्व्याप्ययोः पक्षे समूहालंबनप्रसिद्धं तत्रान्यदोषे व्याप्तिरित्यस्य परिग्रहः
अंकुरमात्रेति मात्रपदं यावदर्थकं सद्धेतौ न ह्यंकुरमात्रस्यापि रूपैकस्यापि दोषिति पुरुषस्येति शेषः। असाधारणपमात्रेति तत्र दोषा
न्तराभावादिति भावः। तेनेत्यादिव्याख्यानात् दोषाद्याह अत्र चेति अनंतेति। कृत्स्ने नेतिनेनाति आभिप्राययोजकस्यापि विशिष्टभिन्नभेदस्य ना
मः। ननु तत्कस्यचित् दोषमात्रविषयकसमूहालंबनबुद्धिविषयत्वरूपमेवास्तु तत्कथं निर्वेद्यतामानावतात्युक्तदोषासंभवादत आ
ह ध्येयमिति तादृशबुद्धेः सार्वत्रिकत्वात् अतिव्याप्तिविशेषानसंभवतीति भावः। अत्रेदं बोध्यं। अत्र दोषपदं यत्तज्ज्ञानं निमित्तमपि तादृशान्यतम
विषयतानिरूपकत्वपर्याप्त्यधिकरणत्वरूपान्यतमत्वमेव तु हेत्वाभासः साधर्मे धूमो दुष्ट इत्यादौ धूमादिपदसमभिव्याहृतसाधनपदस्य
धूमादिहेतुकानुमितिरर्थः तत्र च हृदवह्निहृदत्वावच्छिन्नोद्देश्यकपक्षतावच्छेदकरूपसमानाधिकरणतास्यवान्निरूपितवह्निसाध्यवच्छिन्नविधेयताक
रूपपक्षतार्थस्यवान्वयः साधनपदोत्तरसाम्यप्राप्तस्वस्वकारणीयविषयतान्यतरावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकताना

309

टी०

नातिरिक्तवृत्तित्वमर्थः दुष्टइत्येतद्दूरकदोषपदार्थैकदेशविषयतायां तस्य च तथा च ह्रदादिवृत्तिह्रदत्वावच्छिन्नोद्देश्यताकवस्त्वादि
तिवह्नित्वावच्छिन्नविधेयताकधूमादिहेतुकानुमितित्वकारणीयविषयताव्यतिरेकावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबंधकतानतिरिक्त
वृत्तित्वादिविषयतानिरूपकत्वपर्याप्त्यधिकरणत्वात् यो धूमादिः स एव यं बाधः यत्र च निर्वह्निः पर्वतो वह्निमानित्यादावनुमितिरप्रसि
द्धा तत्र वानुमित्यर्थकसाधनाद्युपरंजितताद्रूप्यव्यवहारेणासिद्धेवेति तत्र नानुपपत्तिः। एतेन तावद्रूप्यतमत्वमितरभेदानुमापकमेव
ननु दोषपदस्य प्रवृत्तिनिमित्तं तथा सति निर्वह्नित्वविशिष्टे वह्निसाधने धूमो दुष्टः स्याद्धेतुदोषपदस्य ताद्रूप्यतमवच्छेदकं तत्र निर्व
ह्नित्वविशिष्टवह्निसाधनत्वस्यानन्वितार्थकत्वप्रसंगात् अप्रसिद्धा तस्य त्वेवं त्वपि निर्वह्नित्वविशिष्टविशेष्यकवह्न्यनुमितिप्रयो
जकत्वार्थकत्वासंभवादित्यादि नवीनोक्तं परास्तमिति। अत्र वदन्ति केचित् लिङ्गमनेनैव दुष्टमपि न युक्तं मूलविरोधात् किं तु यद्विषयत्वेने
त्यादिमूलोक्तमेव सम्यक् न च तदुक्तदोषदुष्टमिति वाच्यं। वक्ष्यमाणरीत्या उक्तदोषाभावात् तथा हि। यद्विषयकत्वेनेत्यादिमूलेनानुमितिप
देन पर्वतो वह्निमानित्यनुमितिपरमपि तु कथायां वादिनो मध्यस्थस्य वा जायमाना या लिङ्गसाधकमित्यनुमितिस्तत्परं कथायां तु हेत्वा
भासानामसाधकत्वव्याप्यतया उभयवादिसंप्रतिपन्नतयामेव प्रवर्तनीदोषाणामसाधकत्वव्याप्यत्वं साधयितुं चैवं वाक्यप्रवर्तनीयं

310

राम०

त्पक्षेण मणावेवस्वपक्षं तथा चानुमितिपदेनास्मल्लिंगसाधकमित्याकारकयाकालीनानुमितिरुपगम्यते तादृग्यानुमितौ प्रतिबंधकतालिं
गविरोधव्यंजकहेतुदोषप्रकारकं ज्ञानं ज्ञानाभावलिंगाविषयसमव्याप्त्यर्थवता लिंगविशेष्यकयद्विशिष्टप्रकारकज्ञानत्वेनालिंगविशेष्य
ककयाकालीनसाधकत्वानुमितिप्रतिबंधकत्वं सविशिष्टो हेत्वाभास इत्यर्थो लाभात् । भवति च कयाकालीनानुमितेः पूर्वं दोषा
णामसाधकत्वसाध्यत्वाभ्युपगमेन दोषवत्ताबुद्धिस्तत्प्रतिबंधिकामसाधकत्वं पुनरनुमितिजनकत्वमभिन्नजन्यज्ञानविषयत्वमि
त्यसाधकता यावत्स्यात् । नन्वेवं कयाकालीनायामपि लिंगसाधकमित्यनुमितावसाधकत्वस्य तद्व्याप्यत्वेन गृहीतस्य धर्मांतरस्य बा
लिंगविशेष्यकबुद्धिविरोधित्वाभावादिति तत्र व्याप्तिरिति चेन्न । समयबंधबाकेयेन येन संसर्गेणासाधकत्वव्याप्यत्वमवगतं तेन सं
सर्गेणाग्रहणं तद्धेतुसंसर्गत्वस्यापि लिंगपदेन लाभात्समयबंधविषयश्च व्याप्यतावच्छेदकसंसर्गविरोधिविषयकोऽन्यायश्च हेत्वा
णां न वा न्यायेन संसर्गेण दोषाद्धेतरः कोऽपि हेतौ संसृज्यत इति निश्चायकव्याप्तिप्रसंगः सत्प्रतिपक्षे बाधविरहविशिष्टः साध्याभावव्याप्यवत्ता
निश्चय एव न्यायसंसर्गेण ग्रहीते हेतौ संसृज्यत इति निश्चय एव दोषः पाक्षेप्रतिबंधः वा दलादिसाद्धौ व्याले ऽनित्यसहज्ञानाभावेन घटादि
वानित्यत्वग्रहे रागविशिष्टघटादिव्याप्तत्वमेवाभासस्तस्यैवग्रहीतौ न्यायसंसर्गः पक्षहासत्प्रतिपक्षासाधारण्याभ्यां विशिष्टं नन्वत्र

टी०

साधकमितिसमयबंधवाकोमकालगार्भमसाधकत्वमाप्यवं। तत्रावतारमित्यनित्यपदेशावेतो। कुहोवह्निमानित्यत्रनिर्वह्निहृदस्यसाध्यसंस
र्गेराहेतुसंसृष्टत्वेकेवलहृदेपितयाविशिष्टस्यानतिरिक्तत्वात्। अतोनुमितिप्रतिबंधकतानविषयत्वमुक्तं। नचैवमपिकत्वतत्वानतु
गमोदुर्वारइतिवाच्यं। लिंगविशेष्यककपाकालीनसाधकत्वमनुमितिप्रतिबंधकतावच्छेदकलिंगविशेष्यतानिरूपितविशिष्टप्रकारता
निरूपकतापर्याप्त्यधिकरणंहेत्वाभासइत्यनुगमादितिग्रंथं। मूलग्रंथं। तद्विरोधितयेतिनाहशाव्यवस्थापनाविरोधितयेत्यर्थः। सद्धे
तोरेवहृष्टगाविशेषे: साधारणासत्प्रतिपक्षयोर्दुष्टत्वाहित्वादिप्रयात्मकतानयोरनित्यदोषत्वलाभेनतदुद्धारप्रसक्तिरितिभावः
व्याप्तिरत्वासुः। नयोरवविनिर्णयदोषत्वमितिस्वमतेतन्मूलंव्याख्यातुकामः अदुष्टदुष्टत्वमितिनदुष्टेसमवायियस्यतद्दुष्टंतन्नतनदुष्टंबत
त्वमित्यर्थः। असमवेतदुष्टत्वमितिघटादौव्यभिचारवारणाय। असमवेतोतं। प्रागभावेव्यभिचारवारणायदुष्टत्वसमुपात्तं। अत्रलक्ष्यतापि
नितयोरित्यादिकथामितिसाध्यवदन्यवृत्तित्वादिरूपवास्तवासाधारण्यादेस्तत्राभावादितिभावः। तत्र असाधारण्यादि असाधारणादीतिक्र
दिनासत्प्रतिपक्षपरपरिग्रहः पक्षमात्रवृत्तित्वादीति। आदिनाविरोधिपरामर्शकालीनत्वपरिग्रहः। निमित्तकमितितयावगोरास्तत्रा
साधारण्यादिस्वपदेचाहमिभावः। व्याप्तत्वइति यद्यपिमूलेसाध्यमिकस्यदृष्टाविशेषस्यप्रथमंव्याख्यानमेवोचितंतथापिअभास

312

311

हे०

त्वादित्यत्रान्वयानुरोधेन चरमोक्तस्यापि हेतोरित्यस्य व्याख्यानानंतरमिदं व्याख्यातं। ये मिश्राः तन्मतं दूषयति विशेषे हेतोर्दुष्टतामंगीकुर्व
तोमेयामसाधारण्यादि साधारण्यप्रलक्षणतास्यान्यया व्याख्यानं। आश्रयतया वेति विषयताश्रयतान्यतरसंबंधेनेत्यर्थः। तद्दूषयति
त्यैतेन द्वितीयलक्षणार्थं परिष्कृत्यानुमितिकारणीभूताभाववत्प्रतियोगित्वादि प्रथमलक्षणार्थं परिष्करोति हेत्वधिकरणेति तत्प्रकारकप्रमिति
लक्षणार्थः। लक्षणयोरर्थः। अत्र प्रथमतः प्रथमलक्षणमुपेक्ष्य लाघवात् द्वितीयलक्षणं परिष्कृतमिति ध्येयं। आश्रयत्वं हि तोपस्थि
तविषयत्वस्यतच्छेदेन परामर्शत्वमनिरासायव्यावर्षो व्याख्याया। तद्धिता। वन्हेरेवेति। एककारेणाकेवलान्वयधर्मव्यभिचारव्यवच्छेदः। यरंपरे
तिरक्तता नविषयत्वादेरित्यर्थः। असौ निर्वाधित इति व्यवहारादिति भावः। ननु वन्हिव्यभिचारिदृश्यत्वस्याप्रकृतधूमहेतुकानुमितिप्रतिबं
धकतानवच्छेदकतयाकथं धूमेति प्रसंगइत्यत आह हेत्वाविति संबंधभिचारेति। यादृशविशिष्टविषयकत्वेन ज्ञानस्य यद्धेतुकानुमिति
प्रतिबंधकत्वं तत्र तस्यैव लक्षणत्वपर्यवसानात् स्वाभाविकत्वप्रतिबंधकतानिरूपितप्रतिबध्यतावच्छेदकनिविष्टहेतुत्वस्यैव संबंधत्वसंभ
वादिति भावः। वन्ह्यभाववद्वृत्तित्वं तन्मात्रं। व्यभिचार इति विषयतासंबंधेन प्रतिबंधकतावच्छेदकपर्याप्तिस्साध्याभाववद्वृत्तित्व एव
स्वीकारादिति भावः। वन्हिव्यभिचारित्वं वन्हिव्यभिचारित्वमेव प्रकारः। प्रकारतासंबंधेन ज्ञानवृत्तिप्रतिबंधकतावच्छेदकेन धर्म इति। अतो भा

313

दी.
73

१३

तिप्रसंग इति दोषः साधारण्यादीनामिति। अत्र दीधितौ व्याख्यानुसारेण साधारण्यादीनां पारम्पर्यातिप्रसंगतात्पर्येणेतमेको ग्रंथः। साधारण्या
दिविषयत्वस्यैव तत्तत्प्रकारतासंबंधेन साधारण्यादिरित्यर्थः इत्याहुरिति। एतत्स्य समानाव्यभिचारि प्रकारकमेयत्वादौ तत्रान्वयः सद्धे
तौ। समानाधिकरणत्वाभावादिति स्वघटीयसद्धेतौ व्यभिचारविषयत्वसत्त्वादिति प्रकारतासंबंधेन तत्र न तत्प्रमेयत्वादिहेतुकानुमितिप्रतिबंध
कतावच्छेदकं समानव्यभिचारित्वं विषयतया तद्वत्त्वसत्त्वादित्यर्थः। उक्तरीत्या एतेनोऽप्रकृतस्य अनिविष्टत्वादिति भावः। केचित्तु साधारण्या
दीनामवच्छेदकत्वादिसंगतमेकोग्रंथः साध्यादीनामपरोग्रंथः तत्र प्रकारतायाः संबंधत्वानुपगमेनाथ तस्यासत्त्वोपगमेनापर इत्याहुः दीधि
धितावतिप्रसंजकत्वादिति धर्मोवान्हिव्यभिचारीत्यादिप्रमाने व्यभिचारविषयत्वादेसाद्दशस्याप्रविषयत्वसंबंधेन धूमादावपि
सत्त्वादिति भावः। मनुभवतामिवास्माकमपि साध्याभाववद्वृत्तित्वस्यादिर्दोषः न दुष्टत्वमेनकेनापि संबंधेन तत्र नत्राह विरोधीति आश्वयांत्र
प्रतिबंधकत्वादिति साध्यप्रकृतत्वस्यानिविष्टत्वादिति भावः। न दुष्टविषयहेतोः स्वविषयहेतोः स्वविरोधिसामग्रीकालीनोल्लिंगपरामर्शः प्रति
बंधकीभूतेत्यस्य विरोधिविशेषणतामेवोनरत्वाय तत्त्वविरोधित्वस्य प्रतिबंधकतारूपत्वादनन्वय इत्याह। अत्र प्रतिबंधकीभूतायेनासेव विरोधि
सामग्रीत्वेन प्रतिबंधकत्वेन व्यावर्तनायेति अस्य या सामग्री प्रतिबाध्यं कदापि नस्यादिति भावः। इत्येरो बेतिरएव कापेरा सामग्री

314

राम०

त्वभ्यवच्छेदः न संभवतीति मानाभावादित्यभावः ॥ एवं च दीधितौ विशेषणतोऽत्र न प्रतिबंधके स्वन्वयः प्रतिकूलतर्को बाधको न तथा वा विशे
षिसामग्र्या सत्वे च । दीधितौ इति सामग्र्याः कार्यव्याप्यत्वादिति भावः ॥ यादि चेत्यनेन सूचितमस्वरसमाह वस्तुत इति अप्रामाण्यासंजनेनाऽप्र
प्रामाण्यग्रहं । प्रतिबंध इति पाठः प्रतिबंधक इति पाठस्तु विशेष्यसाकांक्षत्वाद् दुष्टः स्वार्थकप्रत्ययानुसरणात्तूपपादनीयः स्थलीयेति सा
ध्यनीयेत्यर्थः । अतिव्याप्तिरिति लक्ष्यत्वोपगमेऽपि च बाधस्याप्यनित्यदोषत्वापत्तिरिति भावः । अव्याप्तिरिति नवस्य जकाल्पमादाय काशी
नन्वोक्ते नायं दोष इति वाच्यं तथा सति साध्यनिष्ठ्येन निरूपितता इष्टा या मयि सत्त्वेति पक्षितत्वप्रसंगात् । विषयस्यैव प्रतिबंधकतावच्छे
दकत्वमाद्यमिति मिश्राः ॥ केचित्तु अनंतरं दूषयतीति दीधितौ यद्यपीति तद्रूपत्वमेवेत्यनेन विषयस्यावच्छेदकत्वं च्छेदः । व्याख्यायां वन्हयभावव्याप्या
देरिति अभिधानादनापत्तिर्धर्मितापरिग्रहः । तस्य च वन्हयभावव्याप्यादेश्चात्र धर्मे । दीधितौ तज्ज्ञानस्येति एकज्ञानविषयत्वेनेत्यर्थः । विषयज्ञा
याज्ञानरूपत्वात्तज्ज्ञानरूपत्वं व्याख्यायां तादृशेति विरोधिव्याप्यादीत्यर्थः । दीधितौ समूहालंबनतयेति । निरंतरपरामर्शद्वये सत्यपि प
क्षेऽनास्पदे तथाश्रय इति केचित् तावत्तु तत्रापि विरोधिव्याप्यादि प्रकृतहेतुविषयकैकैकज्ञानसत्वात् प्रतिपक्षोऽस्त्येवेति रूपेयं व्याख्या
यामतभेदेन । प्राचीनमतेन । नादर्शोऽति समूहालंबनेत्यर्थः । विशिष्टस्वभावत्वापर्वतस्याप्रसिद्धत्वादाह वस्वभावस्येति धर्मवत्तित्वा

315

७४

टी०

दिति पाठे धूमपर्वतेनवानित्वादिति पाठे पर्वतोपादानं वस्तुगतिमनुरुध्य दृष्टांतप्रदर्शकतया बोध्य पादनीयं सर्वत्रैवैतेन सन्निता र्थविशदप्रति
हृदइति पथाकथंचिदिति तेन बन्हौ तत्ज्ञानरूपसंबंधेनेन सुज्ञानसंबंधविकल्पमावकाशइति पथाकथंचिदिति तेन बन्हौ तत्ज्ञानरूपसं
बंधेने सुज्ञानसंबंध विकल्पमवकाशइतिवाच्यं पर्योते संभवतां यावच्छिकल्पानामेव दुष्टत्वप्रदर्शनस्य सांप्रदायिकत्वात्तथाहि शेषोतिति अन्यथा
दृष्टासंबंधावगाहित्वेनेत्यस्य पादृशासंबंधावच्छिन्नप्रकारत्वेनेत्यर्थः। विशेषणतानिरूपिता या यावच्छिन्नत्वं व्यभिचारविषयतायां तस्याभ्युपगमः। व्य
भिचारविषयतया। व्यभिचारप्रकारतया: अत्रापि तन्निरूपिता या यावच्छिन्नत्वं सच प्रतिबंधकत्वेन्वितः इति प्रतिपरामर्शस्यतादृशीयवस्य
भावव्याप्यधूमत्ववत्तापरामर्शस्य प्रतिबंधकत्वादित्यनेनान्वयः धूमत्वस्येति निरूपितत्वेषष्ठ्यर्थः तस्य समवायितायामन्वयः समवायितया
समवायसंबंधावच्छिन्नप्रकारतयान्ताया याऽवच्छिन्नत्वं तस्य प्रतिबंधकत्वेन्वयः। तादृशेति वन्ह्यभावव्याप्यत्वस्यार्थः। इति घितो सद्धेता वि
तिन व्याप्तविरोधिपरामर्शस्य कालेपि धूमादौ तादृशधूमत्वादि सत्वान्न तादृशासाध्याभावादिसत्वाद्व्याप्तिव्याप्तिरिति भावः। व्याख्यायां।
संबंधकल्पनादिति विशेषदर्शिनापाश्चिन इति व्यवहाराभावादिति भावः। न च वाकल्पनात्तज्ञानस्य संबंधत्वाकल्पनात् सत्प्रतिप
क्षे पर्वतो वन्ह्यभाववान् हृदत्वादित्यत्र। अव्याप्तिरिति वन्ह्यभावव्याप्य हृदत्वस्य प्रतिबंधकतावच्छेदकसमवायेन धूमादावसत्वादिति भा

74 316

राम०

वः पर्वतो वह्न्यभाववान् प्रमत्वादित्यत्रोक्तरीत्यालक्ष्यतासत्वेनासंभवाभावाद्व्याप्तिरित्युक्तं स्वरूपसंबंधेन सत्वादित्तिस्वरूपसंबंधेनैव सर्वदा
सत्वादित्यर्थः। ज्ञानसंबंधेनासत्वादिति यावत्। पि अनुयापिन इति अत्र धूमादावपि केषांचिद्दोषैर्दृष्टिर्नो बाधित इति व्यवहारस्य सत्वाद्भ्र
धूममात्रायत अतिव्याप्तिर्दुरुद्धरा न च बाधित इति व्यवहर्तॄणां विशेषदर्शित्वमिति ताद्धसात्प्रतियाच्छिन्न इति व्यवहर्तॄणामपि तत्या
त्वस्य सुवचत्वात्। एतेन मिथ्यापर्यन्तानिमित्तकव्यवहारमात्रायैवल स्वरानिरकुल्लमिति मामाभोक्तमपमान्यमेव मिथ्यापर्यन्तानामेवा
भिमुखत्वं न तु हीधीति कारादीनामित्यस्य प्राप्यन्तिरीयत्वादित्यस्वरसः। बाधादीति अग्रेपि लौकिकस्यापणुरयमत्स क्षोदः यादाह उप
नीत पानेति। नारमिति। नारस्य स्पृष्टास्थि सस्नेहं सवासा जलमाविशेत्। अलमत्र पुरीषाग्निष्वनिगतं त्वस्पृश्यस्मृतमित्येवं रूपा अशुचित्वबो
धकागमस्यार्थः। व्याप्तिग्राहकत्वेनेति शारीरत्वं अशुचित्वबोधकत्वेनाज्ञातत्वप्राण्यङ्गत्वं अशुचित्वसहचारगतं हेतुजं अशुचित्वनिरूपितव्याप्तिग्रहात्त
तः अशुचित्वव्याप्यप्राण्यङ्गत्ववन्नरशिरः कपालमिति परामर्शस्ततः अशुचित्वानुमितिरिति क्रमेण अशुचित्वबोधकवेदस्य अनुमितेः ए
जीव्यतात ज्ञातीयसंबंधाद्रत्वेनागमस्यात्याचोपजीव्यजातीयागमत्वात् व्यभिचारत्वानाधिक्यमेव भवति अतोन तत्र व्याप्तिनिश्चया
नवानुमितिरित्याशयः। अलौकिकप्रत्यक्षं प्रति आनुमानिकबाधादीति निश्चयस्य प्रतिबंधकत्वादाह लौकिकप्रत्यक्षमिति। दूषितावच

317

टी०

न्यायासिद्धत्वादिति बाधादिबुद्धेः शाब्दधीविरोधित्वकल्पने गौरवेण लौकिकबाधादिबुद्धित्वस्य लौकिकयोग्यताज्ञाने शाब्दबोधोदयेन व्या
प्यताज्ञानस्य शाब्दधीहेतुत्वावश्यकत्वेन यादृशबाधादिनिश्चयकालेन शाब्दबोधस्तत्र योग्यताज्ञानविरहेणैव शाब्दबोधानुत्पादनिर्वाहा
दिति भावः॥ तदभावो न तत्र हेतुरिति। अ यद्वा बाधादिनिश्चयस्य शाब्दबोधाविरोधित्वे बाधादिनिश्चययोग्यताज्ञानयोरेकतरसत्त्वे प्रविरोधेन तदु
त्पाद्बोधापत्तिः एवं योग्यतासंशययोत्तरमपि बाधादिमति संभवतीति तदुत्तरं शाब्दबोधापत्तिर्दुर्वारेति चेन्न। अनयोरेकतरं वाच्यं विरुद्धार्थ
ग्राहकत्वादिति न्यायेन एकतरत्राप्रामाण्यग्रहनियमात् बाधादिनिश्चये योग्यताविशेषजन्योपनीतभानोदयाद्धि शेषपदमित्याशये
नाह व्याख्यायां। दोषविशेषेति। न त्वेनेत्यत्र नञ्छेदेनाव्यवहितपूर्वोपस्थितहेतुपरामर्शः संगच्छते तोऽप्राप्तेतद्भावनिश्चयाभाव
त्वादिनेति। न यायद उपनीतभाने बाधादिनिश्चयाभावस्य हेतुत्वे च न नियमः। नियमांगीकारसंभवः तथा वोक्तनियमांगीकारेपि न स
तिरित्याशयेनोक्तस्य पदस्याधिकत्वस्याप्युक्तस्य दुर्वारमित्याशयः। लक्षणापदस्य लक्षणावाक्यपरत्वे लक्षणापत्तेराहतत्वमिति वि
ति। इदं सव्यभिचारोपीत्यादिवाक्यं। ननु सामान्यधर्मज्ञानस्यैव तादृशजिज्ञासाजनकत्वेपि तदर्थं लक्षणाप्रसयायेक्षासिवेतिन
तल्लक्षणाप्रत्ययमित्यसंगतमत आह लक्षणानात्मकेति सव्यभिचारपदबोध्यत्वादिरूपेत्यर्थः प्रकारान्तरेणापत्तिलक्षणाप्रसयापेक्षा

318

राम०

विनैवात इति सामान्यलक्षणोक्तार्थः यदि गृहे विशेषलक्षणोपयि गृहेऽनुमानाधिकत्वयोर्विभागाद्दोषत्वमेवासिद्धमतस्त्राह हान्त्र
न्ययेमिन योर्विभागाद्दोषत्वइत्यर्थः। न्यूनाधिकत्वेनियमासंभवमिदृषो ध्यो उभयं साध्यतदभावोभयं त्र याद्दकोसुयमप्रत्नि त्राप
दकासिद्धत्वमित्यर्थः। साधारणधर्मवद्धर्मितानत्वेनैवेति। यथा संशयं प्रति साधारण्यविशिष्टधर्मवद्धर्मिज्ञानत्वेन हेतुता न थाको
द्युपस्थितिं प्रत्यपि हेतुत्वेत्यर्थः। इति मतावष्टंभेन इति निबंधकारमतानुसारेणाश्रयमादाय। यदि संशयं प्रत्येवोक्तरूपेण हेतुता न
तु कोटिद्वयोपस्थितिं प्रति। समानानुभवसाधारणीयथाकथं चित्कोटिद्वयोपस्थितिरेव संशयं जनयतीति मतानुसारेणोक्तलक्षणं तां न
दा कोटिद्वयोपस्थापकपक्षवैयर्थ्यरूपमाराधर्मितावच्छेदकानिध्याप्यर्थ मिणिराय इत्यावच्छिन्नवत्ताज्ञानं संशयजनकेन इत्यावच्छिन्नता
र्थके साध्यसंदेहजनकपक्षधर्मताज्ञानविषयत्वमिति मिलक्षणोऽभावात्। यदि च संशयं प्रति उक्तरूपेण हेतुत्वं कोटिद्वयोपस्थितिं प्रति
साधारण्यविशिष्टधर्मज्ञानत्वेनेति मतानुसारेणोक्तलक्षणांतदा पक्षधर्मताज्ञाननिवेशवैयर्थ्यम् इत्यावच्छिन्नताज्ञानत्वेन साध्यसंदेहज
नककोटिद्वयोपस्थितिं प्रति जनकत्वं इत्यावच्छिन्नत्वायार्थके साध्यसंदेहजनककोटिद्वयोपस्थितिजनकज्ञानविषयत्वेवरूपमाराध
र्मिण्यतिव्याप्तेरभावात्। न: कोटिद्वयोपस्थितिसंशयं च प्रति उक्तरूपेण हेतुत्वमिति निबंधकारमतानुसारेणोक्तलक्षणमिति। यथा

रा० 76

स्मृते कोटिद्वयोपस्थापकं संदिग्धादिव्याख्यानाभावे तल्लाभाय। कोटिद्वयोपस्थितेः संशयजनकत्वलाभाय। तल्लाभप्रयोजनं वा प्रयतत येनादि
शिष्टैनो संशयं यथा चैतत्साख्यानात्तल्लाभस्तथानुपदं व्यक्तीभविष्यति। कोटिमित्यन्वेन तद्व्याख्यानं विनैव शाब्दजं तेनाप्यपूर्वकस्याधानुनोपस्थि
तायामुपस्थितिक्रियायां जनकतानार्थस्याभेदेनान्वयमहिम्नैव कोटिद्वयोपस्थितेः संशयजनकतालाभसंभवेन तल्लाभायैतद्व्याख्यान
मनुचितं तद्व्याख्यानं तथात्वर्थस्य च क्रियाविशेषणान्वयः स्वमध्यास्तोके यावद्द्वि प्रयोगापत्तेरिति वाच्यं। संचारोरति मंदिरावधी साहि प्रयो
गदर्शनेन स्तोकं पाकद्वि प्रयोगस्यापि तत्त्वात्तन्मतेन वापि क्रियाविशेषणेन समासाभावात्स्तोकं रौति साध्वीति वाच्यं। स्तोकं न प्रासत्वात्पंचमि
तिप्रयोगदर्शनेन तादृशसमासोपपत्तिरिति [illegible] सामर्थ्यात् क्रियाविशेषणेन समासस्यापराभासंभवात् नवेद मुक्तप्रयोगस्य का गतिरिति
वाच्यं अत्र स्तोके स स्पृतमिति दृष्टेर्नविशेषणलाभस्सविशेषणेत्यादिना [illegible] लाभेन विशेषस्तोकत्ववाधेन तन्मते स्तोकत्वपर्यवसानात्। प्रकृते नैव
विशेष्यो साध्यसंदेहजनकत्ववाधाभावेनोक्तन्यायाविषयतया कोटिद्वयोपस्थितेः संशयजनकत्वस्य लाभासंभवात्। एतेनोक्तास्वरसादेव
साध्यसंदेहेत्याद्यग्रिमग्रंथावतारणाकेषांचित्पराश्तंतस्यैवासंभवात्तत्प्रागिमव्याख्यानेपि द्वयलब्धापत्तितासखीत्प्राध्वन्त्स्याद्वावाच्छाद
नेवासंप्रयोज्यत्वलाभमप्यूह्नेऽस्पष्टदूषणविधेयभावमहिम्ना साध्यसंदेहजनकत्वे कोटिद्वयोपस्थितिप्रयोज्यत्वलाभेन स्पष्टद्वारकत्वाद्

३५० रा०

321

स्यासंभवेन तत्पर्यवसानादिति भावः। साध्यासंदेहजनकेत्यादि। तद्द्वारकतत्फलजनकत्वस्य तत्फलजनकतज्ज्ञानकत्वे पर्यवसानादिति भावः।
लाभेऽद्देश्यविधेयभावमद्दिष्टोद्देश्यविधेयपदार्थमात्रमेव लाभे। द्वारत्वघटकेस्येति। द्वारत्वस्य फलजनकत्वस्य घटितत्वादिति भावः। वैयर्थ्य
मिति। उक्तरीत्यैव विवक्षितार्थलाभे तन्निवेशे प्रयोजनाभावादिति भावः। द्वारत्वाघटकस्येति पाठे लाभः। तस्य द्वारत्वघटकतया लाभः इत्य
र्थः। तज्ज्ञाने सति तज्जन्यफलजनकत्वं समकद्वारत्वलाभे द्वारि व्यापितत्फलजनकतद्द्वारजनकत्वस्य लाभादिति भावः। साध्यसंदेहज
नकत्वस्येति। साध्यसंदेहजनकपदार्थस्यानुपात्तस्येत्यर्थः। वैयर्थ्यमिति। द्वारत्वलाभादेव विवक्षितार्थलाभादिति भावः। संबंधिदर्शनविधे
यत्तिरस्कसंबंधिज्ञानस्यापरसंबंधिस्मारकत्वादिति भावः। संबंधान्तरेणापि संयोगादिनापि। द्व्यणुकादिवारणाय। वक्ष्यमाणद्व्यणुकाद्य
तिप्रसंगवारणाय प्रत्यादिनास्याप्यविरुद्धयोः साधारण्यमममाहाय वक्ष्यमाणातिप्रसंगपरिग्रहः। नाह्येति साध्यसंदेहजनकपर्थः। इदं वन
नकांतोपादानेपि राजनतिवक्ष्या या अभावरूपकत्वमिति सव्वनायकोद्युपस्थितिजनकत्वमेवात्र विवक्षितं जनकांतस्यानुपादानादिति भा
यं। संबंधितावच्छेदकप्रकारकज्ञानत्वेनैवेति। न चैवमपि निःपत्वनिस्यत्वाभावविषयकत्वविशिष्टज्ञानवत्त्वज्ञानस्यैव तेन रूपेणात्र जनक
त्वादिति व्याप्तिरेवेति वाच्यं। ज्ञानादावतिव्याप्तिवारणाय यद्वि। शिष्टवज्ज्ञानत्वेन जनकतापाविवक्षणीयतया संबंधितावच्छेदकप्रकार

टी०

77

कत्वानत्वेनजनकत्वेपितेनरूपेणाजनकत्वात्प्राप्तिव्याप्तिविरहात्व्याप्यात्‌ अतएवसंबंधितावच्छेदकप्रकारकज्ञानत्वेनैवेत्येवकारेणानेनरूपे
णाकस्यापित्वव्यवच्छेदः अग्रेवक्तेनरूपेणाजनकत्वविवक्षणादितिवसंगच्छते तादृशोतिनियतत्वनिरूपित्वाभावविषयकेत्यर्थः अतिव्याप्तिरितिन
चात्मवृत्तितादृशज्ञानत्वप्रकारकज्ञानत्वेनजनकत्वेपितादृशज्ञानवत्त्वात्तानत्वेनाजनकतयाकथमतिव्याप्तिरितिवाच्यं आधेयत्वाधारत्वयोरनु
त्यविनिवेशतयात्मवृत्तितादृशज्ञानत्वस्यैवतादृशज्ञानवत्त्वात्तानात्मकत्वात्। अतिव्याप्तिस्थलसंकोचमसहिष्णुराह वस्तुतस्त्विति। साधारण
धर्मवद्धर्मितानत्वादिनेति आदिनाअसाधारणधर्मवद्धर्मितानत्वादिपरिग्रहः साध्यसंदेहजनकेति साध्यसंदेहजनकतावच्छेदकोयः
कोटिद्वयोपस्थितिनिरोधधर्मः अव्यवहितोत्तरत्वादिसंबंधेनसाधारणधर्मवद्धर्मिज्ञानविशिष्टकोटिद्वयोपस्थितित्वादिरूपस्तदवच्छिन्नम
त्येवेत्यर्थः। एतेनयथाकथंचित्कोटिद्वयोपस्थितौव्यभिचारेणकोटिद्वयोपस्थितित्वमपिवासाधारणधर्मदर्शनादिजन्यायांतत्रव्यभिचारेणसाध्यसं
देहजनककोटिद्वयोपस्थितित्वमपिनजन्यतावच्छेदकमितितदवच्छिन्नत्वमेवेतिकथमुक्तमितिशंकानवकाशः तेनरूपेणाजनकत्वेनिसाधारण
धर्मवद्धर्मिज्ञानत्वादिनाजनकतेत्यर्थः पक्षतिप्रसिद्धप्रमाज्ञानत्वेनजनकतेतियावत्। लक्षणेप्रत्येकरूपेणाजनकत्वनिवेशेव्यावृत्त्यंतरमाह अत
एवसाध्यसंदेहजनकतावच्छेदकत्वेनजन्यतावच्छेदकानुगमः कृतः असंभवएवस्यादिति। अयमाशयः तेनरूपेणाजनकत्वस्यतादृशोपस्थिति

322

रा०म०

निरुद्धधर्मावच्छिन्नजन्यतानिरूपकजनकतात्मकस्य जनकांतस्यागेनादृष्टजनकतावच्छेदकत्वेन जन्यतावच्छेदकानुगमासंबंधेनाविवक्षितत्वात्सं
भवेन कोटिद्वयोपस्थितित्वावच्छिन्नजन्यतानिरूपकं जनकतात्मकं तेन रूपेणाजनकत्वविवक्षणीयं तथा चासंभवः कोटिद्वयोपस्थितित्व
स्य जन्यतानवच्छेदकत्वेन तस्य तदनात्मकतया तदप्रसिद्धेरिति इदं चेति एवकारेणाजन्यत्वजनकत्वयोरवच्छेदकनिवेशव्यवच्छेदः। इयं आ
ग्रयेत्याद्दिनोक्तन्तयोपस्थितेरिति अत्र तत्कोटिद्वयोपस्थितित्वस्य साध्यसंदेहजनकतानवच्छेदकत्वादित्यर्थः यथाश्रुते साधारणधर्मवद्धर्मि
ज्ञानात्मकसमव्यालंबनसंबंधिज्ञानजन्यतत्कोटिद्वयोपस्थितेः साध्यसंदेहजनकत्वेनासंगत्यापत्तेरिति ध्येयं आत्मत्वप्रत्यक्षज्ञानस्येति कोटिद्वयोपस्थिति
द्वारेति शेषः तादृशज्ञानजन्यकोटिद्वयोपस्थितेः साधारणधर्मवद्धर्मिदर्शनजन्यत्वादित्यभिमानः। अतिव्याप्तिः उक्तातिव्याप्तिः। मेनसंबंधेनेति
सव्यभिचारता घटकसंबंधेन साधारणधर्मवद्धर्मिज्ञानस्यैव संशयहेतुत्वादिति आशयः नातिप्रसंग इति तादृशज्ञानस्य साधारणधर्मवद्धर्मि
दर्शनात्मकतया तज्जन्योपस्थितेः संशयाजनकत्वादिति भावः। ननु साधारणधर्मवद्धर्मिज्ञानहेतुतायां धर्मितावच्छेदकाप्रवेशात्कथं
तत्रातिप्रसंगः न च धर्मितावच्छेदकप्रकारकधर्मिज्ञानस्यापि संशयहेतुतया तमादायैव तत्रातिप्रसंग इति वाच्यं। संशयनिष्ठयसा
धारणविशिष्टवैशिष्ट्यमिति बोधकमविशेष्यतावच्छेदकप्रकारकनिर्णयहेतुतयैवोपपत्तौ तस्यामानाभावात् न च तादृश्यैव तत्राति

घ्रा० 78 324

प्रसंग इति वा यो संशयत्वघटितधर्मावच्छिन्नजन्यतानिरूपितजनकतानिवेशेनापि तदिति प्रसंगवारणासंभवान्न आह स्यात्तु तादृशेति इ
निश्चात्मरूपेति एवकारेणाभावांशे साधारणत्वव्युदासः अपमितिज्ञानहेतुत्वमवच्छेदः तथाचान्वयव्यतिरेकाभ्यां साधारणधर्मवद्धर्मिज्ञानहेतुता
यामेव धर्मितावच्छेदकप्रवेशस्यावश्यकत्वतया तामादायैव नत्राति प्रसंगः सुघट इति भावः। इदमुपलक्षणं वक्ष्यमाणरीत्या त्रिविधसंशयस्य
वारणेन इदंत्वावच्छिन्नधर्मिकसंशयं प्रति इदंत्वप्रकारकज्ञानत्वेन हेतुतया तामादायाव्याप्त्यतिप्रसंगः सुघट इति द्रष्टव्यं विवक्षणीयमिति के
वलप्रकारधर्मताज्ञानविषयस्य स्यादिति प्रसक्तेन तयात ज्ञानविशेष्यतात यास्वातन्त्र्येण विवक्षणीयं संशयजनकत्वमादायेत्यर्थः प्रकारधर्मता
ज्ञान इत्यादिकोटिद्वयोपस्थितावेव संशयजनकत्वप्रवेशादिति भावः। प्रसंगस्यापत्तेरिति उपस्थापकोन्मार्गेण नकोऽनस्यापि मार्गेण नता इत्या
धर्मिताज्ञानात्मकप्रकारधर्मताज्ञानस्य संशयजनकत्वोपपादनस्यासंगतेरिति भावः। न चोपस्थापकोतोपादानेऽपि तत्राति प्रसंग एवेति वाच्यं।
रि तदुपादाने उपस्थितिस्याधर्मितापदूपावच्छिन्नवत्ताज्ञानत्वेन संशयजनकतावच्छेदककोटिद्वयोपस्थितिनिष्ठधर्मावच्छिन्नजन्यतानिरूपताय
कैतावच्छिन्नजनकताघटितत्वस्य लाभात्प्राति प्रसंग इति वाच्यं परस्परव्यभिचारेण संशयत्वावच्छिन्ने साधारणधर्मवद्धर्मिज्ञानत्वा
दिना हेतुत्वात्। अत्रेदमवधेयम् जनकोपस्थापकोपस्थापकं प्रकारधर्मतायद्धर्मेति त्रिनयमपि निरुक्तजनकताघटितलक्षणलाभायैव न राम

रजनकतानतद्रूपावच्छिन्नत्वस्यलाभेनतत्रातिप्रसंगाविरहात्।नचतद्रूपहानेपितेनरूपेणासंशयप्रत्ययविनातद्लाभात्तल्लाभं
विनाप्रत्येकंतत्प्रावर्ण्यस्याव्यावर्त्तनात्।एवंचद्विविधितौप्रत्येकंतत्त्वाघटितस्यलक्षितरस्यतद्रूपोपलक्षकंएवंसाधारणधर्म्यतत्त्रोपाच्चस्यास्य
लत्वंयस्यतद्धारणायेतिनिरुक्तजनकताघटितलक्षणलाभात्साधारणापरमितिविशेषदर्शनादिरूपमिममर्थंप्रत्यस्वारस्यादाहत्याप्यत्वानिश्च
येति।नन्वसाधारणधर्मवद्धर्मिज्ञानस्यैवसंशयजनकतायोग्यत्वात्कथंतदुत्तीर्णतादृशायांतन्निष्ठनिरवेत्यतआहद्वयंत्वेति।तद्वत्त्वादि
तियद्विशेषयोरितिमायानान्तानाद्रूपासंशयत्वावच्छिन्नस्याव।स्मिकत्वापत्तेरितिभावः।तद्रूपावच्छिन्नवत्त्वेतिसाधारणधर्मावच्छिन्नहेतुमत्त्वेसपि।
धर्म्यन्तरस्यपरिग्रहइतिभ्रमस्यापत्त्याव्याप्तिनिश्चयेपिधर्म्यन्तरविशेषस्यसंशयपौपधायकत्वानयायाहसंगतेरितिभावः।अथयेवता
दृशजनकत्वासंभवएवानुस्वमनेनहसंभवेपियन्मतेतत्संभवस्तन्मतेनानुसरणीयमतआहअन्ययेतिमतान्तरानुसरणाद्स्यार्थःसंशया
कतयेतिश्रमस्याःसाधारणाव्याप्यतेरितिभावः।सत्प्रतिपक्षोत्थापकतयेतिअसाधारणस्येत्यनुषज्यते।सत्प्रतिपक्षितभविष्य
वेतिपक्षगतानंतुहेतुसंभेदकृतसत्प्रतिपक्षांतरवैलक्षण्यसत्त्वनायेदेत्याशयः।गगनादिस्याद्दृष्टावितिअत्रलक्ष्यत्वसंपादनयेऽवलिदि
त्वनुधावनेअत्रलक्ष्यत्वंचैतद्वादिमतेःसाधारणस्यसत्प्रतिपक्षोत्थापकत्वेनसत्प्रतिपक्षस्यचसाध्याभावव्याप्यवत्त्वस्वरूपत्वादितिभावःत

325

रा०

त्पदेति कोटिद्वयोपस्थापकपदेत्यर्थः । अतिप्रसंगेति निरवयवमतांतरानुसरणोपि निस्तारः स्वमते चानस्य सम्यक्तिपक्षांतर्भावाभावेना
साधारणत्वेन तत्र शब्दत्वादाविति प्रसंग इति भावः । तदानीमनित्यत्वसाधनादशायां साधारणस्य तद्घटकसाध्याभावसहचरितत्वस्य तद्
हेति साधारण्यघटकसाध्याभावसहचरितत्वस्य निश्चयात्मकत्वहेत्यर्थः ॥ ननु पक्षधर्मतायदेशोपादानेपि तत्रातिप्रसंग एवेत्यत आ
ह ध्येयमिति उक्ततमेन तत्रातिसाधारणेतीति अत्रावयेति तस्यानुकावकारयथेत्यर्थः स्यादतः साध्यस्य एवं निर्देशः असिद्धिपरिग्र
ह इति एतयोर्वतारेण घटेयसत्वस्य संशयजनकासाधारणशब्दत्वव्युत्पत्तिज्ञानस्य च निरास इति भावः । दीधितौ तावदसाधारण्यापत्तिरिती
असाधारण्यपदाद्यसव्यभिचारत्वापत्तिरित्यर्थः । यद्वा सव्यभिचारत्वेनाक्रांतत्वे साधारण्यानुपसंहारित्वयोरसंभवेन यदि शे
षादसाधारण्यापत्तिरित्यर्थः । व्याख्यायामव्याप्तिः हृदो धूमवान् वह्नेरित्यादौ वह्न्यादिरूपसाधारणाव्याप्तिः । तत्कालांतरीयपक्षत्व
विशिष्टहृदधर्मताज्ञानमादाय स्वरूपयोग्यत्वस्य इदानीमपि सत्वात् व्याप्तिरिति वाच्यं । तथापि यत्र कदापि न पक्षताप्रत्यन्तहेतौ तद्धर्म
ताज्ञानं वा न कदापि तत्र साधारणाव्याप्तेर्दुर्वारत्वात् । न तत्र स्वरूपयोग्यताया अप्यसंभवात् मन्मते तु प्रकृतपक्षस्य पक्षत्वविवक्षणा
त्तु मिमम मन्मते तु अतिप्रसंगवारणाय धर्मेतरत्वादिनिवेशे तद्वैयर्थ्यापि यत्साधारणधर्मवत्ताज्ञानं कुत्रापि यद्) बाधकाले पक्षताभंगेपि न क्षतिः पक्षत्व रा४०

स्यैवाविवक्षणादिति भावः। ननु स्वरूपासम्बन्धपदेन तेनैव सम्बन्धेन यत्साधारणधर्मवत्ताज्ञाने कुत्रापि धर्मिणि संशयो न जातस्तत्राव्याप्तिर
त एवेति वाच्यं तादृशोपमानाभावात्। ननु प्रकृतलक्षणे संशयजनकत्वस्योपस्थितिविषयतया प्रागुक्तत्वेन पक्षधर्मताज्ञानेऽसंशया
यजनकत्वं निवेश्य धर्मिणीत्यादि निष्कर्षः। संयत इत्यत आह सन्देहजनकमिति। निष्कृष्य-रूपस्थितिविशेषणतया परित्यागेन प
क्षधर्मताज्ञानविशेषणतामनुपेत्य टीकायां धर्मिणीत्यादिकं च व्यमारोपितम्। अस्वरसान्तरपि। तल्लक्षणे तानि प्रागुक्तोपस्थितिजनकत्वघटि
तलक्षणे तत्पर्यः विरोधादिति इदानीमेवोपस्थितिजनकत्वपरित्यागादिति भावः। तादृशावच्छिन्नत्वेति तादृशावच्छेदककोटिप्रविष्टधर्मी
यवृत्तित्वे तत्पर्यः यद्यपि साध्यसहचरितत्वमात्रमापि न प्रसंगवारणायैवावच्छेदकतापर्याप्तिविवक्षणोऽवश्यमुचितं तथापि पक्षदूषणाव
च्छिन्नवत्ताज्ञानत्वेन जनकत्वोक्तावपि तथाविवक्षणाभावस्य कमित्याशयेनेदं टीकायां धिताबुकत्वादिति। अन्ये चापदर्शितरीत्या जनकतां
नादिपक्षतत्त्वैव्याहत्ये येन तद्विवक्षणस्यावश्यकतया कथं तत्सोक्ता अतिप्रसंगवारणाय कृत्वमिति चेन्न प्रयोजनान्तरानुरोधेनावश्यकस्या
पि फलान्तरसत्त्वे बाधकाभावात्। अत एव गौरवमुक्तवादिति। ननु वाच्यत्वादिति न यथैव तद्विवक्षणस्य फलान्तरानुरोधेनावश्यकस्ये
क्तातिप्रसंगवारकत्वमपि न स्यात् तदनुरोधेनैव तद्विवक्षणमिति तात्पर्यात्। एतेनासाधारण्यादिमात्राया संभवापत्त्या पक्षदूषणावच्छेदकत्व

327

दी०

80

ज्ञाताज्ञातत्वेनेत्यादिविवक्षायाञ्च सम्भवेन वह्निसहचरितत्वमादायातिप्रसंगवारणस्यावश्यकतया पर्याप्तिविवक्षाप्रयोजनकत्वेऽपि तज्ज
शिखायाख्यायोपपद्यत्यादिनोक्तदोषवारणेति सर्वसमंजसं व्याख्यानमाख्यायो। पक्षधर्मतापदस्येति प्रकृतपक्षधर्मतापरत्वपदस्येत्यर्थः। विष
यतायाइतिविषयतावच्छेदकत्वस्यापि वोध्यं। नहुरित साध्यस्येत्यर्थः। नन्वत्र धर्मीतितत्तज्ज्ञानत्वेनेत्यर्थः। अननुगमादितितत्तद्घटितानन्तव्यभिचार्य
वेतिभावः। प्रसंगादितिसाध्याभावस्याप्रामाण्यमावाघटकत्वादितिभावः। दीधितौ कोट्युपस्थितिरूपस्येति न हि कोट्युपस्थितिः स्मृतित्वेनज्ञ
निकाकोटिस्मृतित्वेन जनकत्वे गौरवमित्याशयः इति मिश्रा अभिधानादितिभावः। पक्षधर्मतापदस्य प्रकृतपक्षधर्मतापरत्वे स्फुरयति माख्याया
सविषयकमितीत्यादिना। उभयत्रैवाप्रमाप्रमयोरपि। साधारणोति प्रामाण्याप्रामाण्यसहचरितेत्यर्थः। तद्विषयीभूतेति सविषयकत्वा
नुमितिविषयीभूतेत्यर्थः। ज्ञानेषयादितानो। तत्रेति यत्किंचिद्रूपितत्वेति शेषः। ताद्दृशेति सविषयकत्वरूपसाध्यसंदेहजनकेत्यर्थः। तदनुमि
तीतिसविषयकत्वानुमितावित्यर्थः। ताद्दृशेति प्रामाण्याप्रामाण्यसहचरितेत्यर्थः। अतत्याख्यानात् ताद्दृशोपस्थित्युपजनकत्वात् अयमाशयः
तद्दृश्यानिश्चयोत्तरं तद्दृश्यसंशये तद्दृश्यनिश्चयधर्मिकतद्दृश्यघटितप्रामाण्यसंशयहेतुतायाः प्राचांसम्मततया सविषयकत्वानुमिता
त्मकनिश्चयोत्तरसविषयकत्वसंदेहे ताद्दृशानुमितिधर्मिकसविषयकत्वघटितप्रामाण्यसंशयस्य हेतुतया ताद्दृशानुमितिर्हि नि

329

राम०

यानाद्यज्ञानत्वज्ञानस्यैव तथात्वं ननु घटज्ञानमादाय पक्षवृत्तय प्रवृत्तिनयानाद्यज्ञानत्वज्ञानस्य तस्य घटादिनिष्ठप्रकारोऽयं घटादिसंश
ये घटादिनिष्ठप्रयधर्मिकघटत्वादिघटितप्रामाण्यसंशयस्य हेतुतया घटसंदेहजनकत्वोपपत्तितिजनकत्वादिति । ननु तत्रापि प्रसंग इति ।
ननु घटादिज्ञानं सविषयकं ज्ञानत्वादित्यत्रैककोटिस्पर्शितिप्रसंगवारणायापि सविषयकज्ञानत्वं न सविषयकं ज्ञानत्वादित्यत्र सविषयकत्वतान
त्वयप्रकृतपक्षवृत्तिनयानाद्यज्ञानत्वज्ञानस्य प्रामाण्यसंशयद्वाराविषयसंशयजनकत्वेन तथात्वादिति प्रसंगो दुर्वार इति चेन्नापक्ष
धर्मितावच्छेदकाज्ञानस्य समानविशेष्यकत्वप्रत्यासत्त्यनवच्छिन्नमात्रोपरितिजनकमात्राविवक्षणीतात्पर्यमिति नाद्यज्ञानत्वज्ञाननिश्चयाः
प्रामाण्यसंशयात्मककोटिद्वयोपरितिजनकमात्राप्रत्येतदवच्छिन्नत्वेनाविवक्षितत्वात् वस्तुतस्तु पक्षधर्मतावच्छेदकाज्ञानमहिम्नापि पक्षधर्मताज्ञाननि
श्चयोपस्थितिनिष्ठासमानविशेष्यकत्वेन साध्यसंशयजनकत्वे लभ्यते प्रकृतपक्षवृत्तिनानैयत्वेनवातल्लभ्यनेनाद्यज्ञानत्वज्ञानस्य पक्षधर्मता
ज्ञाननिश्चयप्रामाण्यसंशयद्वाराविषयसंशयजनकत्वं वनताद्यप्रकृते सविषयकत्वज्ञानविशेष्यकस्यताद्यज्ञानत्वज्ञानस्य सविषय
कत्वसंदेहसमानविशेष्यकत्वेपि सविषयकत्वज्ञानस्य पक्षवृत्तिताविषयकत्वेपि पर्वतो धूमवान्वह्नेरित्याद्यज्ञानविशेष्यकस्यताद्यज्ञ
ज्ञानत्वज्ञानस्य पर्वतो धूमवान्नवेति साध्यसंशयासमानविशेष्यकत्वात् एतस्य प्रकृतपक्षवृत्तित्वाविषयकत्वाच्च साधारणधर्मद्धि

टी०

८।

नादृशज्ञानस्य कोट्युपस्थितिद्वारा संशयजनकत्वं च तादृशमिति लक्षणसमन्वयः । एतेन ज्ञानपक्षकानुमितिप्रामाण्यसंशयजनकज्ञानत्व
ज्ञानस्य न तथात्वेन जनकत्वमन्यगतस्याप्रमात्वस्यापि विषयसंपादकत्वादिति मिश्रमपक्षिकापि व्याख्यातेति ध्येयं । मतभेदेनेति साधारणा
दिधर्मवत्ताज्ञानं संशयहेतुः यथा कर्पूरविल्वकोट्युपस्थितिस्तु विशेषणज्ञानतया प्रयुज्यते । एकं मते साधारणादिधर्मवत्ताज्ञानमजन्यकोट्यु
पस्थितित्वेनैव संशयहेतुतेति द्वितीयं कोट्युपस्थितिगर्भलक्षणोपयोगिमतमिति भावः । ननु साधारणधर्मवत्तादर्शनविधया जनकत्व
मादायैव लक्षणस्यैतज्ञानत्वेऽतिप्रसंगः कथं वारणीय इत्यत आह । उभयमतेपीति । कदाचिदिति साधारणधर्मवत्तादर्शनदशायामित्यर्थः
प्रतिबंधकताय साधारणेति । अप्रामाण्यज्ञानविरहविशिष्टविरोधिनिश्चयाभावस्य विशिष्याभावसंपादनद्वारा विशिष्टविरोधिनिश्चय
स्य प्रतिबंधकताविघटने तात्पर्यं । ननु तथापि विशेषणज्ञानमुद्रया प्रामाण्यसंशयात्मककोट्युपस्थितेस्तादृशसंशयहेतुतया कथमु
क्तातिव्याप्तिवारणमुभयमतेपीति चेन्न तादृशसंशयजनकतावच्छेदककोटिद्वयोपस्थितित्वनिष्ठधर्मावच्छिन्नजन्यतानिरूपितजनकतावच्छे
दकीभूता या किंचिद्धर्मावच्छिन्नविषयतानिरूपितविषयता तदवच्छेदकं प्रकृतत्वस्योक्तरीत्या विवक्षणे नातिप्रसंगात् । अत्र मिश्रानुमानिनोऽभि
यिलाः अन्वयव्यतिरेकाभ्यामप्रामाण्यसंशयस्यापि स्वातंत्र्येण विषयसंशयहेतुत्वं तु अपरे । अप्रामाण्यसंशयानुविधानं नियमादि

३३०

रामः

द्रोधिनिकारोऽंशत्वसहैव यत्र विरोधिनिश्चयेऽप्रामाण्यनिश्चयस्तत्रापि विषयसंशयप्रसंगात् ।। न विषयत्वादिसाधारणधर्मव
त्त्वज्ञानमात्रस्य स्वरूपयोग्यकारणान्तरवत्त्वात् । अप्रामाण्यनिश्चयस्य तदितरकोटिस्पर्शिहेतुविरोधित्वाभ्युपगमे मानाभावात् । न चाप्रामा
ण्यसंशयस्य स्थाने अप्रेरणेन कल्पितानविषयत्वादिसाधारणधर्मवज्ज्ञानादिस्वरूपयोग्यकारणमेव रवण्डेन तदपि संशया
दुर्वार इति वाच्यं । विरोधिनिश्चयानुत्तरसंशयप्रमेयविरोधिनिश्चयाभावस्य साधारणादिधर्मवज्ज्ञानस्य च कारणत्वाभ्युपगमेन वि
रोधिनिश्चयोत्तरसंशये त्वप्रामाण्यसंशयस्य तादृश्येरणेन कल्पनास्वीकारेण च क्षतस्याभावात् । अत एव समानानेकधर्मोपपत्तेर्विप्रति
पत्तेश्चोपलब्ध्यनुपलब्ध्यव्यवस्थातश्चेति सूत्रावयवभागः समानधर्मोपपत्तेः साधारणधर्मवज्ज्ञानमनेकधर्मोपपत्तेरसमानप्रवि
प्रत्यक्षरूपावर्तमानस्य धर्मस्य ज्ञानं विप्रतिपत्तेरुपलब्धेर्भावकोटिनिश्चयस्यानुपलब्धेरभावकोटिनिश्चयस्याव्यवस्थायाः प्रामाण्य
शंकेति संशयकारणपंचकमहर्षिरिति प्राचामाशिकव्याख्यानमपास्तं इति । अत्रोच्यते एतद्दोषभयेनैव हि विधितिरूतानातिप्रसंगवाकापीत्तु
र्कं तत्पात्र शंकायोग्यनेन भवत्व प्रामाण्यशंकास्थाने अप्रेरणाविषयसंशयजनिकानयापि न क्षतिः ।। न हि तत्र साधारणधर्मवज्ज्ञा
नजन्यत्वादिकमपि तत्र प्रविष्टं प्रयोजनाभावात् विप्रतिपत्त्यादिजनितप्राप्यप्रामाण्यशंकया विषयसंशयोत्पादात् । एवं च धर्मिणि

331

टी०

82

यद्रूपावच्छिन्नत्वज्ञाताज्ञातत्वेन तादृशोपस्थितिजनकत्वं तद्रूपावच्छिन्नत्वमिति प्रागुक्तनिष्कृष्टलक्षणेऽतिप्रसंगाभावात् यस्य धर्मितापरस्य
न यत्तु तत्र यस्य धर्मितापरत्वं मिश्रोक्तं युक्तमिति सूचितं। साधारणेत्यादिग्रंथमतेनानराभिप्रायेणानुक्त एव वाक्ये रथ्यक्तत्वादित्युक्तमिति हि कदी
धितौ हेतुत्वपक्ष इति कोऽयुपस्थितिः। दूरेत्यादिव्याख्यायां साधारण एव साधारणधर्मदर्शनहेतुतायामेवान्तर्भावात् व्याप्यसंशय
हेतुतायामन्तर्भावात्। मयापि चैतत्तत्पर्यायाधिकारे एवोक्तं। व्याप्याभावत्वाभावादेवेति व्याप्यतदभावप्रकारकज्ञानत्वेन प्रकारतायाएवत्र
व्यप्रकारतातापदर्शनत्वादिति भावः। धर्मितावच्छेदकविशिष्टइति। अन्वयधर्मितावच्छेदकपदं साधारण्यादेर्यद्धर्मितावच्छेदकं तत्परं। तद्ज्ञाता
नमिति पाठः। तत्पदं साधारण्यादिपरं। क्वचित् तद्रूपविशिष्टस्य ज्ञाताज्ञातमिति पाठस्तत्र प्रयोजकः। क्वचित् तद्रूपज्ञाताज्ञातमिति पाठः। कोटिद्वयोपस्थि
तिद्वारेति शेषः। एवमग्रेऽपि साध्याभावसहचरितत्वमिति नवविशिष्टसाधारण्येव तत्पर्यालोचनं यमेनदिति वाच्यं। अन्येषु सहचर्यावच्छिन्नप्र
कारकज्ञानत्वेनैव साधारणधर्मदर्शनस्य हेतुत्वं। अस्मत्पक्षे व्याप्यतदभावयोः प्रत्येकमुभयकोटिसाहचर्याभावेन व्याप्यसंशयस्य साधारणधर्म
दर्शनान्तर्भावानुपपत्तेरित्यपास्तं। तदभावादेव साध्याभावसाहचर्याभावादेवाप्यर्थकोऽनुव्याप्यवत्तासंशयस्य पृथक्कारणत्वेनैवाप्रिरेवेति ए
वकारेण व्याप्याभाववत्त्वव्यवच्छेदः। व्याप्यसंशयस्य व्याप्याभाववत्त्वांशे निर्धर्मितावच्छेदकतया धर्मितावच्छेदकविशिष्टतद्ज्ञाताज्ञातत्वं साध्यसंशय

332

राम०

जनकत्वादिति भावः। वस्तुतस्तु। तथापीत्यादिकं साधारणधर्मवत्ताज्ञानस्य संबंधितावच्छेदकप्रकारकज्ञानविधयोपस्थितिजनकत्वमत
मात्वेऽप्यभ्रमप्रयाति प्रसंगवारणाय जनकतावच्छेदकविवक्षणात्स्यादवच्छेदकतया यद्रूपवत्तज्ज्ञानत्वेन जनकताविवक्षणे तोः संभवः स्यादेवं
वत्तत्त्वकोद्बुद्धुपस्थितिं प्रति तन्न संबंधितावच्छेदकप्रकारकज्ञानस्यैव हेतुतया प्रत्येकसाहचर्यविज्ञानत्वेन हेतुतया साध्याभावसहच
रितत्वेन तयोरुक्तं। न चोक्तं। प्रत्यगीत्युक्तं। येऽत्विति द्वयंद्वयं नमेकं मतं। दंडचक्रादिवदिति परस्परसहकारित्वमिति दोषः॥ अत्र समुद्रयान
स्यापकसंशयापत्तिरेवास्वरसः॥ ननु साधारण्यानभावविधिर्मितावच्छेदकवत्ता साध्यसहचरितत्वमपि तथैतित साहैयैव व्याप्तेति व्या
प्तिसंभव इति प्रत्यगीत्युक्तमेवानवयपद्रूपं तथा तदवच्छिन्नत्वस्या वाच्यत्वात् द्वैष इति वाच्यं साधारणो पद्रूपं न गतासाधारण्या
भावेन तद्वैलक्षण्यासंभवात्। न च यत्किंचित्संदेहजनकत्वमिति वाच्यत्वे दोष इति वाच्यं यत्किंचित्त्वस्य दुर्वचत्वात् किंचित्संबंधितावच्छेदकप्र
कारकज्ञानविधया जनकतामतमात्वेऽव्यवस्थापत्या संदर्भविरोधः रहरौ साधारणधर्मवत्ताज्ञानस्य संशयापत्त्योरेकरूपेणाजनकताम
संधेयेनत्त्वलक्षणाप्रणयनेन भिन्नरूपेणाजनकतामालंब्यसिद्धांतप्रणयनादत आह वस्तुतस्त्वित्यादिरित्युत्ताविति पार्थक्यमिति शेषः॥
उभयावच्छिन्नवत्तेति धर्मिणकत्वस्याविवक्षणेन व्याप्यतरभावयोः प्रत्येकमुभयाभावेपि प्रत्येकं प्रत्येकसत्वादिव साधारण्यं तं भवित्त

टी.

८३

83

मवादित्याशयः। न च यासाध्यसंदेहजनकतावच्छेदकं संशयप्रसंगादिति। तथा च साधारण्यांतर्भावेनोक्तरीत्या न तिव्याप्तिसंभव इति भावः॥

यत्तु धर्मितावच्छेदकत्वापि व स्वरूपोपि तु यथावच्छिन्नत्वमेकत्रैव निवेश्यं तेषां विशेष्यविशेष्यविशेषणभावे विनिगमनाविरहात् पि तु प्रत्येकं साधारणाधि

करण्यावच्छिन्नत्वं प्रत्येकं निवेश्य कारणताद्वयमेव कल्प्यते धूमसहचरितवह्निमत्त्वाज्ञानधूमाभावसहचरितवह्निमत्त्वाज्ञानयोः परस्परस

त्वेऽपीति भावः उक्तबाधस्यापि उक्तबाधादिरपि तत्र घट आकाशवानित्याद्यनुमितौ प्रतिबंधकत्वमिति अनुभवबलादित्याहि तत्रैव समानधर्मिता
वच्छेदकत्वं तत्रेति भावः मान्यास्तु पूर्वेनुकारोऽप्येवाकारप्रमात्मस्यायोज्ञबाधादेस्सार्वत्वानवच्छिन्नविशेष्यताकाकाशानुमितिविरोधित्वे
मानाभावात् उक्तबाधादितानकालेऽहं सर्वत्ववाहित्वाद्यवच्छेदेन धर्मिद्धर्मिनाहेवे ह मानाकाशवदिसाद्यनुमितिप्रतिबंधोपपत्तेः तथाचविरोध्यल्लाभा रामः

376

वादिवेषोक्तबाधादिवारणमित्याहुः परे त्वित्यादि अत्रोपलक्षणत्वपसंकोचेनोयपक्षोसंकोचानौचित्यं वास्तवसमः रातेनेनयत्केचित्साध्यानुमितिसामा
न्येत्यादेः प्रकृतपक्षकप्रकृतसाध्यकानुमितिसामान्यविरोधित्वं वाच्यमित्याशयः नचैवं तदुक्तासाधारणे पक्षऽसिद्धमितिवाच्यं नित्यत्वव्यापकीभू
ताभावप्रतियोगित्वविशिष्टशब्दत्वादेः प्रकृतपक्षेऽपक्षहृद्दतायां ममहेतुतानेनानुमितेरप्रत्यूहत्वात यद्यद्धर्मविशिष्टेविवे प्रकृतहेतोर्व्यापनेनत्रत्
त्रानुमितिविरोधित्वं तु निष्प्रत्यूहं निरुक्तविशिष्टशब्दत्वादेः सत्त्वद्धर्मविशिष्टत्वकालेऽप्यहेतुनापि तत्र प्रकृतसाध्यानुमितेरित्युक्तमंमदृपिपयात्तं
किंच पक्षवृत्तित्वस्य पक्षवृत्तित्वनिष्ठव्याप्तिविरोधित्वार्थकत्वे नैव स्वरूपासिद्धिसंकीर्णासाधारण्यादिसंग्रहे यद्यद्धर्मवृत्तित्वमित्याद्यर्थकरणं वैयर्थ्यं
प्रकृतपक्षकप्रकृतसाध्यकानुमितिसामान्यविरोधित्वविशेषणेनैव सकलबाधादिवारणसंभवात् न चैवं हि दोषस्तापहेतोर्दृशार्थेन करणं सम्प्रा
र्थकरणं तु विशेषणाभावापक्षाभिप्रायेणेति वाच्यं तथा सति विशेषणापहे यद्यद्धर्मविशिष्टत्वमित्यादिना प्रकृतसाध्यानुमितेरित्यंतेन तदुपपा
दनीयसंगतेरिति दिक् विरोधितानविषयतावच्छेदकमेति समूहालंबनज्ञानमादाय अतिप्रसंगवारणाय विरोधित्वेन साधारणावच्छेदकत्वपर्यंत
स्य विवक्षणीयत्वादिति भावः तादृशे तादृशपर्याप्त्यधिकरणत्वस्य र्थः न तु मणिमंत्रादिस्यायेन तादृशप्रतियोगिज्ञानस्यैव विरोधितया न सं
भवः अत एव पूर्वमुक्तं सत्प्रतिपक्षस्य दुष्टयानासाधारणे दोषहीनीत्यनाह साध्येति पक्षस्यैवेत्येवकारेण तादृशप्रतियोगित्वमात्रस्यवच्छेदः

371

टी०

नयत्वात्तत्तादृश्यपर्याप्त्यधिकरणत्वात् मणिमतं त्वाहुरित्यायेन विरोधिनेमानाभावेन सत्प्रतिपक्षोत्थापकतयेत्यस्याग्निमद्दीधितिग्रंथस्वारस्य
नवसत्प्रतिपक्षमुद्रयैवासाधारणपक्षदोषत्वादिति भावः जलह्रदात्मके बाधेनादृश्याबाधस्थले नहेकदेशोवन्ह्यभाव इतिशेषः सव्यभिचार
त्वस्फुरणानियामितयत्वेतु पक्षाशुनर्मवसत्प्रकनतुनस्यमहानसादिविशेष्यकानुमितिविरोधितानवच्छेदकत्वान्नहेयपरस्पपक्षाह पर्वत
मितितन्नद्भूमिविशेष्यकप्रमेतितन्नद्भूमिविशेष्यकानुमितिप्रतिबंधकप्रमेत्यर्थः ननु पक्षेकंचिद्देशोसर्वस्यैवतानस्यप्रमात्वान्नहृदावर्जकं स
र्वदेशेप्रमात्वेचननिरुक्तव्यापकीभूताभावप्रतियोगिशालित्ववान् घट इत्यादिज्ञानेपीत्यसाधारणोः पक्षमिरनन्यआह प्रमात्वं चेति ननु वन्ह्यभा
ववान् जलह्रद इतिज्ञानस्यापि रूक्षप्रमात्ववत्तयावन्ह्यभाववेति प्रसंगस्तेहवस्थायत्वेन्यतश्राह वन्ह्यभाववन्महानसमितिमहानसस्यापि पक्ष
द्भूमितगतत्वादिति भावः वन्ह्यभाववद्देशे महानसे वन्ह्यभाववत्तांशे नप्रमात्वमितिप्रनेनवन्ह्यभावेऽकातिव्याप्तिरिति दोषः एवमपिनि
रुक्तप्रमात्वनिवेशेपिवाधे वाधस्थले वन्ह्यभाव इतिशेषः सत्वादिति अयमत्र वन्हिविरहस्य हेतौ महानसवृत्तित्वेज्ञायते महानसधर्मिका
नुमितिप्रतिबंधकप्रमाविषयतावच्छेदकत्वं नवन्ह्यभावेति वन्ह्यभाववन्महानसमितिज्ञानस्य वन्हिविरहस्य हेतौ महानसवृत्तित्वांशानि
रिक्तांशेमहानसेवन्ह्यभाववत्तांशेप्रमत्वमप्रत्यत्वाभावादिति चेन्मैवं निरुक्तव्यापकीभूताभावप्रतियोगिशालित्ववान् घट इति ज्ञानस्यापि प्र

राम०

152

372

कृत्वे घटत्वप्रतियोगित्वांशभानमिति। किंचाशेषघटे शाब्दत्ववत्त्वांशेऽप्रमात्वप्रसंगः प्रमात्वाभावेनासाधारण्यपक्षे व्याप्त्या यन्नाधेयत्वमाधारत्वं चैकमेव संबंधभेदेन तस्या
धेयत्वाधारत्वव्यवहारजनकत्वमिति मतमाश्रित्य हेतौ साध्यवत्प्रतियोगित्वांशभानमिति चिन्त्यमस्य तद्विषयकप्रतीतिविषयत्वरूपत्वयाधेयत्वाधारत्वयो
स्यापि तन्निवेशनत्वं चागौरवात् तदवाभिः परिहरणीयामेवं च तत्र पक्षेऽपि बाधेऽव्याप्तिव्याप्तिर्दुर्वारैवाशंक्यात् एतेन अनुमितिव्याप्तिमसंगे
न तिष्ठिन्विषयत्वेनेति निविशेषाय तत्पक्षतापादितमपर्यः सः। नव्या मितिविषः अतएव पक्षविशेषनियंत्रितानुकलक्षणाकरणात्। अत एव घटपक्षकसं
मिघटपक्षकस्य शाब्दत्वस्यानासाधारण्यं किंतु शाब्दपक्षकस्यैवेत्यर्थः न चाव्यतिरेकानुमितिविरोधिज्ञानविषयतावच्छेदककोटिनिवि
ष्टत्वमात्रस्य व्यभिचारत्वे घटपक्षकस्यापि शाब्दत्वस्यासाधारण्यं स्यादिति भावः तद्बुद्धिमितिपूर्वतद्बुद्धिकारणव्यभिचारदिति शेषः सद्दोषः
सद्दोषोऽभवेत्येव। तथा च पक्षविशेषनियंत्रितानुकलक्षणाकरणात्तत्रोक्तरीत्या व्याप्तिरिति नैतदुक्तलक्षणाकरणीयं किंतु धर्मिविशेषघटित
निरुक्तनिविषयत्वमात्रमेव लक्षणानुचितमिति हृदयं ननु घटत्वनिष्ठतानवच्छिन्नायां दोषत्वे तद्व्यानवच्छिन्नायामप्योषत्वापत्तिरत आह असा
धारणपक्षस्येति तथा च तत्र व्यापत्तिरिति भावः एवं सति दोषत्वस्योक्तरीत्या धर्मिविशेषनियंत्रितत्वोपगमेन नाव्याप्तिरिति विशेषमात्रस्य पक्ष
लक्षणाकरणादस्यत्रेति कन्दैरिति शेषः पक्षनियंत्रितेति अन्ये वालक्षणसमन्वितं साधारणोतत्व्यवहारविषये अतिव्याप्तेरिति पद्धृमिनिवेशनेऽति

373

१०३

103

दी०

त्वां च नेन तद्धर्मिकरूपे च दोषस्य इति सीकर्तुं तत्त्वसाधारणस्याप्यनित्यदोषत्वेन तदानीमलक्ष्यत्वेन तत्र नाशङ्कावकाश इति पश्चात्तदुद्भावनहेतुसत्त्वादिति भा
वः अन्यमतेन तद्धर्मिरूपे च दोषत्वं नीकारेण पक्षनियंत्रितो नामलक्ष्यकर्तुमभिमते· अनेन साधारणस्यानित्यदोषत्वेन तदानीमपि तस्य
लक्ष्यत्वमिति सूचितं· प्रतिबंधकतावच्छेदकतया· समर्थ्यासाधिकरणतया नात्रातिव्याप्तिरिति तस्य तदानीमपि लक्ष्यत्वात् गङ्गेशलक्षणसत्त्वा

374

देवेति भावः अत्र पूर्वमव्याप्तेरिति अत्र चन्नाव्याप्तिप्रसंगो धीति पाठः स च सांप्रदायिकस्तु ये ह्यः उक्तरीत्या तन्ते अप्रमाणमिति वे सोऽप्रमाणाद्दिदत्तौ ना
तिव्याप्तिरित्याशयेनाह व्यक्तिविरहादित्यन्नेति पञ्चिडे वाधे· निश्चिव्याधस्थले· नन्वेकदेशे वन्ह्यभावे इति शेषः शेषं पूर्ववत् उक्तरीत्यातानेप
(प्रा) आशयपक्षानुसारेणासिद्धांतयति अत्रत्र यद्यदर्शनादिना सन्दिग्धपक्षमुद्द्याः साधारण्यस्य हेत्वाभासत्वस्यापि नन्तुर्यांकने नचैवमिति
एतावन्मात्रेणेति मात्रपदेन पक्षधर्मताज्ञानव्यवच्छेदः कुत्रापीति तावन्मात्रज्ञानस्य सम्पत्तिपक्षेन याप्रतिबंधकत्वासंभवेन मणिमंत्राद्दिन्यायेन
वप्रतिबंधकत्वादिति हृदयं मणिमंत्राद्दिन्यायेन विरोधित्वमानाभावात्क्वचिद्दोषत्वमतआह शाब्दत्वहेतुकेति हेतुत्वादित्तिन याच मत्र कारणापि
रह अनुपसंहारित्वानुमित्यनुत्पादेन सत्त्वसाधारणस्य प्रयुक्त इति भावः नन्वेवमसाधारणस्य दोषत्वेऽपि वन तावन्मात्रज्ञानस्य सम्पत्तिपक्षेन याप्रति
बंधकत्वेन मणिमंत्रादिन्यायेन प्रतिबंधकत्वमानाभावेन वदोषत्वस्यासंभवात् आह नन्विति नीतितत्त्वस्य पक्षव्रतितात्पर्य·

राम०

तत्रशाब्दत्वे: साध्यव्यापकीभूताभावप्रतियोगित्वज्ञानस्यैव: साध्याभावव्याप्तिज्ञानस्यैवपर्यवसानादित्यतयाचसत्प्रतिपक्षमुद्रयाः सा
धारण्यं दोष इति भावः ननु तदभावव्याप्तिविशिष्टपक्षताज्ञानस्यैव सत्प्रतिपक्षतया पक्षवृत्तितापन्नकालीन तादृशप्रतियोगित्वज्ञानेकथं
सत्प्रतिपक्षतापर्यवसानमत आह पक्षधर्मतेति व्याप्तिज्ञानस्य साध्याभावव्याप्तिज्ञानस्य एवं पक्षधर्मताग्रहयतो विशिष्टज्ञानप्रतिबंधक
तामनावलंबेनतु तदवच्छेदकतापर्याप्त्यधिकरणविशिष्टाप्रसिद्धेश्च नापत्तिरित्याशयः विशिष्टस्य ग्राह्यत्वेनेति न च यद्रूपधर्मताज्ञानकाली
नव्याप्तिज्ञानस्यैव व्याप्तिज्ञानकालीनपक्षधर्मताज्ञानस्यापि विनिगमकाभावेन प्रतिबंधकत्वेन यापक्षधर्मतायाश्चापि तदवच्छेदकत्वान्
थमेतदितिवाच्यं जनकत्वप्रतिबंधकत्वयोरेकत्रासंभवेनानुमितिजनकस्य पक्षधर्मताज्ञानस्य तस्य प्रतिबंधकत्वासंभवस्यैव विनिगम
कत्वात् असंगतिरिति तच्छेदेन विभाजकतावच्छेदकोपलक्षितेन रूपेण परामर्शनीय तत्राद्यविभाजकतावच्छेदकोपलक्षितपरामर्शसाध्य
रणपाक्षाधारण्ययोर्द्वयकत्वानुपयोगी सपक्षवृत्तित्वविपक्षव्यावृत्तत्वघटिततया हेत्वाभासत्वविरहात्तत्वासंगतिरित्याशयः विपक्ष
वृत्तित्वादिति विपक्षवृत्तित्वस्य व्याप्त्यवच्छिन्नत्वमर्थः अत्रांतेनेतितच्छेदस्यैवाविधि अनुमितिविरोधित्वेनेति तथा च तच्छेदेन तृतीयविभाजकता
वच्छेदकोपलक्षितपरामर्श इति भावः तादृशावच्छेदकस्योपलक्षणस्य प्रदर्शनामाह विपक्षेति विपक्षेगतस्य विशेषणानन्वितज्ञानस्यानु

दी०

भिन्नप्रतिबंधकत्वाद्इसंगतिनाईवस्याः इति भावः ननु मूलस्यैवकारासंगतिः स्वरूपासिद्ध्यादिनापि तादात्म्यविरोधित्वात् आह एवकारेणे

ति तेनैवेत्येवकारेणेत्यर्थः अनुगमकरूपे द्वितीयविभाजकतावच्छेदके रूपे स्वावच्छिन्नप्रतिबंधकज्ञानप्रकारतावच्छेदकत्वस्यावच्छेदकत्वेनया

बोधयितुं विरोधितावच्छेदकत्वेन प्रतिपाद्येति यावत् व्याख्यायामनुगमकरूपस्येति द्वितीयविभाजकतावच्छेदकस्येत्यर्थः एवं च मूलेऽप्र

त्येकमेवेत्यस्य हेतुद्वयविषयकप्रतीत्वविषयावच्छिन्नमेव न तत्त्वानुगतरूपावच्छिन्नमित्यर्थ इति ध्येयं मूलेऽनतीयलक्षणानंतरमेवमेनासाधा

रणस्येति साधारणादिप्रायाभिप्रायेण तृतीयादिः प्रकृतलक्षणस्य तृतीयलक्षणस्य उभयेति साध्यतदभावोभयेत्यर्थः इति मूलं

सपक्षपदत्यात् व्यापकत्वाभिप्रायेण व्याप्तिनिरासकत्वमित्यादिना व्याप्तिरिति तन्मूलं न युक्तं वैपरीत्य साधारणस्य सपक्षेति पक्षोऽव्यापकत्वेऽपि

अव्याप्तेः अव्याप्तिनाशस्यात् अव्यापकतयेत्यतिव्यापकतयेत्यस्य मूलस्य न युक्तत्वेति तादृशासाधारणस्येति शेषः व्याप्तिगतहेतिसा

ध्यतदभावव्याप्तिरिति व्याप्येत्यर्थः आवेदितत्वादिति पूर्वपक्षग्रंथेनेति दूषणग्रंथेनेत्यादिना वाचेतं तस्मात्तादृशासाधारणस्याभिप्रायकत्वमव

लंब्याप्तिनिरासप्रतीयादकत्वमनुचितमिति भावः तादृशस्य तादृशासाधारणस्य इति मूलविरोधात् सेशायकत्वाभिप्रायकतादृशाम

लविरोधात् तदर्थं तादृशामूलार्थव्याख्यायेति तृतीयलक्षणेन तदसंगत्येति शेषः पर्वलक्षणेति द्वितीयलक्षणेऽसत्यर्थः एतादृशालक्षणे

३७६

१०४

तिः अनुमितिविरोधित्वघटितद्वितीयलक्षणाकरणोपीत्यर्थः आद्यपरत्वे आद्यपराणांत्वपक्षे प्रथमलक्षणेन तृतीयलक्षणापेक्षया प्राथ
म्यं तेन द्वितीयलक्षणाद्यत्यर्थः कश्चित्तु तत्ताद्यलक्षणाकरणेपि सम्प्रतिपक्षेऽव्यापकतया द्वयपराणामपक्षे इति पाठस्तत्र प्रथमलक्षणा
इति याश्रमेव सम्यक् मान्या नत्र हेत्वाभासत्वमित्यनन्तरमेव मूले जेत्याहुः पाठं तापयितुं आवृत्ते अनुमितीति तृतीयलक्षणानं
तरं तेनैतत्पाठे त्वसंगतिः तृतीयलक्षणाकारसोभयथापि गृहविरोधिरूपत्वाद्यर्थकत्वस्य पूर्वपक्षे न्यायप्रवेशमतयात्र सा
ध्यत्वाभाववद्वृत्तित्वं रूपासाधारणस्य न सत्प्रतिपक्षेऽव्यापकत्वेन वा संग्राहकत्वमिति तृतीयलक्षणेऽव्याप्तिनादवस्थ्यात् अत्र
साधारणस्येमादिमूलस्यासाधारणस्पृष्टं व्यापकेनयाद्यपराणामपक्षे इत्यर्थवैचे प्रथमलक्षणेनाव्याप्तिः किंतु द्वितीये तत्साद्यर्थे माद्यसा
धारणेऽपिस्यात् हि सत्प्रतीति साध्यानुमितिप्रतिबंधकतयेत्यर्थः न व्याप्तसाध्यव्यापकीभूताभावप्रतियोगित्वमसाधारणत्वं द्वितीयलक्षणा
इति भावः अन्यथा प्रथमलक्षणाकरणेऽसत्प्रतिपक्षेऽव्यापकतया द्वयपराणामपक्षे इत्यनुपपत्तेः स्यात्तु तदुक्तं त्वं नाद्व्याप्याभावात् तृती
येव तृतीयलक्षणेतद्संगत्या द्वितीयलक्षणायोजनसंभवाच्च इदं च सारमर्दं च॥ ॥इति महादेवविरचितायां सर्वोपकारिण्यां
वानंदीव्याख्यायां सव्यभिचारग्रंथव्याख्या समाप्ता॥ ॥इत्याहेरितिश्चाहिनामनिरूपणोभयकत्वादिसाधारणपरिष्कारः॥ लक्ष्मत्व इति

377

टी०	105

मणिकारमतेनतयोः साध्याभावाप्रसिद्धिरिति भावः संप्रदायेतीति संप्रदायमते निष्कृतसाध्यकत्वाभाववद्वृत्तित्वस्य कृत्स्नत्वयोः साधारण्यान्वासाधारण्या
न्वरूपतयानयोरनुपसंहारित्वासाधारण्यवद्व्याप्यायामतेप्रसक्ताविति भावः नयोरिति मणिकारमतद्व्यादि अस्तिन्यायमितितन्मते स्यानिष्कृ
तसाध्यकवत्पराभर्षकालयानिष्कृतसाध्यकानीतिसपक्षेतद्भिन्नसाध्यसंशयविषयपक्षेचसद्धेतोर्विद्यमानत्वादिति भावः नापतेव निष्कृते पक्षस्य सा
ध्यवन्मात्रान्वयेनैव भावात् संभवात् इत्युपलक्षणं असाधारणानुपसंहारिणस्यापि नावेनैवसंभवादित्यपि द्रष्टव्यं। अत एव निष्कृते पक्षस्य साध्यवत्त्वे
वान्वयादेव सपक्षत्वस्येवे निरुक्तकारेणापि प्रकृतत्वच्छेदः नस्य निश्चयदशायां पक्षसपक्षत्वघटितेतरत्वलक्षणास्य तत्र प्रयोगाभिप्रायेत्वसग
त्वर्थः साध्यवाक्यप्रयोगनिर्णयानिष्कृतसाध्यवतीतिसमासोपि साध्यवैशिष्ट्याभावइत्याशयः। उत एवंथ्यास्तइहसपक्षत्वेन निश्चयपरामर्शमिति नियं
थ्यस्य निश्चयपरामर्शमेव स्वरूपसम्बन्धेयघटितमेव विरोधव्यवहारणामात्रेति अनुपसंहारिसाधारणयोः लक्षणात्पक्षपत्वेनमात्रपदात्तद्व
च्छेदः तत्पदेन केवलसाध्यवत्त्वपरामर्शनिर्वाहार्थं निष्कृतसाध्यवतीतिसमासोयेत्या साध्यवद्भिन्नत्वविशिष्टवैशिष्ट्यबोधात्मक तद्बुद्धिरेव तस्य स
म्बुद्धेरेव एवं तत्स्वरसादाह अन्याहुरिति उक्तच्छिन्नस्याविरोधकत्वं नियम्यपवृत्तिछिन्नस्य असंगतमितितन्मात्रानुपसंहार्यत्वाभावादिति भावः ननु पक्षनि
र्णयेव प्रतिबंधकत्वोपगमेन साध्यवद्भिन्नत्वसंशयवति हेतुमत्त्वनस्यात्पक्षत्वं एवं च पक्षमात्रायत्तिस्यादिमत खंडनरीत्या साध्यवद्भिन्नत्वसंशयवति

378

रामः०

हेतुत्वानमपि शेषएवेत्यस्वरसादाह आहुरिति उक्तहेतुत्वस्य विटाकाशोभयवृत्तिहेतुत्वस्य: असंगतमिति तस्यानुपसंहार्यत्वाभावादिति भावः। अन
नुगमनित्यत्वे साध्ये उक्तहेतुत्वस्य साध्यसामानाधिकरण्यस्य विरहत्वाभावादिति उक्तस्येत्यसंगतमत आह अथवा गगनेति। नाहृषविरहस्यावच्छेद
त्वमुपपादयति यस्यामेव सति युक्तासः अवच्छेदः अनुपसंहार्यस्यावच्छेदकत्वमुपपादयति तत्रैव विसर्वमितिपमिता यदनुपसंहार्यइत्यर्थः। अनु
पसंहारित्वाभावादिति केवलान्वयिधर्मावच्छिन्नपक्षकत्वस्यैवानुपसंहारित्वरूपत्वादिति भावः। अगृहीतसाध्यानुकूलसहचारकत्वमनुपसं
हारित्वमित्याशये नाह भावे वेति न द्वितीयेषेति अनुपसंहारिविशेषस्योक्तहेतुत्वाश्रयत्वस्य यद्धर्मावच्छिन्नो साध्याभाववत्त्वमिति साध्याभाववत्त्वमेवेत्य
र्थः एवकारेणानिश्चयांशादिर्नाह भावे वेति न द्वितीयेषेति अनुपसंहारि) अवच्छेदः न चाव विपक्षसत्त्वनिश्चयागर्भमिति पर्यवसितं विपक्षसत्त्वस्य
निश्चयागर्भत्वे मूलसंवादमाह अनुपदमेवेत्यादिना अभिधानादित्यन्तेन। अन्वयव्यतिरेकसहचारसंशयस्य व्याप्तिज्ञानप्रतिबन्धकत्ववारणापमि
श्रेः प्रकारद्वयमभिहितं विपक्षसत्त्वनिश्चयगर्भमित्येकः प्रकारः पक्षेत्यादिना व्यभिचारसंशयोऽपरः प्रकारः तत्राद्यमुपपादयितुमिति काकाक्षिगोलकन्या
यनेत्याह अभिधानादित्यन्तं हेतुत्वेन संबध्यते दोषान्तरमाह तज्ज्ञानस्येति स्वरूपसतस्तस्याप्रतिबन्धकत्वात् ज्ञानस्याप्रतिबन्धकत्वादित्यसं
गतमत आह व्याख्यायां तन्निश्चयपदं तज्ज्ञानस्येत्यस्यार्थः इति धिनोऽप्रतिबन्धकत्वादिति व्याप्तिज्ञाने इत्यादि व्याप्तेर्निश्चयाग

म॰टी॰ 106 380

मत्वादित्ति भावः। ननु निरुक्तप्रयोज्यज्ञानस्याप्रतिबंधकत्वेपि परामर्श व्याप्तिघटकसंशयवारणाय स्वरूपसत्साध्याभावनिरूपितविषयत्वशालित्वज्ञानं ता
दृशज्ञानत्वेन प्रतिबंधकं वक्तव्यं साधारणं तु निरूपितविषयत्वोपन्यासः। कृतसाध्याभाववद्वृत्तित्वमित्युक्ते त्वाहन्त्वेति व्याख्यायां साध्याभाववत्त्वानि
रूपयति एतदनंतरं रूपांतरे रोगीति पाठः। ननु निरूपितविषयतान साध्याभावावच्छेदकतावच्छेदकधर्मवद्वृत्तित्वज्ञानं प्रतिबंधकं वाच्यमन्यथान्यरूपांतरे
णोपस्थापकहेतोर्व्यभिचारत्वेनाहद्दीधितौ भवेति। आत्मपक्षानहृदवृत्तित्वेति साध्याभावनिरूपितविषयधर्मिवृत्तित्वेप्यपि प्रतिबंधकमिति एतदनंतरं रू
पांतरस्मेहेति पाठः। दीधितौ गौरवादितिकात्वांतरीयपुरस्थानीयनिरूपमाप्तयानिगसंगवारणाय तत्कालीनत्वतत्तत्पुरुषीयत्वनिवेशनस्या
वश्यकत्वादिति भावः। व्याख्यायां दोषांतरमिति ननु प्रामाणिकं गौरवं न दोषायेत्यस्वरसादिव्यादिः। अपरे तु। धर्मज्ञानेन हेतुवृत्तित्वं न दृष्टत्वेन
हृदे धूमवत्त्वमिति तत्र ज्ञानद्वयस्यापि। यद्वान्यापरत्वेपि धर्मभिन्नेन रूपेणापरत्वे वह्न्यादित्वापेक्षया पात्रहृदत्वपरभिन्नेन हृदत्वादिरूपेणापि हेतुवृत्तित्व
स्य हृदे धूमवृत्तित्वेन कज्ञानेन गृहीतमिति योजना। तत्र समूहालंबनात्मकज्ञाने। अप्रतिबंधादिति नन्याय हृदो वह्न्यभाववान् हृदवृत्तिधूमवत्त्वा
दिज्ञानद्वये हृदस्य स्वभाववैलक्षण्येन धूमवत्त्वप्रकारक हृदवृत्तिरित्यादिसमूहालंबनज्ञाने वा हेतुसाध्याभावयोः सामानाधिकरण्याविषयकत्वेन व्याप्ति
लेनाप्रतिबंधकत्वं सर्वसिद्धमनुपपन्नं तन्मतेनाहृदेशज्ञानस्य निश्चीयमानेषा घुक्तरूपज्ञानात्मकरनयाप्रतिबंधकत्वस्फुरद्वारत्वादितिभावः॥ रामः

381

धर्मप्रकारे साध्यमविच्छिन्नेन तृतीयार्थो ऽभेदः स च तद्भिन्नत्वे सत्यत्र तत्पदार्थसाध्याभाववद्वृत्तियी यथा च तादृशसाध्यमविच्छिन्नो यः साध्या-
भाववान् तद्वृत्तित्वज्ञानं साध्याभाववद्वृत्तित्वे हेतुरित्याद्याकारकं विशिष्टज्ञानं प्रतिबंधकमिति नोक्तज्ञानद्रूपस्य समूहालंबनस्याप्रतिबं-
धकत्वमिति तात्पर्यः । वस्तुतो वृत्तित्वान्वितं निरूपितत्वमेव तृतीयार्थस्तथा च तादृशावच्छेदकताकत्वविशिष्टधर्मावच्छिन्ननिरूपितसाध्या-
भाववद्वृत्तित्वज्ञाने प्रतिबंधके विशिष्टवैशिष्ट्यमपि न द्वयावच्छेदकावच्छेदकभावज्ञानमान्नोक्तदोषः । यथाश्रुते तादृशज्ञानानाकारत्वात्संगत्या-
पत्तेरिति ध्येयम् । तथा प्रतिबंधकं ज्ञानं वृत्तिमत्त्वसंबंधमिति नावच्छेदकस्य निरूपितत्वं न संभवादिति भावः । तादृशावच्छेदकेति साध्या-
भाववच्छेदकेत्यर्थः । मिश्रोक्तं द्वितीयं प्रकारं दूषयितुमुपन्यस्यति दीधितौ यदि विति व्याख्यायां संदिग्धेति साध्याभाववेशनिश्चयात्मकवृत्तित्व-
ज्ञो संशयात्मकव्यभिचारज्ञानेत्यर्थः । लाघवाद्भ्रमेति निश्चयत्वानिवेशेनेत्यादि । तद्भावविशेष्यतेति व्यभिचाराभावविशेष्यत्वार्थः न संभवतीति विशेष-
वैशिष्ट्यबोधविशेषतानावच्छेदकप्रकारकनिश्चयस्य हेतुत्वादिति भावः । नन्वेवमिति विशिष्टवैशिष्ट्यावगाहि साध्याभाववद्वृत्तित्वज्ञानस्यैव
विरोधित्वादिति भावः । विशेष्ये विशेषणमिति याचनात् तद्विषयतासाध्याभाववांस्ते संशयसाधारणमिति भावः । ज्ञानं अनुकूलतर्कविरह वि-
शिष्टव्यभिचारज्ञानमात्रं न नैवमनुकूलतर्कसत्त्वे व्यभिचारनिर्णयस्यापि प्रतिबंधकत्वं न स्यादिति वाच्यं तर्कग्रंथोक्तरीत्या व्यभिचारनिर्णयाभा-

म.टी.

107

वद्विशिष्टानुकूलतर्कस्यैवरेतेन्नेजकत्वात् दीधितौ पक्षेऽस्यादिशब्दः नित्यत्वातिरिक्तोपि शब्दधर्मस्तदतिरिक्तधर्मवानप्रमेयत्वादित्यादृयद्भमयेःव्या
ख्यायां वाधवारणायेति शब्दे शा[illegible]दधर्मातिरिक्तधर्माभावादिति भावः व्यभिचारनिरासायेति नित्यत्वातिरिक्तातिरिक्तस्यानित्यत्वस्य साध्यस्याभा
ववति घटादौ प्रमेयत्वादेर्नैरायादिति भावः पक्षातिरिक्त इति घटादावतिशेषः उच्छेदः स्यादिति नाहशव्यभिचारसंदेहस्याप्रतिवंधकत्वे यवंतत्कृदृशात्मन
रत्वेव न्ध्यभाववद्व्याप्तिग्रहसंभवस्यैवतस्यप्रतिवंधकत्वेतुनदृशानोर्पयवंतमंतनभयव्यभिचारसंदेहसत्वेनवन्ध्यभावव्याप्तिग्रहेन संभवतीत्याशयः य
नुसाध्याभाववांशेति धर्मितावच्छेदकसाध्याभाववद्वृत्तित्वज्ञानं न प्रतिवंधकमिति साध्याभाववांशेति ग्राह्याभावकमेव व्यभिचारज्ञानं प्रतिवंधकं नतु संशया
त्मकमिति वाच्यमिति ग्रामाणामधिमते येन साध्याभाववद्वृत्तिर्हेतुरिति ग्राहकज्ञानानामप्रतिवंधकत्वापातः साध्यातिरिक्तपक्षधर्मातिरिक्तधर्मवा
नित्यादाववप्रयोजकत्वप्रयोजकहेतोर्लाभ्यंचनेत्मानेदूषणोस्यात् किंतुसाध्याभाववद्वृत्तित्वग्रहत्वेन साध्याभाववांशेसंशयनिधर्मितावच्छेदकेता
नसाधारणोनैकंप्रतिवंधकत्वं स्वपरंससाध्याभाववत्तांशे सधर्मितावच्छेदकव्यभिचारज्ञानस्य तत्रैवप्रतिवंधकत्वे विशिष्टवैशिष्ट्यविषयत्वेनैवसाध्या
भावांशसंशयव्याप्तताऽवच्छेदिका लाघवादित्युच्यते विशेष्ये विशेषणमित्या येन साध्याभावविषयतायाः शरीरे न संख्यातत्वगुरुत्वात् साध्याभा
ववत्वांशेनिश्चयं रूपमित्यादिग्रंथोपि सधर्मितावच्छेदकज्ञानप्रतिवंधकतापरत्ववर्णनं चनके पामपि दोषाणामवकाशः साध्यातिरिक्तेत्यादेर्निर्धर्मि

382

राम०

तावच्छेदकसाध्याभाववद्वृत्तित्वगर्भितव्यभिचारसंशयेनैव व्याप्तिग्रहप्रतिबंधसंभवात् ननु व्यभिचारग्रहस्य हेतुत्वप्रतिबंधकत्वमेव नास्ति किंतु साध्या
भाववद्विशेष्यकतानिरूपिताधिकरणविशेष्यकतानिरूपितवृत्तित्वविशेष्यताकज्ञानत्वेनैव वैशिष्ट्येन एवं सति लाघवं तर्कसत्त्वे व्यभिचारनिश्चयानंतरम
पि व्याप्तेः प्रामाण्यनिश्चयप्रसंगात् संशयस्य च निश्चये पि तर्कस्योत्तेजकत्वसंभवादिति मिश्रानुयायिभिर्मैथिलैरुक्तं नश्चित्तं अतो व्यभि
चारनिर्णयाभाववैशिष्ट्यानुकूलतर्कस्योत्तेजकतयोक्तोपन्यासे व्यभिचारग्रहस्य हेत्वाप्रतिबंधकतायां मानाभावादिति दिक् दूषिताव
येत्यादि अत्रेदं बोध्यं एकविधानेकविधा वा व्याप्तिरनुमानांगं भवतु परं त्वेकविधव्याप्तित्वेन एव नानाविधव्यभिचारज्ञानं प्रतिबंधकमित्याश
येनेयमाशंका समाधानं च समानप्रकारकत्वेनैव विरोधित्वमाश्रित्य यदि पुनरित्यादि व्याख्यानीति यत्तु अन्योपाधिकत्वातिरिक्तसर्वविधव्याप्तिज्ञा
नमेवानुमितिहेतुरित्याशयेनेयमाशंका अन्यथा साध्याभाववद्वृत्तित्वविशिष्टसाध्यसामानाधिकरण्यरूपव्याप्तिज्ञानस्यैवानुमितिहेतुत्वेऽन्य
विधव्यभिचारस्य साध्याभाववद्वृत्तित्वस्याप्रतिबंधकतयैव विरोधित्वप्रतिपाद्यस्याभासत्वविरहाद् आशंकानुपपत्तेरिति नवीनैरुक्तं तच्चिन्त्यं यदि पुनरित्या
ग्रिमग्रंथविरोधात् साध्यवन्निष्ठतानेति धर्मितावच्छेदकावच्छिन्नविशेष्यतानिरूपितपाद्यपदविशेष्यप्रकारतरशालिनिश्चयत्वं साध्यवन्ना
ग्रहप्रतिबंधकतावच्छेदकं न तु परत्वेनेत्यर्थः व्याख्यायां साध्यवन्निष्ठतानेति साध्यवन्नाग्रहत्वावच्छिन्नेत्यादि संभावनायां स्वं न पाठस्तु ग्रामादिकः

टी॰ 108

सामानाधिकरण्यग्रहाविरोधिसामानाधिकरण्यवत्त्वादिकं कामिनीजिज्ञासाविषये कामिनीज्ञाने ऽतिव्याप्तेराह दृष्टिष्विति तादृशस्येति व्याख्यायां
नादृशव्याप्तिनिरूपणपव्याप्तिपर्यः तादृशव्याप्तिग्रहविषयतावच्छिन्नप्रतिबध्यतानिरूपकत्वसंभवः व्यभिचारज्ञाननिष्ठप्रतिबध्यताव्यापकत्वग्रहवि
षयतावच्छिन्नत्वादित्याशयेनाह विषयतावच्छिन्नेति विषयताव्यापकेत्यर्थः तादृशीत्वव्यापकत्वविषयतेति नोक्तदोषः व्यभिचारग्रहे तद्वि
षयव्यभिचारेणाभावत्वावच्छेदेनेति बाधादिति शेषः नदोषः नातिप्रसंगः। अनुपसंहारित्वस्य स्वस्वसमानाभावाप्रतियोगिसाध्यकत्वस्य वारणाय
तिनस्यापि व्यतिरेकव्याप्तिग्रहविरोधित्वावच्छेदकत्वादिति भावः इत्यादिश्य मितिश्रमेणाभावघटितत्वामुपादाने स्वान्याभावघटितव्यभिचारे
व्याप्तिरित्याद्युपदार्थः सामानाधिकरण्याभावादेः अज्ञानादेः तदीययत्वाभावादेः साध्यसामानाधिकरण्यादेः तदभावः लक्ष्यत्वेनोक्तइति शे
षः नतरव्यभिचारित्वं साधारणविशेषइतितथाचसोपि लक्ष्यएवेतिभावः विशिष्टाभावेति व्यभिचरितसामानाधिकरण्याभावेत्यर्थः
व्यभिचाराभावेतितथात्वेत्यादि लक्षणसंभवेपि लक्षणेन विशिष्टाभाववारणासंभवेपि लक्षणान्तरमिति व्यभिचाराभावपदेन साध्याभाव
वद्वृत्तित्वामुपादाने स्वसमानाभावाप्रतियोगिसाध्यकत्वस्यानुपसंहारित्वे अतिव्याप्तिरिति व्यापकत्वमुपादायलक्षणान्तरमुचितमित्याशयः
वस्तुतस्तुविशिष्टाभावासंभवात्खलुलक्षणान्तरमाहुरेवेत्याद्व्यभिचाराभावे साध्यसंभवेपि संतसंपातायामभितिवोध्यंविरोधित्वेनेतिवि

384

रामः

घोष्यत्वेनवारणासंभवादितिशेषः अविरोधीति अविरोधिनइत्यंतविशेषणात्त्वेनैवेत्यर्थः तद्वारणं साधनाभावत्वेनवारणं अत्रश्चेय
त्यिम्पनंतरं साध्यस्येत्यादिनग्रंथिमित्येनपाठः क्वचित्पुस्तकेस्तितत्रवसाधपरंतिद्वंद्वात्परइत्यादिन्यायादिन्यायादितिभावः अत्रः साध्यस्याव्य
न्वग्रहस्यव्यापकताग्रहविरोधित्वे व्यापकतायपेतिप्रतियोगिवैयधिकरण्यघटितत्वाद्व्यापकताया इतिभावः तत्रव्यापकतायांविशेषणी
यमितितत्पावच्छिन्नदंशेतस्यविशेषित्वमविकलमितिभावः मिश्रमतेनिवस्तुतोगगनादेर्व्यापकत्वेइष्टापत्तिः व्याप्तेर्व्यापकसामानाधिकरण्या
त्मकतयागगनवानृभ्माद्रित्याद्यवतिव्याप्त्यभावइत्यस्वरसात्तु अयगगनादिरित्युक्तं तवेतिवत्वमितिशेषः तत्पाव तदर्थपर्यालोचे साधनमा
त्रेतितत्पाव मिश्रमतमवलंब्यसाध्येवत्वान्वयोनुचितइतिभावः मतुवा मतुवंतेन उक्तास्वरसस्यत्तमिश्रमताश्रयणा मतुस्वितमिति
तद्दृत्ताश्रयणेनैवाहयदेति मणिग्रंथेतिग्राह्याभावानवगाहित्वादितिभावः आकांक्षयां आशंकायांशेषमितीति शेषमित्यादीत्यर्थःव
द्दृत्तीतिशेषः तत्पावः तदर्थपर्यालोचनेन तत्र व्यापकताग्रहविरोधित्वघटितत्वस्रोतादृशव्यभिचाराज्ञेति साध्यवद्व्यावृत्तित्वादिरूपे
त्यर्थः आदिनासाध्याभाववद्वृत्तित्वपरिग्रहः तत्रग्राह्यतास्थिकरणेत्याव्यापकताग्रहाद्दविरोधित्वद्दृष्टिनह्ल रत्नोसाध्यवद्व्यावृत्तित्वपेतिघटकेप
त्यः साध्यवत्ताज्ञानंतिसाध्यवत्तोज्ञानेत्यर्थः। तत्पदं साध्यान्वेमवत्तपदं विशिष्टव्याप्त्यभावेनतिप्रसंगमाह अव्यभिचरितेति अत्रा

385

९८

दी॰ 109

पीतित्रस्य व्याप्यत्वाभावे घटितेन व्यापकत्वोपादानेत्याभावप्रघटितत्वाभिचारे ऽव्याप्तिः स्यादिति भावः अस्मद्गुरुमान इति घटादिकमादाय तद्वारणाय हि त्वह
विरोधित्वमपि प्रसक्तं तावन्मात्रस्य गाहित्वहेपादानेन तद्धारणेपि तावद्व्यभिचारमात्रावगाहित्वनेह विषयत्वमेव सम्यगित्यादिकमसहनवीनं साध्य
तो भिन्नत्वद्गतांसाध्याभाववद्वृत्तित्वसाध्यवदन्यावृत्तित्वविशिष्टसाध्यसामानाधिकरण्यपर्याप्तानमेवानुमितिहेतुत्वं परिचायात् एतादृशव्याप्तिधीवि 386
रोधित्वात् साध्याभाववद्वृत्तित्वं साध्यवदन्यवृत्तित्वं च दोषः व्यभिचारान्तरस्य न कव्यभिचारोन्नायकत्वात् परमुखनिरीक्षकतयाऽदोषत्वमित्यभिप्रा
येत्य एवमग्रिमसन्दर्भेपि बोध्यं साध्याभावव्याप्यत्वादिघटितत्वविरोधिता निवेशे गौरवात् तत्र मानाभावाद्विरोधिनो साध्यवत्ताज्ञानविरोधित्वे
ति व्याख्यापान्तरे इति एतदीयशब्दरूपसमर्थः व्याप्तिरिति आदिनावच्छेदकधर्मपरिग्रहः तेषां साध्याभावव्याप्यसामानाधिकरण्यादीनां साध्यव
त्ताज्ञानविरोधित्वं साध्यतावच्छेदकावच्छिन्नसाध्यवत्ताज्ञानविरोधित्वं यत्किञ्चित्प्रतियोगितावच्छेदकविशेषाघटितं ज्ञानविरोधित्वं साध्य
वत्ताज्ञानत्वे तु साध्यतावच्छेदकावच्छिन्नसाध्यवत्ताज्ञानत्वेन सर्वः साध्यवत्ताज्ञानविरोधित्वं तादृशतत्त्वात् यत्किञ्चित्तादृशसाध्यवत्ताज्ञा
नविरोधित्वेति काञ्चनमयत्वाभावे धूमसामानाधिकरण्याभावादेर्विरोधित्वात् काञ्चनमयत्वाभावे काञ्चनमयत्वप्रकारकज्ञानत्वावच्छिन्नप्रति
बध्यतावघटितस्य साध्यतावच्छेदकावच्छिन्नसाध्यवत्ताज्ञानविरोधित्वस्य सत्त्वादिति भावः नचेत्वहृतो अयमेव उक्तव्याप्तिरप्येवसामे रामं॰

जस्यात्तत्काव्याप्तेर्भावात् तद्धारणात्मकासिद्धिव्याप्तिवारणात् तस्यानुमितितत्करणान्यतराविरोधित्वादिति भावः आश्रयासिद्ध्यादि
तितयाद्यहेत्वाभाससमावच्छेदकपदेनापि तद्धारणां संभवतीति भावः व्याप्तिव्याप्तिरिति यत्तु प्रकृतव्याप्तिग्रहविरोधित्वावच्छेदकत्वमेव हेत्वाभा 387
सतावच्छेदकत्वमिति नोक्ताश्रयासिद्धावतिव्याप्तिरिति तद्दसत् तथापि पर्वतः कांचनमयपर्वतवान् पर्वतत्वादित्यादौ साध्यतावच्छेदकां
शप्रकृतसाध्यवत्ताज्ञानविरोधिकांचनमयत्वाभावे पर्वतत्वसामानाधिकरण्यस्य साध्याप्रसिद्धत्वेन व्याप्तिग्रहविरोधितया ज्ञानातिव्याप्ते
दुर्वारत्वात् व्याप्तेरननुगतत्वेन उक्तरीत्या समूहालंबनतादृशव्याप्तिग्रहविरोधित्वनिवेशासंभवेन च व्याप्तिग्रहविरोधित्वस्य निवेशेपि नुमश
क्यत्वाच्च एतेन विरोधित्वेन पूर्वोक्तादिविशेषणानुसारेण विशिष्टसाध्यसाधनवत्त्वग्रहाविरोधित्वस्यात्रापि निवेशान्नोक्त
साध्याप्रसिद्धावतिव्याप्तिरिति परास्तं अतएव व्यभिचारादयस्यैव साधारणत्वेन विशिष्टसाध्यसाधनवत्त्वग्रहाविरोधित्वे सति साध्या
भाववद्वृत्तित्वसाध्यवदन्यावृत्तित्वग्रहविरोधित्वं साधारणत्वमिति लक्षणे तोनान्यतरोऽपि दोष इति मान्योक्तमपास्तमेव उक्तरीत्या
समूहालंबनतादृशग्रहविरोधित्वनिवेशासंभवात् यदपि पूर्वोक्तदिशा तद्विशेषणानुसारेण प्रकृतपक्षग्रहाविरोधिनो ज्ञानस्य विषय
तया साध्यवत्ताग्रहविरोधिनि हेतुत्वसामानाधिकरण्यग्रहविरोधिहेत्वाभासतावच्छेदकधर्मवत्त्वमेव लक्षणमभिप्रेतमतो न कोप्युक्तदो

टी॰ 110

षड्इति नवीनैरुक्तं तद्व्यासज्यवृत्ति धूमाव्यभिचरितवह्निमान्पर्वतोऽयमवान् वन्हेरित्यत्रसाधारणत्वेऽव्याप्तिप्रसंगात् तज्ज्ञानस्य प्रकृतप
क्षमहद्विरोधित्वात् उक्तरीत्या साध्याप्रसिद्ध्या व्याप्तेश्च विरोधित्वस्योक्तरीत्या व्याख्यानाभावाच्च अत्र केचित् एकविधव्याप्तिज्ञाने अन्येषां
नाविधव्यभिचारज्ञानस्य विरोधित्वात् हेतुकतत्साध्यकव्याप्तिविशिष्टज्ञानविरोधित्वमेव हेत्वाभासतावच्छेदकत्वमतो नहेतोः षडुक्तिवद्दंतितद्‌समस्ए 388
कत्ववद्गुणो विरोधित्वे मानाभावात् यत्त्वविशिष्टस्य दुष्टत्वाच्च अन्येतु सव्यभिचारतावच्छेदकमेव हेत्वाभासतावच्छेदकं पदेनोक्तमतो नोक्तदोषद्द्वसा
धुः अत्र वदंति साध्यतावच्छेदकावच्छिन्नविषयतानिरूपितपक्षतावच्छेदकावच्छिन्नविषयताशालिज्ञानत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंध
कत्वावच्छेदकतापर्याप्त्यधिकरणीभूतावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रतियोगितासंबंधावच्छिन्नयन्निष्ठप्रकारतानिरूपितयद्भाव
निष्ठप्रकारत्वं तत्प्रतियोगिकतद्भाववद्वृत्तित्वमेव साधारणत्वं पर्याप्तिनिवेशाद्रूपाभावादिव्याप्यघटाभावादिमानयमित्यादौ स्वरूपेनातिव्याप्तिः त
त्रव्याप्यत्वादेरधिकस्य निवेशात् धूमत्वावच्छिन्नप्रतियोगिताकाभाववत्ताज्ञानकाले द्रव्यत्वरूपेण धूमवत्ताज्ञानस्योदये न केवलधूमप्रकारताया प्र
तिबध्यतावच्छेदककाघटकतया धूमाभावादेरप्यसंग्रहप्रसंग इति साध्यतावच्छेदकावच्छिन्नविषयतानिवेशः ननु कांचनमयपर्वतवह्निमानित्या
दौ कांचनमयत्वादेर्विशेष्यीभूतो योवह्निस्तद्भाववद्वृत्तित्वस्यापि साधारणतापत्तेरत्राव्याप्तिः तथाहि तत्र वह्न्यभाववत्ताज्ञानस्य प्रतिबध्य

राम०

तायाः स्वरूपसंबंधरूपावछेदकत्वं कांचनमयत्वाविशेषितवह्निप्रकारकज्ञानत्वस्यैव स्वीक्रियते लाघवात् न त्वावत्तत्र तादृशधर्मावछिन्न
प्रतिबध्यतायाश्चाप्रसिद्धेरव्याप्तिरिति नच तत्रावछेदकत्वमनतिरिक्तवृत्तित्वं तथाच नोक्ताव्याप्तिरितिवाच्यं कांचनमयवह्निमानिति ज्ञाने कांच
नमयत्वाभाववद्वृत्तित्वस्यापि साधारण्यापत्तेः तत्र कांचनमयत्वाभाववत्ताज्ञानभिन्नप्रतिबंधकतानिरूपितप्रतिबध्यतायाः कांचनमयवह्नि
प्रकारकज्ञानत्वस्यानतिरिक्तवृत्तित्वस्यादिति चेन्न तादृशसाध्यप्रकारकज्ञाने प्रतिबंधकीभूतयद्विषयत्वे सति साध्यतावछेदकावछिन्नविष
यकज्ञानाप्रतिबध्यीभूतयद्विषयत्वविशिष्टो योऽभाववत्तद्वृत्तित्वस्याधारण्यत्वात् कांचनमयत्वाभावविशिष्टवह्निविषयकज्ञानस्य कांचनम
यवह्निविषयकज्ञानप्रतिबध्यतया न दोषः एतस्याप्यनतिरिक्तवृत्तित्वरूपावछेदकताघटितज्ञानत्वावछिन्नत्वं निवेश्योक्तरीत्या निष्कर्षो बोध्यः
अथवा कांचनमयवह्न्यादिसाध्यके कांचनमयत्वाद्यतिरिक्तधर्मानवछिन्नवह्न्यादिप्रकारताशालिज्ञानत्वावछिन्ने प्रति प्रतिबंधकत्वस्यानुग
मकत्वान्न दोषः यद्वा विशिष्टसाध्यतावछेदकं निवेश्य प्रतिबध्यप्रतिबंधकभावकल्पनस्यावश्यकतया न तत्र वह्नित्वमात्रं निवेशफलं हृराक
रणात् वह्न्यभाववद्वृत्तित्वस्यैव साधारण्यत्वांगणकारान्न दोषः वस्तुतस्तु कांचनमयवह्नित्वावछिन्नप्रकारताशालि ज्ञानं जायतामित्याद्याका
रकेच्छापाउमेजनकत्वानुरोधेन कांचनमयवह्निप्रकारकज्ञानत्वादेरपि स्वरूपसंबंधरूपप्रतिबध्यतावछेदकतायाश्चावश्यमगत्यास्वीकारः त

टी०

घादिकांचनमयवह्नित्वावच्छिन्नप्रकारताशालिज्ञानं जायतामितीच्छाविरहविशिष्टवह्न्यभाववत्ताज्ञानप्रतिबध्यतावच्छेदकं तद्वह्नित्वाव
च्छिन्नप्रकारताशालिज्ञानत्वं तादृशेच्छाकालीनकस्याभाववत्ताज्ञानेन वह्नौ कांचनमयत्वमासज्यसामग्र्यभावदशायां वह्निमान्पर्वत इति प्रत्य
क्षापत्तेः न तादृशेच्छाविषयसिद्ध्यभावे न तत्र पक्षतायास्तत्र संभवादिति कांचनमयवह्नित्वावच्छिन्नप्रकारताशालिज्ञानत्वमेव तथा वाच्यमि
त्याच साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताशालिज्ञानत्वावच्छिन्नप्रतिबध्यताघटितोपदर्शितलक्षणे
नानुपपत्तिर्लेशोपीति अतिव्याप्तिरित्यनंतरं नेति पाठः तद्धः अनाहार्यग्रहः अप्रसिद्ध इति नाहार्याहार्यग्रहस्याप्रसिद्धत्वेपि तस्याप्रति ब
ध्यत्वादिति भावः न चात्र धूमाभाववद्वृत्तित्वेऽव्याप्तिरिति हृदयं तद्विषयविषयकग्रहे इति तथा च तत्र धूमाभावे केवलवह्निसामानाधिकर
ण्याभावग्रह एव तथा प्रसिद्ध इति भावः यत्तु पूर्वमेव एवंविधे वरीतिरस्त्वरं तत्र संसर्गस्य व्यभिचारत्वज्ञानादावनुसर्तव्यमभिधानेन पौनरुक्त्यापाता
दिह्यसंगतमिति नवीनैर्दूषितमुक्तावितं तदसत् तत्राहि पदेनैव सद्धेतुहेतुकत्वादावनुगतमात्रपरिष्कारमनिराकरणापेक्षितमिति पौनरुक्त्यासंभवा
त् इत्यर्थ इत्यनंतरं एकविधव्याप्तिज्ञानस्याहिरेव पाठः क्वचित्तु अतिव्याप्तिरित्यनंतरमत्र प्रमदस्याहित्याख्यमित्येतत्पाठस्तदनंतरं नान्येत्याहि पा
ठः स चाप्रामाणिकः प्रतिबंधकत्वं चेति सहकार्यभावमनियोगित्वात्मकं प्रतिबंधकत्वं चेत्यर्थः साध्याप्रसिद्ध्यादीति अत्राहितासाध्याप्रसिद्ध

रामः

390

विरोधस्यचसंग्रहः अविरोधित्वादित्यनेन ज्ञातत्वेन न प्रतिबंधकत्वमिति शेषः ननु प्रतिबंधकज्ञानायाज्ञानत्वावच्छिन्नत्वाभावेयैव सहकार्यत्वमुक्तं न
तु विवक्षितार्थकं एतेन ज्ञानत्वेन न प्रतिबंधकत्वमिति शेषः ननु प्रतिबंधकज्ञानायाज्ञानत्वावच्छिन्नत्वाभावेयैव सहकार्यत्वमुक्तं) विवक्षितमसं

गतं न घासति विरोधवारणाय सहकार्यत्वमेवेत्यावैयर्थ्यात् न हि सति सहचारे हेतुसहचारस्य हाभावाभावमयुक्तो व्याप्तिग्रहाभाव इत्येतासह

चारग्रहाभावः सहकारिस्यादित्यत्र तद्वारणायैव तत्तु याज्ञानाज्ञानत्वेन प्रतिबंधकत्वमिति वक्तुरोत तदुक्तं यद्यपि वैयभिचारग्रहस्य निरस्तत्वात्तथापि वि

रोधेऽव्यापत्तेरत आह नानाविधत्वविरहकविषयव्याप्तिज्ञान इत्यादि व्याप्तित्वं चनेवमनुगतमिति भावः॥ ॥इति महादेवरचितायां सर्वोपकारिण्यां

साधारणग्रंथः॥ ॥स्वमते चिंतामणिकारमते प्रतियोग्यसमानाधिकरणेत्यादीतिन याद्यस्वमते साध्यव्यापकीभूताभावप्रतियोगित्वरूपसाध्यवत्वाभावत्व

मेवासाधारणत्वमिति भावः साध्याभाववद्वृत्त्यादित्यनेन यत्किंचित्पक्षव्यावृत्तत्वं सूचितं प्रतियोगिन इत्यस्याधिकरणस्येति शेषः साध्याभावव्याप्य

स्येति यावत्तेन न सर्वसपक्षव्यावृत्तत्वं सूचितं न यावद्गोरस्वत्वादित्यत्रावतिव्याप्तिवारणाय विपक्षे सर्वत्र निवेश इति भावः एवं विपक्षे सत्वनिवेशे

इत्यादावपि तथाहि नायाह्योनित्यः शब्दत्वादित्यत्र निमित्तत्वसाध्यकपरिग्रहः गंधवत्वस्यैवातिप्रसक्तमुपलक्षणं रांधात्पृथ्वीस्वत्वात्पृथ्वीरूपविपक्षान्यापत्त

त्वादिप्रयोगितोध्यं भागासिद्धिरिति सुरभ्यसुरभ्यवयवावरुद्धस्य निर्गंधत्वादित्यभावः नावं भागासिद्धिसंकीर्णत्वं केचित्तु गंधवत्वं साधारणासंकी

39।

दी

रांशे दृष्टांतं तु विरुद्धसंकीर्णमित्युदाहरणाभेदमाह ननु यद्यपि वीरसादिस्वत्ररसे तद्रूपवत्त्वेन निश्चितानां ज्ञलाद्याभासत्वलाभेऽनुमितिप्रतिबंधात्तत्स्थले हेत्वा॰
व्याप्तिस्तत्र वस्तुगत्या ज्ञलव्याप्यत्वस्य सत्त्वादित्यत आह हृदीत्यादि नोपाधिविशिष्टीनि व्याख्यायोऽग्नमरावे मातिरव्यकारेणावस्तुगत्या साध्याभावप्रवच्छेदक॰
मेवाहमलइतिनयावत्स्यालक्षणत्वादेवनाव्याप्तिरितिभावः सिद्धमावृत्तिमिसाध्यपिपासाविरहविशिष्टसिद्ध्यभावेऽस्यापर्थः एवमन्येपिसाध्याभा
वमिश्च्यसाध्यवद्भावविनिश्चये सिद्ध्यभावसत्त्वादितिमिसाधयिषासंभवेनविशिष्टाभावसत्त्वादित्यर्थः तदुक्तिप्रेक्षपः सपक्षव्याप्तिमात्रस्यदोषत्व
मतिक्षेपः नयावमलेसपक्षव्याप्तिमात्रस्यदोषसादित्वसंगतमित्यापतेरितिभावः दूषणताऽभावात् अनुसाध्यानुमितिबंधकत्वदुविषयत्वाभा
वात्केशधिनोर्दूषणतासमसाधितिसपक्षव्याप्तत्वस्यापिदोषः तथाचाभासत्वाभावात्तेषांपक्षसंभवइतिभावः एवं दृष्टांततयादृष्टांतेसाधनवैव्या
ख्याया तत्रव्याप्तिग्रहेः विरोधित्वात् साध्यादुरोधित्वसंभवात् सहचारग्रहेतिव्याप्तिघटकसामानाधिकरण्यग्रहेत्यर्थः ननु तत्र दुर्मतिभविनेसामाना
धिकरण्यग्रहप्रतिनिश्चित्साध्यवत्तदुर्मिव्याप्तत्वस्यविरोधितयादोषत्वं सुघटमेवेत्यत आह दोधितावन्यथेति सनोः समीचीनयोः समानाधिक
रणायोर्वासाध्यसाधनयोरित्यस्थलइति शेषः व्यतिरेकित्वंपक्षेविघ्नाधात्तत्वमित्यर्थः दोषापत्त्यादितिव्याचष्टे व्याख्यायां वह्निमानितमादि
अन्तः व्याप्तिनिरूपकत्वेनसाध्यलाभापसाध्योपादानात्तव्यभावस्यासाध्यत्वेनतदीपव्यावृत्तत्वस्यसाध्यव्यतिरेकानात्मकत्वेनव्यतिरेकि

त्वमित्यस्यासंगतिः। किंचउक्तरीत्यैव साध्योपाधानसाधर्म्यकोटित्रिकव्याप्तिपर्यन्तानुसरणं निष्प्रयोजनमित्यस्वरसादुक्तेकोटित्रितिनिराकर्तुमि
तिनवनत्वाभिप्रायाहएवमित्यादिनाम्लेनेननिराकृतमेवेतिवाच्यं कारणाविघटकतयादोषत्वंसंभवेसंशायकत्वेनदोषत्वस्यकल्पनगौरवादिति
पक्षेनिरस्तंतंतन्नयुक्तंसंशायकत्वस्यापिलक्षणत्वादित्याशयात् नद्दूहस्यसव्यभिचारहेतोर्ग्रहस्य एवंसव्यभिचारत्वद्दुलोपदृष्ट्वंनस्थित्वस्यादिशेष
णत्वे। द्वितीयौसाधारणाधर्मवित्त्वेतिसाधारणादिधर्मवत्त्वमित्यर्थः। आदिनाऽसाधारणाधर्मवत्त्वापरिग्रहः। व्याख्यायाः पक्षवादिनेतियोयः साधु
त्वयासतित्यन्तवान् यथावह्न्यादिरितिदुहाहरणाघटितन्यायप्रयोगस्यलक्षणपर्यन्तदुपन्यस्तेनिसाधुत्यन्तमित्यर्थः। साधनवैकल्यंनदुष्टावनं
असाधारण्यं तद्दुष्टावने नचदृष्टान्तस्यसाधनवैकल्योद्भावनेनोक्तासाधारण्योद्भावनमितिवाच्यं। निश्चितसाध्यवत्त्वंकल्पोद्भावनेनिरुक्तासाधार
ण्योद्भावनस्यावश्यकत्वात्। द्वितीयेविकल्पोद्भावनत्वेनिमहत्त्वेऽद्भावनस्यैवतिथैवात्वात्वद्भावनपर्यन्तमुक्तं। नासाधारण्यं नासाधारण्योद्भावने
सपक्षांतरदृष्टिंत्वस्यपीतिहेतोरित्यादिः। अनुपन्यस्तनिश्चितसाध्यवद्वृत्तित्वस्यैवपीत्यर्थः तत्संभवात्तदुपन्यस्तनिश्चितसाध्यवद्वृत्तित्वसंभ
वान् व्याख्यापोयावत्सपक्षेनिहेतोरनुपन्यस्तनिश्चितसाध्यवद्वृत्तित्वसंभवेपि अनुपन्यस्तनत्वेवेंवा अनुपन्यस्तदृष्टान्तस्यसाधनवैकल्योद्भावन
कापिनस्यादन्यथादृष्टान्धिनाबुद्भावनं। शिमितभ्रमवैकल्योद्भावनंत्वित्यपीः। तस्यदृष्टान्तसाधनवैकल्यस्य। ननुपतितान्यान्यादिह्यविंशति

११३

टी॰

भिन्नस्य न स्वतन्त्रस्य निग्रहस्यानत्वं निग्रहस्यानधिभाजकस्य तेन स्वापरिग्रहानादिति आह द्विभाजकस्य तस्येति तस्यैवं समतिहाहानिरिसादिकं ननु
हेत्वाभासा पञ्च यथोक्ता इति तस्य न्यूनत्वं तत्सूत्रत्वेन विभाजकत्वाभावादिति उपाधिवादे सव्यभिचारत्वान्तर्गतत्वेन नात्र पृथक् उक्तिः अपि तु पञ्च हेत्वाभासा
पञ्च यथोक्ता इति सूत्रपरतया व्याख्याने न तु पेङ्गलं मतमेवोपाधिवादे सम्मतिहाहानिरिति सूत्रस्य च विभाजकसूत्रत्वेनोक्तनयापूर्वापरविरोधात् ननु
तस्य न्यूनत्वं निग्रहस्थानानां तन्मते संभवेत्स्वातन्त्र्ये तान्नव कल्पनमनुचितं सूत्रस्य व्यञ्जकारस्योक्तस मुच्चायकत्वेनाप्युपपत्तेरित्याशयेनाह न्यूनादू
रास्येति आभासनामद्वयमिति यथा वेति उदाहरणमनुक्तस्य निपूर्वानुषङ्गेण आन्वयः आदेशायामपार्थकमिति अत्रेदं बोध्यं पौर्वापर्ययोगादप्रति
संबद्धार्थमपार्थकमिति लक्षणस्य असंबद्धार्थमिति लक्षणं अभिमतार्थसंबन्धबोधोपयिकधर्मरहितं वाक्यमित्यर्थः पौर्वापर्यायोगा
दिति विभागः पौर्वापर्यमन्वयबोधोपयिकानुपूर्वी तेनाकाङ्क्षासत्तियोग्यताभिः परिगोपगताः मन्त्रं प्रत्यस्य त्रिधा नयः तेनाकाङ्क्षाभाववद्वाक्यत्वादिनात्रे
विध्यमुपरक्षितं भवति अन्तरवाक्यार्थकं द्वैधा पदापार्थकं वाक्यापार्थकं च तत्रापि प्रत्येकं त्रिधा अनाकाङ्क्षितत्वासत्तिमत्त्वादेयोग्यत्वान्तत्पदापा
र्थकं यथा गोरश्वपुरुषहस्तिनमिति गच्छति पाप समस्तेन भुक्तो जीवन्दैरनुहरदिति वाक्यापार्थकं यथा दश दाडिमानि षडपूपा इति चैत्रेण गौरश्वि
मानानुक्तमिति अग्निरयं समहं स्तेन सिद्धे इति भास्कराद्दिनिर्दिष्टसूत्रेविहितं पौर्वापर्यवान्मा न सधर्मवाक्यायोगोल्लक्षमिति वाक्यमपि वाक्यापा राम॰

पार्थक्यं त्वपि पर्वतमित्यादिवद्धस्यैकवाक्यतापामयोग्यत्वात् यत्र छ्छूघटितवाक्याभ्यां विधेयतया निर्दिष्टयोर्वह्निमत्त्वतद्व्यापकधूमवत्त्वयोर्व्या
पदेन परामर्शानिवह्निमत्त्वांशे योग्यत्वेपि धूमवत्त्वांशे तस्यायोग्यत्वादिति तेन बाधितार्थकत्वमपार्थकत्वमिति केचित् युक्तिरक्तता मूलि 395
कापरास्ता उदाहरणत्वात् घटकत्वादिति दृष्टांतप्रयोगस्य समयबंधाधीनत्वादिति भावः कथमिति न पात्रं दृष्टांतमुत्स्योदाहरणप्रयोगस्यापि सा
धुनयातत्रन्यूनत्वापार्थकत्वयोरभावादसाधारण्यमेवतत्रदोष इति भावः उदाहरणापारीरमेवेतितथा च न त्रापि न्यूनत्वादिकमेव दोष इत्यादि साध्य
यः साध्यतदभावरूपनित्यत्वतदभावेति शब्दोऽनित्यः शब्दत्वादित्याद्यसमर्थस्यैव नित्यत्वस्य साध्यत्वमित्याशयः कश्चित्साधिमतं नेति
स्वेनेनं तरं शब्दो नित्य इत्यादि निर्दिष्टशब्दः अंतः कंकरणे पाठः आश्रयस्य पक्षस्येतित्वावताऽदृशसंख्यायाभावदृष्टायामिस्तनुपपत्ते शब्दाभा
वग्रहो हि न शब्दत्वेन शब्दत्ववत्तां विनानन्तानंवयाद्यव्यक्तिस्य शब्दत्वाश्रितत्वघटितेन तथाह्यशब्दभानं नियतमित्यनुपपत्तेनैयायिकत्वाश्रये उपस्थितम
योर्नित्यत्वानित्यत्वयोः संवादस्यावश्यकत्वादिति भावः सौरभादिरिति वं दृष्टान्तिकमाश्रयत्वेनाप्रतीत्यैव वाच्यानीतत्तत्संयोगरहितस्य सौरभा
दोरित्यर्थः उभयेति पृथिवीत्वतदभावोभयेत्यर्थः उपपादितं चैतत् नादौ सौरभस्याभावेनास्यावच्छेदे पृथिवीत्वाभावसंदेहकालेपि पृथिवीत्वा
भावादौ सौरभाभावाभाववत्त्वसंदेहासंभवेन घतितं च धकाभावादुपपादनमित्याशयः होधितौ परामर्षे पृथिवीत्वादावितित्र व्याकारमत्र

टी०

वान्यापृथिवीत्वाभावादौ विमर्षः तेनवंहनं पृथिवीत्वाभाववत्सौरभादित्याहेत्वाभासः यथा भूते पृथिवीत्वादि साध्यत्वे स्वमते सद्धेतुत्वेनासंग
तेः व्याख्यायां असाधारणोपाधेः असाधारण्यदूषणोपयिकरूपस्य असंभवइति दूषणोपयिकरूपावैलक्षण्यादिति शेषः न तु साधार
णत्वं असाधारणसाधारणत्वं अनुचितमिति दूषणान्वयीत्वाभावादिति शेषः तथा चासाधारणस्य हेत्वाभासत्वमेव न स्यादित्याशयः एतेनासाधारणो
पाधेरित्यादिग्रंथस्याभिप्रायो विरुद्धविशेषयोरेव विभाजकोपाधित्वस्य सांप्रदायिकत्वात् साधारणस्यापि विभाजकोपाधित्वासंभवः सर्वकत्वम
वतो हेत्वाभासत्वनियतरूपानन्वयोरविरुद्धयोरपि परस्परविभाजकोपाधित्वासंप्रदायासिद्धत्वादनेयराद्धं निरस्तमुन्नीतमिति निष्कृष्टार्थस्तत्स्वा
विरोधित्वादसाधारणस्य पूर्वोक्तरीत्या हेत्वाभासत्वानुपपत्तेश्चेतिभावः एवं असाधारणस्य साध्यव्यापकीभूताभावप्रतियोगित्वरूपत्वे
विरुद्धत्वमपीति साध्याभावव्यतिरेकव्याप्यत्वस्य साध्यव्यापकीभूताभावप्रतियोगित्वरूपत्वादिति भावः हेतोश्चेत् साध्यासामानाधिकरण्यादि
ति आदिना साध्यव्यापकीभूताभावप्रतियोगित्वपरिग्रहः व्यतिरेकव्याप्तौ साध्यसामानाधिकरण्यप्रवेशात् तद्ग्रहप्रतिबंधकत्वासंभवादाहात्रेय
ति साध्यव्यापकीभूताभावप्रतियोगित्वरूपविरोधस्यापि मतिमंद्यादित्याये न साध्यसामानाधिकरण्यग्रहप्रतिबंधकतया स्वव्याप्तिग्रहविरोधि
त्वमिति भावः न सो कर्यशंकापोत्यस्यभावमाहव्याख्यायां अत्रेति असाधारणमश्वपर्यः तेनाविरोधेन क्वापि तत्र पक्षे हेतुनिश्चयेशाभावात्तेनासं

साम०

396

114

करइति पाठः स तत्र तच्छब्दद्वयं विरोधपरं साध्यव्यतिरेकव्याप्तिग्रहप्रतिबंधकतया साधारण्यस्य दूषकत्ववादिमिश्रमतमाह दीधितौ नवीनास्त्वि
त्याद्याभ्यां विरोधमेवेति साध्यतदभावव्यापकतान्यतरविरोधमेवेत्यर्थः हेतुमति साध्यतदभावान्यतरवद्धेतुमतिवृत्तित्वाभावे नित्यं तद्व्यापकत्वस
त्वेनान्यतरव्यापकत्वमिति मस्यान्यतरव्यापकताग्रहाभाव इत्यर्थ इत्याशयेनाह तथा चेत्यादि तयोरन्यतरसत्त्वस्येति योजना तयोः साध्यतदभा
वयोः प्रतिबंधकत्वमिति हेत्वभावे साध्यतदभावव्यापकताग्रहस्येत्यादि स्वतादवद्धेतुमति साध्यतदभावयोरन्यतरसत्त्वनिश्चयस्य हेत्वधिकर
णे तयोरन्यतरसत्त्वनिश्चयेन व्यापकतया हेत्वभावे ग्रहासंभवादिति भावः दीधितौ तस्येति हेत्वभावस्येत्यर्थः एवंविधविरोधश्चोभये साध्यतदभा
वव्यापकताग्रहविरोधश्चेति तौ सहचारज्ञानमिति असाधारण्यज्ञानात्मकमिति शेषः ग्राह्य प्रतीतिमिश्रमते सहचारज्ञानस्य व्यापकताग्रहहेतु
त्वमित्याशयः विरोधात् प्रतिबंधकत्वात् व्याख्यायां तदभावस्येति गगनाद्यभावस्येत्यर्थः तदुभयेति साध्यतदभावोभयेत्यर्थः सहभावलाभः स
हचारलाभः तल्लाभे हेत्वभावत्वविशिष्टव्यापकताग्रहे हेत्वभावविशिष्टे सहचारज्ञानस्यैव हेतुतया यावत्सपक्षादिव्यावृत्तत्वरूपासाधारण्य
ज्ञानस्य तादृशोभयसहचारज्ञानात्मकत्वलाभे नोक्तप्रयोर्विरोधासंभवादिति भावः विनिगमकाभावात् विनिगमकाभावेन हेत्वभावस्य यावत्स
पक्षादिवृत्तित्वस्याप्यसाधारण्यात् तत्साध्य हेत्वभावस्य यावत्सपक्षादिवृत्तिस्वरूपमसाधारण्यमाह मतांतरमाह यावदित्यादि असाधारण्यं

397

दी.

115

ताहृशविशेषत्वेनासाधारणत्वं गगनस्यकेनापिरूपेणासाधारणपमित्यभ्युपगमेनोक्तरीतिसंभवतीत्यस्वरसादाहकेचिदिति नन्वेवंसाध्यव
त्तस्तद्भाववत्तस्तुभ्यामस्तत्वेनज्ञानमित्यादिमूलेग्रन्थविरोधः तेनरूपेणासाधारणस्य सत्वमितिपदेनपादेयत्वाभिधानादनस्तदुद्यमपिस्वानुकू
लतयाव्याचष्टे दीधितौयोजयंतिचेतितंयं साध्यवतस्त्यादिमूलग्रंथं· व्याख्यायां ज्ञानयोगपत्वज्ञानस्यज्ञानविषयत्वज्ञानस्यविरोधानुपपादक
त्वात् उभयसाहचर्यरूपतयाख्यातयोभयसाधकत्वापादकत्वाभावात्स्मममाज्ञयोभयात्वादितिस्वरूपतज्ञानाद्यज्ञानविषयत्वस्यैवविरोधोपपाद
कत्वाभावात्स्मममा दितिभावः वस्तुतस्तुज्ञानयोगपद्यज्ञानस्यज्ञानविषयत्वज्ञानस्यज्ञायमानज्ञानविषयत्वस्येतियावत् · विरोधानुपपादकत्वा
त् उभयसाहचर्यरूपतयाख्यातयोभयसाधकत्वापादकत्वाभावात्स्मममाज्ञयोभयासहचरितसाधारण्यादितिभावः ज्ञानयोगपद्यस्येतिपा
ठे सम्यगेवेतिसारं साध्यव्यापकीभूतेतिसाध्यतदभावोभयव्यापकीभूतेत्यर्थः उभयसाहचर्यात्मकोभयसाधकत्वे व्यतिरेकेऽनुमानत्वात्मकव्यति
रेकित्वस्याप्रयोजकत्वादाह दीधितौ व्यतिरेकिविषयेतितादृशेति साध्यतदभावोभयमेलमेलत्यर्थः साधनस्याविभिन्नाधिकरणमनुभयसाहचर्यसत्यभावा
दाह यस इति परेणामेतत्तत्पक्षेनउभयसाहचर्याप्रसिद्धिरितिवाच्यं। पक्षस्यस्यपक्षावच्छेदेतेनत्वार्थकत्वात् व्याख्यापो अनुपपन्नत्वादिति स्ममेत्वो
भयसाधकत्वस्यैवत्वादितिभावः दीधितौ व्यापकाभाववतीत्यादि हेतुमात्ररूपव्यापकाभावस्यहेतोरधिकरणेऽप्राप्याभावस्यसाध्यतदभावो

रामः

398

भयस्यस्यसत्त्वेतिप्रमात्मिर्व्यर्थः मूलीयान्ययेनितिघिन्नानोनिअतयेति व्याख्यायांनतुभयेतिहेतोःपक्षइत्यादिः न्यूननांपादिहेतुपरयतिरिधितौ
व्याप्तेर्वेति व्याख्यायांव्यतिरेकदतिहेत्वभावस्यार्थः। यथाश्रुतेमूलेसाध्यमीढ यावि रोधस्यालाभादाहदीधितौनतुभयेपि विषयतयेतिपूर्वेगायोज
ताभ्रमतिरासापाद्व्याख्यायांव्याप्तिग्रहेतिराजम्मतेःसाध्याल्पस्यपक्षवृत्तित्वाघटितत्तयास्महानियस्यामेदर्शकादिविरहेणानकंकृपासत्प्रतिप
क्षइत्यादिमूलेनाव्यतरनीतिनिदम्यावनारयति दीधितौनान्वितिविरोधीतिसाध्यतदभावेसर्वः नगद्यतदमित्याहकसामान्येतियाविरोधेनएक
हेत्वादिः सत्प्रतिपक्षोच्छेदः विरोध्यनुमितिसामाम्या अनुमितिप्रतिवंधकत्वोच्छेदः व्याख्यायांसमुत्थत्वान् अधीनत्वात्तयाचग्रहानेत्यादिसमु
त्थितत्वादित्यस्यारेतुद्वयधर्मिकसाध्यतदभावः व्याप्तिग्रहाधीनत्वादित्यर्थः फलितः सत्प्रतिपक्षस्यविरोध्यनुमितिसामग्र्या अनुमितिप्रतिवंधक
त्वस्यदीधितौतत्रसत्प्रतिपक्षेनयाग्रहः साध्यतदभावव्याप्तिग्रहः अत्रासाधारणोनतुभयेतिसाध्यतदभावव्यापकोभावप्रतियोगित्वग्रहइत्यर्थः
मिथ्याप्रमतेदूषयति अत्रेदमितिव्याख्यायांसाध्याहीति आदिनासाध्याभावपरिग्रहः नन्वहितिसहचारग्रहाविषयेत्यर्थः अनुमितीति अनुमितित
त्कारणान्तरेत्यर्थः तथात्वेन अप्रामाण्यविरोधित्वेन व्यभिचारतानकालीनं अधिकरणान्तरेव्यभिचारज्ञानाभावकालीनंहप्तिमन्वादौनीतिरहमुपल
क्षणांवक्ष्मानूधमादिमादौधूमाभावस्य अयोगोलकमहानसेषुनपाःतिप्रसंगोपिवोध्यः तेन अनुकूलतर्केतात्व्यभिचारज्ञानाभावात्तव्यभिचारशं

कानिरासात् नन्वेति सामान्येन पुंसकं तर्कस्य व्याप्तिग्राहकत्वं नेत्यर्थः उभयत्रेति थेदः नचाविनारोपितरूपकहिरूपवत्तकस्मिन्नारोपितादृशसामग्रीत्व
मुपपादयति अग्रे इति तत्र बाधावतारदशायां प्रति हेतुपरामर्शे या महत्ता नानुमितिप्रतिबंधः ननु सत्प्रतिपक्षस्थले विरोधिपरामर्शत्वेन विरोधित्वे व्या
प्तिसाधनभेदेन विरोधिताबाहुल्यापत्तिरतो विरोधिसामग्रीत्वेनैव विरोधित्वमुचितं विरोधिसामग्रीत्वं च महत्तत्पक्षविशेष्यकसाध्याभाववत्ताज्ञानाय
वहित्प्रसवविशिष्टज्ञानत्वं न वा सचक्षित तत्प्रर्वव्रिबिनानुगतं संभवतीति वाच्यं स्वव्याप्तिप्रसमप्रतियोगित्वसामानाधिकरण्योभयसंबंधेन तादृशज्ञानवत्त्व
रूपस्यानुगतत्वादित्यत आह दोषेति अप्रतिबंधकताविति सजेपञ्चवितेनेति सत्प्रतिपक्षस्थले परस्परप्रतिबंधेन साध्यतदभावयोरुभयोरेवानुमित्यनुत्पत्तावि
रोधिपरामर्शस्य तादृशज्ञानवत्त्वस्य विरोधित्वं न संभवति ठक्कुरीयासाधसंस्थापनस्यापि त्रातुल्यत्वात मात्राया पितन्न संभवतीत्याशयः इति दिक् ॥ ॥
इति महादेवरचितायां सव्यभिचारोपकानं दीव्याख्यायामसाधारण्यं च ॥ ॥ हेतुविध्यैनवेन केवलान्वयिनव्यतिरेकिणव्यैः प्रकारभेदवनसहे
तुत्वसाधारणत्वरूपलोकप्रकारभेदस्य वन्नसंभवात् प्रकारभेदसंभवात् न्यूनतेतित्वस्याप्य इतरयानुव्यतिरेकि साध्यकत्वं चेत अन्यतन साधा
रणत्वं केवलान्वयीति तन्न साधारण्यविरुद्धत्वयोरसंभवादितिभावः अन्वयानुव्यतिरेकि साध्यकत्वे तु साधारणत्वाहीनेत्यादिनाविरुद्धत्वपरि
ग्रहः ननु सर्वं विसृमद्धमादिमाद्वेस्साधारणाविरुद्धत्वासंकीर्णभागासिद्धत्वसंभवेपि सर्वं धूमवद्गगनाभावाद्दिमादिर्भागासिद्धविरुद्धत्वासंकी

रणसाधारणत्वसंभवेपि चभागासिद्धिसाधारण्यान्वासंकीर्णत्वविरहत्वस्य तत्तुर्लभं सर्वे गोरस्य त्वादिम्यादेर्भागासिद्धत्वात् सर्वे गोर्गगनादिमत्वादेस्वरू
पासिद्धत्वेनाविरुद्धत्वात् आह अत्रेति प्रयत्नसाध्यमित्यत्र वृत्तिहेतोर्विरुद्धमेकमन्यसिद्धत्वं विरोधाप्यपरामर्शविरोधेरपवत्तत्वादसिद्धत्वादिति
मनोऽन्यपरो सर्वे वद्भिमद्गगनादिमत्वादेरेव भागासिद्धिसाधारण्यान्वासंकीर्णत्वविरहत्वसंभवादिन्ताशयः अनुपसंहारित्वाच्च नस्य ष्टमात्मायेष अ
नुपसंहारित्वस्य व्यापनादिति नियतत्वैव · केवलान्वयिसाध्यकानुपसंहारित्वरोपण · अव्याप्तिराशंक्यते अव्याप्याप्यहं लक्ष्यतावच्छेदकपि ष्यते · संदेहे
नि साध्याभावप्रसिद्ध्या तत्कोटिकसंदेहाप्रसिद्धेरित्यर्थः सुलभत्वादिति स्वंडुपाः प्रसिद्धेः साध्ये पक्षनिष्ठात्यन्ताभावप्रतियोगीत्वसंदेहप्रसिद्धेरितिभावः
नत्येवं अप्रसिद्धेवानि व्याप्तिवारस्तो · वैयर्थ्यं सत्त्वेनवैयर्थ्यः संशयेति सर्वस्मिन्साध्यसंशयेत्यर्थः · असौ कथमित्यादानिश्चयघटितसाधारण्य
घभावघटितभावः प्रकारान्तरमपि साधारण्यं देतिच्छ्रुयाघटितत्वइत्यादि · एवं इहानीं सर्वमभिधेयं प्रमेयत्वादिर्त्वादेरनुपसंहारित्वोपगमेनाप्य
प्यभिधाने · सद्धेतुलादीति सद्धेतुत्वोपगमेनाप्युर्वमलक्ष्यत्वांमिधानमित्यर्थः · मतं · पर्वाभिधानं · मूले पदिचेति शङ्कोऽनिमः · पावृत्वादित्यादे
यदि पदे व्याभिचारसहास सद्धेतुत्वमेवेत्यर्थः पारलापांताद्वेति ग्राह्योऽनित्यत्वस्यादित्यर्थः · अनुपसंहारीतितत्र पक्ष्मातिरिक्तेव्याभिचारानु
लसहचाराप्रतीतेरिति भावः · असंगतमितिलक्ष्यतामित्याप्तेरव्याप्त्यादिति भावः तथाचेतीतितया तादात्म्येन सहचारकत्वमनुपसंहारि

९८

टी.

त्वं न तत्रेति भावः एवं च तृतीयपक्षातिरिक्तत्वाप्रवेशो दूषणाहूयेति पक्षेऽपि द्रष्टव्यमिति सद्धेतावतिव्याप्त्यभिधानं सर्वमनित्यं प्रमेयत्वादित्यादौ
पक्षातिरिक्ताप्रसिद्ध्याऽव्याप्त्यभिधानं चेति दूषणाहूय इत्यर्थः असंगतमिति पक्षातिरिक्तत्वस्याप्रवेशादिति भावः ननु पक्षतावच्छेदकाभावमित्यन
र्थकं पक्षत्वाभाव इत्यस्यापि पक्षातिरिक्तत्वपरित्यक्तत्वात् स्वाभिव्याप्तिसंभवादत आह पक्षातिरिक्तपदस्येव पक्षत्वाभावपदेऽपि अप्रवे
शाय हेऽपि इत्यादिग्रन्थेन मिथ्यादित्वाद्धारस्यैव विरुद्धोदाहरणं इत्यादौ चेति चकारश्च समव पाठः व्याख्यायां उत्पत्तिकालइति ध्वंसप्रागभावयोर
त्यन्ताभावेन सहाविरोधादिति भावः इत्येव वाक्येति तत्स्यैव सिद्धं तत्र हेतावनया नेदानीमित्याप्तिसंभवतीति भावः ननु दूषकत्वानुपपत्तिः स्वस्य
घटितानुपसंहारित्वस्याप्रतिबंधकत्वेऽप्युतैकान्तिकत्वरूपदोषवत्त्वेनानुपसंहारिणोऽपि दुष्टत्वमित्याशंकते मेलने चेति दूषकतायामित्यस्या
साधकतासाधकतापरत्वेऽदृष्टत्वमित्यस्वरसादाह इति ग्रन्थेनोक्तेरिति व्याख्यायां केवलान्वयीतीति केवलान्वयिसाध्यकेनित्यर्थः व्याप्त्या
दितिसर्वमनित्यमित्यादि व्यतिरेकिसाध्यके पक्षाप्रसक्तादिति भावः ननु सर्वस्य पक्षत्वेऽपि विप्रतिपत्तिविषयत्वाभावेन मात्रान्याभावइ
तिसर्वस्य पक्षत्वेऽपि मूलमसंगतमत आह इत्थं चेति कथंचिदिति निकषे चिहितस्यामवाक्यादिनेत्यर्थः ॥ ॥ सहचारनियमइतिसह
चारस्यैवोपसंहारत्वेऽनुपसंहारित्वस्य तत्सहचारसंस्कारसंभवापत्तेरित्याशयः व्यतिरेकित्वादिपृथिवीतरभेदसाध्यकपृथिवीत्वादिस्था

द्रेः साध्याभावादेस्तिथ्यादिनाहेत्वभावपरिग्रहः सत्वादिवेति सहचारनिर्णयस्येत्यादिहेतावित्तिशेषः एवकारेण भिन्नक्रमेणेतेन साध्याभावादि
च्छेदवत्त्वादिति पर्यवसितं सत्वं विषयतया बोध्यं आह यत्सत्त्वे यत्रेति सप्तमीमाह षष्ठ्यर्थसंबंधस्य व्याप्तिग्रहान्वयीत्वाद्यनाह तथा च मा
दिः ननु षष्ठ्यर्थसंबंधो यः कश्चन चेन्नैहोदासीनव्याप्तिग्रहस्यापि तद्दीयत्वेन तदनुकूलसहचारनिर्णयाभावासत्त्वादव्याप्तेः स्वविषयत्वसंबंधेन तद्दे
श्यातिव्याप्तिनादेवस्यामत आह व्याप्तिग्रहस्येति तद्दीयत्वं च तत्संबंधस्य तद्धेतुकेति तथा च स्वलिंगकसंभवत्साध्यानुमितिजनकत्वमेव तत्संब
धइति भावः आह फलांतररहितेनेति तथा च तत्प्रयोजकत्वफलतयास फलेन हेत्वभिमतपदेन तल्लाभ्यत इत्याशयेनाह इत्यादाविति विरुद्धइति शेषः
द्विष्णावि शेषेतिय स्य माशेषः पर्यः गतत्वादितिलक्षणासत्यादिस्वर्थः नचैतच्चान्वयव्यतिरेकसहचारस्य प्रतियोगप्रसिद्धान्दमभावाप्रसिद्धा
कथं लक्षणासत्वमिति वाच्य सिद्धासिद्धिव्याघातवारणाय व्याप्तिग्रहानुकूलत्वाभाववत्सहचारकत्वस्य वाच्यतया लक्षणासत्वात् एवमि
त्यादावसाधारण्याद्यप्रतिसंधानेऽनुपसंहारित्वं इत्यापत्तेराह असाधारणत्वेऽभीमानितारूपोपामिति असाधारण्येऽनौरत्यादित्वादिस्वरूपो
असाधारणप्रतिसंधानदशायां इदमनुपलक्षणं विरोधप्रतिसंधानदशायामपेत्य पिदृष्टं य पापम्रुते साधारण्याभावदशायामेवमाह
दृश्यत्वाद्यप्रयाप्रनासंगतेः पंचम्यर्थः निस्सरत्वादाविवासाधारण्यादशायामनुपसंहारित्वस्य वेल्लादाह असाधारण्यादिवंदयपया

॥ ४

ग्रुतमेव सम्यक् वस्तुतस्तु अनयत्तोऽतिरिक्तोवासव्यभिचारस्य प्रमहस्थायांनास्यानुपसंहारित्वमितितद्व्याख्यायामनित्यव्याप्तिर्द्वव्यासैवर्त्याऽसाधारणेसा
दिनोजेतिसारं केवलान्वयिसाध्यकेतिपरोऽभिधेयं प्रमेयत्वादित्यादौसर्वे दीधितौसाध्यनिश्चयविरोधिनैरतिदूरंचग्राह्यसंशयस्यविरोधित्वमनुपे
त्यतदनभ्युपगमेतुग्राह्यनिश्चयोविरोधीयस्येतिमुख्यात्पाठः तन्निश्चयप्रतिबध्यस्येत्यर्थः एवमग्रेऽपि व्याख्याय पाठक्रमे स्वरूपसंबंधरूपावच्छेद
कत्वनिवेशो संदेहे संदेह इत्यत्रायां संदेहविषयतेतिनतथावच्छेदकतान्वयिधर्मव्यापकता इत्यसंदेहविषयतावत्वमिति यदीधितिं दीधितौव्याप्य
ग्रहेराव्याप्यनिश्चयेन सहचारनिश्चयाभावादितिभावः नचैवमपिनिर्धर्मितावच्छेदकसाध्यादिनिश्चयेबाधकाभावइतिवाच्यंसमानविषयत्वे
नविरोधित्वाश्रयणात् आभासत्वं अनुपसंहारित्वस्यहेत्वाभासत्वं एतेनेत्यादिग्रन्थिममूलमेयेन पौनरुक्त्यमित्यपास्तामितिग्रन्थोऽतिव्याख्यायां वहिर्भाव
मितिअनुपसंहारिण्यसेति शेषः हेत्वाभासांतरात् व्याप्यत्वासिद्धेः उपजीव्यत्वाभावादिति व्याप्यनिश्चय एव तस्योपजीव्यत्वादितिभावः अथवा
वपरत्वे व्याप्यभावपरत्वे व्याप्यत्वाभावमिति व्याप्यत्वनिश्चयतानइत्यर्थः व्याप्तिग्रहः व्याप्तिनिश्चयः इत्येवंरूपे इत्येवंरूपताप्रतीते अत्रानुपसंहा
रित्वस्य उक्तरूपताया उपजीव्यत्वेनदूषयत्व्याप्यनिश्चयोपजीव्यत्वं व्याप्यनिश्चयोपजीव्यत्वमपि तत्प्रयोजकसहचारनिश्चयाभावप्रयोजकत्वमपि
तिध्येयं अन्तर्भावमितिअनुपसंहारित्वस्यव्याहेत्व प्रहेत्वाभासांतरेव्याप्यत्वासिद्धेरित्यत्र दीधितौकेवलेतिसर्वं माभिधेयंप्रमेयत्वादित्यादावनुपसं हारः

404

हारित्यादीत्यर्थः व्याख्यायां सद्धेतौ सर्व्वं वह्निमद्धूमादित्याद्यनुपसंहारिणि · द्वितीयो व्यतिरेकिसाध्यके त्विति सर्वं प्रमेयवद्धूमादित्यादौ सद्धेतावनु
पसंहारिणीत्यर्थः संदिग्धेति तथा च साधारणत्वान्नैकान्तिकत्वमिति भावः व्याख्यायां तस्य संशयस्य व्याप्तिग्रहाभावेति व्याप्तिनिश्चयाभावेत्यर्थः एवम
ग्रेपि संशयसामग्रीत्वेनेति व्याप्तिसंशयसामग्रीत्वेनेत्यर्थः सन्दिग्धेति नादृशसंशयस्येवेति शेषः तथा च व्याप्तिनिश्चयप्रतिबंधकत्वं प्रसि
द्धमिति व्याप्यनिश्चयस्य व्याप्यत्वासिद्धत्वमित्यर्थः संदेहस्य तादृशसंदेहस्य तथात्वं व्यभिचारवद्धेत्वाभासत्वेन मिश्रमतं अत्रेदं चिन्त्यमिति मिश्राभिमतं पक्षे
न च मद्व्याहितो नोक्तं मिश्रसमाधानं आशंकते द्वयेपि तु मुपन्यस्यति अनुकूलांतेनापीति अपिना निश्चयत्वावच्छिन्नत्वस्य समुच्चयः तथा च
णां विरोधकारणां एवं अनुकूलांते नैव विरोधकारणता तादृशेति अनुकूलो तर्कस्तत्त्वे पीत्यादि संदेहेति साध्यसंदेहेत्यर्थः इत्याशयेनाह द्वितीयो
नादृशोक्तं निश्चयत्वावच्छिन्नविरोधिः नादृशेति केवलाच्चपीत्यर्थः अवच्छिन्नः व्यापकः तेन द्रव्यत्वादिप्रमेयरूपेण साध्यसंशयदशायां ना
व्याप्तिः संदिग्धसाध्यकं इति संदिग्धं साध्यं यत्रेति विग्रहः सम्प्रत्ययोपि विषयतासंदेहावधी · तथा च साध्यसंदेहविषयस्येत्यर्थः तादृशसंदेहवि
षयत्वविशिष्टत्वाभावाप्रयत्नं वक्ष्यति धर्ममाहाप्यम इति अत्रापि [illegible] पक्षे व्यापकत्वं सविशेषणो हेतुरिति न्यायेन संदेहे व्यापकत्वपर्यवसन्नमि
त्याशयेनवेदलेत्यादि [illegible] अर्थमाह तथा चेत्यादि व्याख्याया मवच्छिन्न व्यापकः व्यापकत्वं च विषयतया · अत्र विषयतानायावादृश्यं

टी. ११९

वैशेषिकोक्तमिति केवलान्वयिधर्मव्यापकत्वसंदेहविषयतायामेव विवक्षितमित्याशयेन तत्प्रयोजनमाह दीधितौ व्यतिरेकादाविति आदिना साधा-
रणपरिग्रहः नचपर्वतो वह्निमान् धूमादित्यादावेकव्यावृत्तिसंभवेऽव्याप्तिरव्याप्यनुधावनवैयर्थ्यमिति वाच्यं तादृशसंशयविषयमात्रवृत्तित्वनि-
वेशेनापि तद्वारणसंभवात् साध्येतिस्वव्यापकसाध्यसंदेहविषयताकत्वमर्थः व्याख्यायां संदेहाप्रसिद्धेरिति साध्याभावकोट्यप्रसिद्धेरिति भावः सा-
ध्यैवमेवेति साध्यपदं तत्त्वनिवेश्यादिसंशयसाधारणोनेत्याह किमिति केवलान्वयिधर्मव्यापकत्वनिवेशे गौरवादिति भावः व्यतिरेक्याहाविति
सामान्यपदेनेत्याह दीधितौ नामेति असमानविषयकत्वादिति भावः व्याख्यायां दूषकतावीजमिति सहचारनिश्चयरूपेत्यर्थः दीधितौ साध्यसं-
देहेति अत्रापि साध्यवत्तानिश्चयविरोधित्वेन संशयानुगमस्तेन केवलान्वयिसाध्यके साध्यसंदेहाप्रसिद्ध्या नाव्याप्तिः असाधारणव्यतिरेकि-
हेतुसत्वायाः साध्यसंदेहविषयत्वव्याप्यतयातिप्रसंगवारणाय साध्यसिद्ध्यनुकूलत्वेनाव्यवच्छिन्नव्यतिरेकव्याप्तिः अनुगमय्यन् इहानुकूलत्वेन हेतुम-
द्भावसत्त्वयोरनुगमः सहैवाह्यनादृष्टावेति नादृशव्याप्तिग्रहौपयिकीवेत्यर्थः अन्वये अन्वयसहचारघटिकः व्यतिरेकेन सहचारघटिकः अ-
नुपसंहारित्वस्य हेत्वाभासतोपपादकेन ज्ञानस्य प्रतिबंधकत्वं व्यवस्थापयति स्वरूपसदिति तन्निश्चयेति हेतौ साध्यसामानाधिकरण्यनिश्च-
येत्यर्थः व्याख्यायां कथमिति तथा च हेतुमति साध्यसंशयस्य साध्यसामानाधिकरण्यसंशयाहेतुत्वेन न संशये सामग्र्यामिति भावः दीधि-

४०६

रामः

तौ सर्वत्र साध्यसंदेहे इति तथा चानुपसंहारित्वकाले साध्यसामानाधिकरण्यस्य संशयस्य न संभवति कुमतत् ज्ञानस्य संशयसामग्रीत्वमि
ति भावः कश्चित्तु पक्षिकमपि धर्मिणमंतर्भाव्य साध्यांशे निश्चयरूपसाध्यवद्वृत्तित्वप्रकारकज्ञानस्याज्ञानत्वे नैव पर्यः तदभावस्य साध्यसा
मानाधिकरण्याभावस्य साक्षाद्यो साध्यवद्वृत्तित्वस्यापीतित्तुल्यविनिवेषते येति शेषः ज्ञानात् साध्यवद्वृत्तित्वत्वेन संशयात्मकज्ञानात् नाहु
श संशये इति हेतौ साध्यसामानाधिकरण्याभावसंशयेप्यर्थः दीधितौ सः साध्यवत्वांशे निश्चयात्मकप्रतियोगीबोधः व्याख्यायां कत्वांतरं
समानविषयत्वे नैव विरोधित्वे पथ्याकथं विरुद्धपि तत्त्वासंभवादित्यादि ॥ आह तदावीं हेतुमत्वांशे निश्चयात्मकहेतुसामानाधिकरण्यज्ञाने
कश्चिदपि ज्ञाने साध्ये हेतुसामानाधिकरण्याभावसंशयस्य संभवतीत्याशयेनाह दीधितौ सामग्रीत्वेन इदं शासंशयसामग्रीत्वेन व्याप्तिग्रहविरोधि
त्वं व्याप्तिघटकसाध्यधर्मिकहेतुसामानाधिकरण्यनिश्चयविरोधित्वं न हेत्वाभासत्वमिति निरुक्तानुपसंहारित्वस्येत्यादि ॥ व्याख्यायां प्रतिबंधक
त्वेपि प्रतिबंधकतानवच्छेदकविषयत्वेपि दीधितौ व्यभिचरितेत्यादि ॥ अत्र यभिचरितात्वभिचरितेत्यादि एवं च कस्यैव साधारणत्वापत्त्या न्वयः ॥ प्रथममवत्तु संप
साधारणाद्यसाधिमत्वे हेतोः पंचमं साधारणाद्यत्वादिमत्वं पक्षस्यबोध्यं तत्रापि प्रथमं द्वयं व्याप्तिघटकद्वयोः प्रत्येकाभावस्य हेतौ संज्ञापकं त
तीयं विशिष्टव्याप्त्यभावस्य हेतौ संज्ञापकं तुरीयं पक्षधर्मत्वाभावस्य हेतौ संज्ञापकं पंचमं तु साधनाभावस्य पक्षे संज्ञापकमिति भेदः ॥ त्वदुपर

दी०

र्शितस्यैवेति हेतोर्नानाहेत्वाभाससंशयविषयवृत्तित्वस्यैवेत्यर्थः तस्यापि उपदर्शितदूष्यत्वादित्यत्वस्यापि असिद्धादीति असिद्धादिलौकिकप्रम
हस्यैतदाभासान्तरस्यादितिपरतासंवलितः दर्शितान्वयः नचैवमापत्तिः पक्षविशेषणताभावादिमत्त्वस्य सामग्रीघटकमपि योग्यताज्ञानविषयस्य
सिद्ध्यपक्ष ४ रकारणतासहकृतनिश्चयताज्ञानादिरूपसामग्रीत्यर्थः अपीति विरोधिनिश्चयसामग्रीत्वेन यद्ग्राह्यं हेतुमत्वादिद्वयमतित्वं धिके
त्तिनहिद्वयोर्हेत्वा + विशेषणताहेरपि सद्धेत्वाभासतापत्तेः अतिसद्देषतायाहिनामिस्थापने रहः अपि चेति हेतोः साध्याभावेति एतन्मात्रस्य
व्यतिरेकसहचारनिश्चयाविरोधित्वेपि विरोधवद्व्यसहचारनिश्चयविरोधिसाधाभासत्वं तावन्मात्रस्यैव हेतुसाध्यसामानाधिकरण्यसंश
यसामग्रीत्वादित्तिभावः व्यतिरेकिणि व्यतिरेकीतरेभ्यो भिप्रायेण व्यतिरेकित्वादित्याह तद्व्याख्यायां केवलान्वयिधर्मीव्यापकेनापीति यत्र हेतुम
त्त्वं तावन्मात्रविषयकेणापीत्यर्थः अन्वयव्याप्तिग्रहप्रतिबंधकमिति व्याप्यत्वतत्रापि हेतुपक्षतादीजसत्वाद्धेतुपसंहारे तेन तत्र पूर्वोक्तिलक्षणा
स्याव्याप्यायत्वासाध्याभावैसंदेहविषयमात्रवृत्तित्वमेवलक्षणमव्याप्तिविशायः संकरः अभेदेन यथा वा साधारणेति प्रसंगवारणायपूर्वो
क्तलक्षणमाभावरूपकमितिभावः तथा च व्याप्त्यादि अन्वयसहचारनिश्चयप्रतिबंधरूपहेत्वाभासनाम्न्योजकसत्वे साधारणस्यापि लक्षणत्वमेवे
त्तिन तदुरणायापि पूर्वोक्तिलक्षणमितिभावः न च स्वविदमेवलक्षणमत्र आह हेत्वधितौ न चात्रेति व्याख्यायां ज्ञायमानेनेति यद्विषयकज्ञानस्येनय

408

राम०

तिबंधकत्वं तस्यैवेत्यर्थः एककारेणासामग्रीत्वेन प्रतिबंधकत्वव्यवच्छेदः तथात्वानहेत्वाभासत्वात् असाधारणपदेति आदिनासाधारणतादि
परिग्रहः सत्प्रतिपक्षोज्ञापकतयासत्प्रतिपक्षोज्ञापकत्वादिना आदिनाव्यापकत्वप्रतिबंधादिग्रहः दूषकत्वेनेति साधारणस्य व्यापकत्वग्रहप्रति
बंधकतया साधारणस्य साध्यानुमितिप्रतिबंधकतयानुपसंहारित्वस्य भागासहचारग्रहप्रतिबंधकतयादूषकत्वादिति भावः तत्साधारणस्य
असाधारणतादि साधारणस्यतियुक्तिकत्वेति भिन्नप्रयोजनतानां सव्यभिचारत्वेनैकत्वस्यातियुक्तिकत्वादिति भावः ननु सव्यभिचारत्वं निर्वक्ति प्रथा
णामिव व्याप्तिग्रहप्रतिबंधरूपैकप्रयोजनकत्वेनोपपादयति आद्य साध्याभाववद्वृत्तित्वे सति साध्यसामानाधिकरण्यज्ञानमेवानुमितिहेतु
रित्याशयेनाह व्याद्येः साध्यतायां व्यमाद्यः साधनतायां वकाभिमतेति तासामाद्यद्वयस्य हेत्वविरोधित्वाभावादाह यत्र कामीतिति हेतुप्रयुक्तेति सि
साधयिषाधीनप्रयोगाभिप्रायेणेदं शेषमिति अत्रावच्छेदकत्वमवच्छेदककोटिप्रविष्टत्वमन्यथाव्यभिचारज्ञानदशाहेरेवावच्छेदकतयाव्यभिचा
रज्ञानव्याप्तेरेवंचज्ञानत्वाद्यवच्छिन्नप्रतिरिति विषयतयेत्युक्तमिति भावः नन्वाद्यमिति साध्यसाधनभेदेनैकत्वहेतुलाभादिति भावः वस्तुतः इति अ
सिद्धिग्रंथइति शेषः प्रकृतपक्षेति तथाच प्रकृतपक्षाप्रविष्टाभाववत्साधारणतादिभिन्नत्वमिसत्प्रतिपक्षांतर्भावेन लक्षणघटकत्वमप्रविष्टाभाव
वत्साधारणभिन्नत्वस्य परिग्रहे तोऽस्यानामव्यभिचारस्यासिद्धांतर्भाव इत्याशयः यथा श्रुतेन स्वप्रकृतपक्षाप्रविष्टाभाववत्साधारणपि

409

१२१

दी.

121

न्नत्वाभावेनासंगतेः। अपरे तु विशिष्टसाध्यसाधनसहचाराविरोधित्वस्य व्याप्तिग्रहाविरोधियद्विशिष्टसाध्यसाधनग्रहविरोधितत्त्वाभाववद्रूपत्वयो
न्कस्यलीयस्य व्यभिचारेण नाव्याप्तिरिति प्राहुः। न च द्वितीयमनेनाभावादिघटितेऽत्यर्थः एवमग्नेयपि द्वितीयविशेषणविशेषणत्वं स्वसमानाधिकरणव्याप्य
नावच्छेदकलघुधर्मान्तरघटितत्वं वह्न्यत्वमितित्वव्याप्तिमयधूमवत्त्वेनाधिकरणत्वे वा हेतिग्रहइत्यसिद्धिग्रंथेवव्यक्तमिति भावः। आख्यायां व्याप्तिग्रहेति
नाहार्येत्याद्व्यापकतावच्छेदकनाज्ञानमात्रस्यैवेति एवकारेण सामानाधिकरण्यज्ञानव्यवच्छेदः। अन्यस्य व्यभिचारितत्वग्रहस्य तत्र विशिष्टविरहे साध्याप्र
सिद्धिरेवेति एवकारेणासाधारण्यव्यवच्छेदः। पूर्ववत्पक्षत्रकामिनीसाध्यमित्यादिरीत्या। स्वमत इति असाधारण्यस्येति शेषः। विरहे सांकर्येति विरह
मेहेत्यर्थः। शीघ्रिनाद्विहमेवेति। असतः विरहत्वमित्यनेन स्फोटो व्यः। एवकारो मणिकृन्नामित्यनेन रंयोग्यइत्याशयेनाह व्याख्यायां मणिकृता मैवेति।
न सांकर्यविरह सांकर्य साध्यव्यापकेतिपक्षद्वयेत्वेसतीत्यादि। ननु हेतावन्यं तताभावाप्रतियोगित्वस्याप्यनुपसंहारितयात्वं नाभावप्रतियोगिता
वच्छिन्नप्रमेयत्ववह्निहेतुकेन त्राव्याप्तिस्तस्याविशिष्टसाधनग्रहविरोधित्वात् तत्राह। अत्रापीति एतेन हेतुतावच्छेदकमैत्रेपि समवायित्वाभावविशि
तिएतन्त्र साध्यसाधनभेदेन लक्षणस्य भेदेनात्र विशिष्टसाधनग्रहाविरोधित्वस्याप्रवेशादेव नाव्याप्तिरित्याशंकानिरासायेत्यावद्यप्रवेशोसम
वायित्वाभावविशिष्टप्रमेयत्वरूपसाधनाप्रसिद्धावतिव्याप्तिरतस्तत्प्रवेश इत्याशयः। असिद्धिरेवेति एवकारेणानुपसंहारित्वव्यवच्छेदः। साध्या

410

राम०

भावइतिइदमुपलक्षणंहेतावत्यंताभावाप्रतियोगित्वमपिद्रष्टव्यं विषयत्वादिरितितुल्यवित्तिवेद्यत्वादिरितिभावः अतएवसमानप्रकारकत्वे
नविरोधित्वाभावादित्यत्र किंत्विति इदंचवक्ष्यतीतिमभिप्रेत्यतेनाभावाप्रतियोगित्वस्यानुपसंहारित्वस्यापिभिन्नप्रकारकतयाः तादृशव्याप्तिता
नविरोधित्वाभावेपिनक्षतिः एतन्मते अनुपसंहारित्वस्यव्याप्तिग्रहविरोधित्वंयद्यपिसमानविषयत्वेनविरोधिनामतावलंबनेनदोषस्तथा
पिसमानप्रकारकतयाविरोधित्वेपिनक्षतिरित्याशयेनाहएवमपीतिसमानप्रकारकतयाविरोधित्वाभ्युपगमेपीत्यर्थः तादृशावच्छिन्नत्वेपिता
दृशावच्छिन्नप्रतियोगिताकत्वमित्यर्थः एवंचव्यतिरेकव्याप्तिरपितेनसंबंधेनाभावीयमात्रव्यापकत्वघटितैवेतिभावः एवंसतितादृशसाध्यस्य
व्याप्यतायामभावद्वारकसंबंधस्यव्याप्तिशरीरेतत्त्वेगौरवादित्यभावेवेति प्रतियोगितासंबंधेनेति एतत्हेतुनियामकसंबंधस्याप्यभावप्रति
योगितावच्छेदकत्वाङ्गीकर्तृप्राचीनमतानुसारेणावोध्यं साध्यापत्त्वस्य साध्यस्य अस्यैवमपिप्रतियोगितायांसाध्यतावच्छेदकसंबंधावच्छिन्नत्वमु
पेवपणेनिवेश्यममप्याभसमवायादिनाप्रमेयत्वाद्यभावेतादृशप्रतियोगितयाप्रमेयत्वादिसाध्यस्यसाध्यसंभवापत्तेस्तत्याघतादृशप्रतियो
गीत्वाप्रसिद्धाकथमेतदितिचेन्नसाध्यतावच्छेदकसंबंधावच्छिन्नत्वंसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताचैतन्न्नित्तयसंबंधावच्छि
प्रतियोगिताकसाध्याभावस्यहेतुतावच्छेदकमित्यादिरीत्याहेत्वभावस्यचानुपसंहारित्वे तात्पर्यात्प्रमेयत्वाभावइत्यादिग्रहेनत्रितयपाप्त

411

री०

मेवविशेष्यविशेषणाभावापन्नानां संसर्गतया भानात्तद्दोषः अन्नरस्यकंबुग्रीवादिमत्त्वादेर्गौरित्येतदभावप्रतियोगितावच्छेदकत्वमतेऽपि
तत्रानुपसंहारित्वमुपपद्यते एतेन विशिष्टबुद्धौ विशेष्यप्रकाराभावग्रहवद्विशिष्टसंसर्गकबुद्धौ संसर्गतावच्छेदकाभावग्रहोऽपि विरोधी संसर्ग
विशेषणावच्छिन्नविषयतासामान्यस्यैव ग्राह्याभावबुद्धिप्रतिबध्यतावच्छेदकत्वोपगमात् संसर्गघटकानामपि परस्परसंसर्गभानोपगमेन सं
सर्गतावच्छेदकविषयतायाः संसर्गविशेषणावच्छिन्नत्वात् एवं च यावत्तत्तदवच्छिन्नत्वस्वरूपादिसंबंधावच्छिन्नत्वोभयविशिष्टप्रतियोगितासं
सर्गकविषयत्वाभावव्यापको हेत्वभाववदन्यादिग्रहे प्रतियोगितावच्छेदकेन न तूभयाभावग्रहस्य विरोधितया तद्विषयतादृशाभावस्यैवानुपसंहारि
त्वमिति न वीतोक्तिः पर्यासा गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वमते कंबुग्रीवादिमत्त्वावच्छिन्नत्वाप्रसिद्ध्या तेन रूपेण साध्यतायामनुपसंहारि
त्वस्याभावस्य वा संभवादिति दिक्। दीधितौ ग्रन्थे यथाश्रुतपाठे नैयायिकसामानाधिकरण्यरूपान्वयव्याप्तिज्ञानसंभवे नानुमितिप्रतिरोधः नानु
मितिप्रतिबंधः इत्येतदिति वस्तुतः साध्यवान्साध्याभाववद्वृत्तित्वरूपान्वयव्याप्तिज्ञानमेवानुमितिहेतुस्तथा चानुपसंहारित्वग्रहे अन्वयव्याप्तिग्र
हादृते नानुमितिः एवं चानुपसंहारित्वस्यान्वयव्याप्तिग्रहप्रतिबंधोऽपि दूषकताबीजमिति ॥ ॥इति श्रीमहादेवरचितायां भवानंदीव्याख्या
यां सर्वीयकारिणामनुपसंहारिग्रंथव्याख्या ॥ ॥व्याख्यायां विरोधित्वमिति साध्यव्यधिकरणावृत्तित्वरूपविरोधित्वस्य पर्यः वैयर्थ्यादित्यक

412

स्म०

पिसंयोगेन द्रव्यत्वादिमत्त्वावच्छिन्नाभावविरोधित्वप्रवेशेनैक्यादरणादिति भावः प्रतियोगित्वप्रकारकेति तत्पदार्थवत्तत्र विशेषणज्ञानविधया
प्रतियोगिज्ञानस्य हेतुत्वात्मावच्छेदकाय प्रतियोगिनः संबंधान्तरत्वमावश्यकमिति भावः संबंधविधयेति तत्याचामावश्यकत्वे रहात्र
न द्वावश्यकमिति भावः तत्सत्त्वेपि घटाभावग्रहप्रतिबंधकस्य हविषयकत्वसत्त्वेपि असाधीनत्वादिति सर्वत्राभावत्वप्रतीतिपूर्वत्वाद्यादि हाने
मानाभावादिति भावः घटसमवायेनेति स्वाभावविशेषणतास्थितौ नभावभिन्नत्वमिति इदं च सकलगतिमनुरुध्योक्तं तेनैतस्यापि धावष्याप्त्युक्तेर्वे
नैतन्निषेधस्य प्रकृतानुपयुक्तत्वेपि न क्षतिः प्रथममिति भेदत्वस्याप्यभावत्वघटितत्वादिति भावः अयमभावो न भाव इति अभावत्वस्याभाव
भेदत्वपर्य्यवसानं स्यादिति भावः व्याख्यायां समवायाभावादित्ययथार्थं तत्र व्याप्यायकौशलमेव प्रतिपादितमस्माभिः तत्र यैतौ अभावत्वस्यै
व नञर्थता स्यादिकत्वादिति भावः एवं सति अभावत्वप्रतीतेः प्रमाणत्वानुरोधेनाभावस्यातिरिक्तत्वोपगमे सति तेषां अभावप्रतियोगिका
भावानां संबंधेनैव संबंधकल्पनेनैव प्राहुरिति सिद्धान्तरहस्यमेव प्रकर्षः अनेन घटादीनां घटाद्यभावाभावत्वकल्पने गौरवेणात्र
इतिरिक्तैकैकाभावस्वत्वकल्पनमुचितमिति वास्तवरसबीजं यत्तु घटाभावाभावत्वं घटाभाववत्त्वेपि नो नु प्रतियोगितावच्छेदकः सव घटनियघ
टाभावीयप्रतियोगितानोनातिरिक्तेत्याशयेन घटादिषु तन्मेव नवैतत्र घटाभावप्रतियोगी अत्र घटाभावाभावइति प्रतीत्यारविशे

षावच्छिन्नेति वाच्यं प्रतियोगितानवच्छेदकरूपावच्छिन्नविषयताविरहेणैव तद्दोषवारणात् स्वप्रतियोग्यभावविरहात्मकत्वं वस्तुतः प्रतियोगित्वेति
प्रत्याहृत विरोधोपि तिन्नवीनैरुक्तं तच्चिन्त्यं तथा सति भेदप्रतियोगितानवच्छेदकयोर्भेदप्रतियोगितावच्छेदकभावानुपपत्तेरिति दिक् अथ शशशृङ्गीति शेषो
नास्तीति मूलोक्तं उपपादयति द्विविधौ बाधिवादिरूपौ मदादिकव्यवहारश्चायं निरनुयोज्यानुयोगः इति तत्त्वं वा निग्रहस्थानावसरे निग्रहस्थाननानुयोगत्व
छलजात्योरिति अभिप्रायार्थबोधकवाक्यविकल्पेन तत्त्वाभिप्रायार्थबाधकल्पनं छलं स्वव्याघातकमुत्तरं जातिस्तयोरित्यर्थः विभागः पदार्थे
षु विभागः यत्तु छलजात्योर्निग्रहस्थानेष्वपचारात् तद्विभागः इति केचित् तदुक्तं तदतीव मन्दं तयोस्तेषु विभागात् विभागः हेत्वाभासेषु विभागः न
तु व्यापकत्वं इति धिताव्य विरोधादिति साध्याभावे हेतुव्यापकत्वज्ञानस्य सामग्रीतया वानुमितिनिरोधकत्वात् तद्विरोधित्वात् ग्रहे हेत्वाभासत्वमिति
भावः ननु हेत्वभाववत्ते न साध्यव्यापकताग्रहस्य हेतौ सामानाधिकरण्यग्रहविरोधित्वे मानाभावः समानविषयकत्वस्याप्रयोजकत्वादत आह व्या
प्त्याख्यं तथा चेति व्यापकतेति विशिष्टव्यापकत्वेनेत्यर्थः इति मतं तत्तु यथा चानुभवानुरोधेन तादृशव्यापकताग्रहस्य तादृशसामानाधिकरण्यग्रहे
समानविषयकत्वेपि मतिमान्द्यात् तथा श्यायेन प्रतिबन्धकत्वमिति मतमालम्ब्येदमुक्तमिति भावः अतएव नानुमाननिरासावसरसाधकतान्तरमाह हेत्व
भावस्येति हेत्वभावाभाववदिति तथा च व्यापकत्वं न सम्भवति सम्बन्धाभावप्रतियोगित्वरूपं किन्तु व्याप्तिनिरूपकत्वं व्याप्तिश्च साध्ये हेत्वभावाभा रामं

कावच्छिन्नत्वरूपा व्याप्यहेत्वभाववत्संमादिदीधितिग्रंथोप्येतत्तात्पर्यक एवेतिभावः तथा चेति यथा साध्येइति शेषः यथा चेति पाठे साध्यस्ये
व शेषः हेतुमद्वृत्तित्वाभावः तद्रूपः उक्तरूपेणापि हेत्वभावाभाववत्त्वघटितत्वरूपेणापि विरोधित्वं ममनुपपन्नं तथा च नाहृश्यज्ञानस्य समानवि
षयत्वेनैव विरोधित्वमितिभावः एवं च समानप्रकारकत्वेनैव प्रतिबंधकत्वमिति अभिप्रायेणाह यदि चेत्याद्युक्तिः ग्रंथे यथाविरोध इति पूर्वहेत्वभावत्वे
न साध्यव्यापकताज्ञानस्यैव प्रतिबंधकत्वस्योक्तत्वात् इत्यभावाभावत्वेनासामानाधिकरण्यग्रहस्य न इत्युक्तमेवेतिभावः इदमुपलक्षणं प्रवि
रुक्तसंप्रतियोगिकाभावस्येत्युपादानमनर्थकं स्यात् मणिमंत्रादिन्यायेन प्रतिबंधकतायां तदनुपयोगेन हेतोरिसस्यैव सम्यक्त्वात् एतत्र
त्येवतत्साममासमानविषयकत्वप्रदर्शकतयासार्थकत्वादित्यपि द्रष्टव्यं एतेन पूर्वं मणिमंत्रादिन्यायेन विरोधित्वमुक्तं यदि चेत्यादिग्रंथस्तु
हेतौ साध्यसामानाधिकरण्यग्रहे हेत्वभावाभावे साध्यसामानाधिकरण्यग्रहस्यैव विरोधित्वं नास्तीत्युक्तमादर्शसामानाधिकरण्यग्रहेतो
र्हृदयाव्यापकताज्ञानस्य प्रतिबंधकत्ववारणायेत्यनयोर्व्याख्येयं तदपि परास्तं पूर्वं विरक्तत्वादेरनर्थकतापातात् केचित्तु हेत्वभाववत्साध्य
व्यापकताज्ञाने जाते हेत्वभावाभावेपि साध्यसामानाधिकरण्यज्ञानं जायते इति विशिष्यावच्छिन्नत्वादित्यभिप्रायकः सर्वपि यस्तत्र वस्तुतस्त्वादि
तु समानविषयकत्वप्रदर्शकं हेतोर्ज्ञानादिदृश्यसामानाधिकरण्यग्रहे प्रमितेन ज्ञानस्य प्रतिबंधकत्वमेव संउपनिपद्दि चेत्यादिनेत्याहुः धर्म

५४

टी०

पदं वृत्तिमत्परमिति वृत्तिमत्परं धर्मपदमित्यर्थः इदमपि · यद्धर्मत्वाविरोधित्वप्रदर्शनमपि · स्वरूपासिद्धीति अवृत्तित्वरूपोपाधिः · असंकीर्णे
त्तिवैलक्षण्योपपत्त्यर्थः अवृत्तेर्विरुद्धत्वस्येष्टत्वेन तद्वारणफलत्वासंभवादिति भावः साध्यासामानाधिकरण्येनासिद्धिवैलक्षण्यलाभेन तस्य
दर्शनमनुपयुक्तमित्यत आह दीधितौ वृत्तिविशेषेति व्याख्यायां अव्याप्तिरिति नान्तत्ववति समवायेन वृत्तित्वाप्रसिद्धेरिति भावः सापि अ
व्याप्तिरपि हेत्वधिकरणावच्छेदेन हेत्वधिकरणत्वावच्छेदेन · निरसनीयेति न चैवमपि जातित्वे साध्ये समवायेनाकाशादावव्याप्तेर्न निरास इ
त्वधिकरणताप्रसिद्धेरिति वाच्यं तस्या लक्षणमित्याशयात् हेतुतावच्छेदकसंबंधसामान्ये साध्यवदनुयोगिकत्वहेतुप्रतियोगिकत्वोभयाभावरूपा
पाध्यंतरेणातन्निरासासंभवाद्दीधितौ तत्प्रभातिप्रसक्तमिति व्यतिरेकिणीत्यादिः व्याख्यायां वस्तुति व्याप्तेरिति न च व्यतिरेकिण्यव्याप्तिरिति म
त्वे व्यतिरेकि यदस्य साध्यवद्वर्जितव्यतिरेकिपरत्वेन स्वलक्ष्यतया ऽस्थिताभावोक्तया असंगतिरिति व्याप्यव्यतिरेकिपरत्वं वाच्यं तथा च तस्य
सद्धेतुतया साध्यवद्वर्जितासंभवेन वस्तुतोऽपि व्याप्तेरसंभव इत्याशयः यथाश्रुते · येन विना साध्यवद्वृत्तित्वाज्ञानादित्यर्थः यथाश्रुतेभत्वेका
रणत्वमिति साध्यवद्वृत्तित्वज्ञानं इत्यादिः · तदैव तादृशाकारणत्वमेव · उद्दीप्यत्वादिति साध्याभाववद्वृत्तित्वज्ञानस्येत्यादिः · पर्यवसान राम॰
त्तिनेन विनेत्यादिमूलस्य साध्याभाववद्वृत्तित्वपर्यवसानेत्यर्थः संशयेति वृत्तिमत्त्वसाध्यवद्वृत्तित्वाभावतरांशे भ्रमत्वसंशयेत्यर्थः आ

124

416

संजकत्वात् निरासासंभवात् तथा च साध्याभाववद्वृत्तित्वज्ञानं विनापि व्याप्तिमत्त्वविशिष्टसाध्यवद्वृत्तित्वज्ञानस्य तादृशसंशयनिरासासं
भवेन तत्र भ्रमत्वसंशयानास्कन्दितज्ञानस्याप्रतिबंधकत्वेन हेत्वाभासत्वासंभव इति भ्रमत्वशंकानिरासाय साध्याभाववद्वृत्तित्वज्ञानमात्रस्य प्रत्यक
मित्याशयः धर्मिपरत्वमपि इति तथा च बहुव्रीहेरन्यपदार्थप्रधानतया अन्यपदार्थस्य धर्मिणः प्राधान्येन तज्ज्ञानस्य व्याप्तिग्रहप्रतिबंधक
त्वमसहचारज्ञानस्येत्यादिमूलाक्षरार्थं तद्व्यासंगतं धर्मिज्ञानमात्रस्य तत्प्रतिबंधकत्वादिति भावः सहचार इतीति तथा च सहचारस्याभावो
सहचारं इति पूर्वपदार्थप्रधानाव्ययीभावोपगमेन सहचाराभावस्य प्राधान्येन तज्ज्ञानस्य व्याप्तिग्रहप्रतिबंधकत्वलाभात् न तन्मूलासंगतिः
तस्य प्रतिबंधकता च सहचाराभाववत्तानवगाहिसहचाराभाववद्वृत्तित्वज्ञानत्वेन वेत्यग्रे स्फुटीभविष्यतीत्याशयः एतेन बहुव्रीहिस्वरसत्वात् [illegible] लक्षणयान
विघ्नेसहचारो यस्येति बहुव्रीहौ सहचारपदं सहचाराभाववल्लाक्षणिकं तथा च तज्ज्ञानस्याप्रतिबंधकतया मूलासंगतिः सहचाराभाववत्ता
नत्वे नैव तत्त्वादित्याभासार्थज्ञानवतोसाम्यानां सहचाराभावविशिष्टज्ञानप्रतिबंधकत्वस्य हेत्वाभासत्वलक्षणाय युक्तस्य पदप्रदर्शनीयत्वात्
धर्मिविशेष्यकतत्प्रकारकज्ञानत्वस्यैव स्वरूपसंबंधरूपावच्छेदकस्याप्रामाण्यासोऽसंगतमिति दूषणोद्भावनं परास्तं असंभवीति व्य
भिचारज्ञानाभावरूपस्य व्यभिचारज्ञानस्य प्रतिबंधकत्वेन तत्प्रतिबंधकत्वासंभवादिति भावः यथाकथंचिदिति एकदेशकालावच्छेदेनैकत्र

417

टी०

न्निष्ठत्वरूपविरोधित्वमित्यर्थः वक्ष्यमाणत्वादिति पूर्वदार्ष्टान्तिके तस्यैवोक्तत्वादिति भावः न स्वविरुद्धत्वस्य एतस्य तदभावत्वमित्यादेः उत्तरत्रापि सा
ध्यव्यापकाभावेत्यादावपि अनुवर्तनीयतया अनुसरणीयतया सामान्यपदे नैव तत् ॰ दे नैव उत्तरत्रानुवर्तनीयत्वमेव विशदयति साध्यव्याप
केति तत्रापि साध्यव्यापकाभावेत्यादावपि संग्रहात् संख्यासाम्यात् चैयं व्याप्तीति साध्यव्यापकाभावव्याप्यस्यात्रतीयेन संग्रह इति भावः उदाहरणे
द्वितीयभेदोदाहरणे धूमादिति तथाच व्याप्यपदोत्तभावेन तदुदाहरणासंगतिरिति भावः गगनादित्वाद्युक्तित तथाच व्याप्यपदोत्तभावेन तृतीयेन द्वितीयस्य
पौनरुक्त्यापत्तिरिति भावः तेन तृतीयेन आधिक्येन निमग्नमद्वितीययोरप्यनेन भवितव्यमिति भावः विवक्षिता पक्षस्य साध्याभावव्याप्यत्वं साध्यव्याप
काभावत्वरूपस्यासत्त्वादिति यथाश्रुते साध्याभाववत्त्वसाध्यव्यापकाभावव्याप्यत्वयोरेव लाभादिति भावः द्वितीयान्तर्गतं साध्यव्यापकाभाववत्त्वा
न्तर्गतं न तृतीयान्तर्गतमिति व्याप्यसाध्याभावाभावस्यातिरिक्तत्वाभिप्रायेणाह तरयात्वादिना वह्निमद्व्योमाभावे साध्ये वह्निमत्त्वादेः संग्रहः स्वरूप
तद्धेति स्वरूपतद्युक्तिश्च साध्यव्यापकाभावत्वादिनाव्याप्यविरोधिता विशेषनिवेशसूचनाय मध्यम एव साध्यव्यापकाभाव एव अन्तर्भावि
तेनेति तस्यापि साध्यव्यापकाभाववत्त्वादिति भावः चरमे साध्यव्यापकाभावव्याप्यात्मकसाध्यव्यापकविरुद्धे दीधितौ अस्येति धूमवत्त्वस्य तथा
प्यत्वग्रहे चेति अस्य इत्यनुषज्यते व्याख्यापारस्यं वरुकस्यैव धूमवत्त्वस्य द्वयोर्भेदेन मध्यमचरमयोरन्तर्भावेन च नदाव अभावव्यापकवह्निसामान्य

418

राम०

भावाभावव्याप्यत्वग्रहदशायां सत्यपि विप्रतिसाधने त्रिविधइत्यादि मूलं दूषयति दीधितौ इदं पुनरिहावधेयमित्यादिना क्वचित्तस्यापि सा
ध्याभावव्याप्यत्वादिति असामानाधिकरण्यग्राहकत्वेनचेति तात्पर्यानीत्यादिकमनुषज्यते नचैतद्ज्ञानेप्येवमादिना मूलेन स्वरूपतोज्ञानस्यै
वविरोधित्वग्रहदर्शनादेतन्निरासः अनुक्तोपालंभ इति वाच्यं परोक्षे यावंतो विकल्पाः संभवंति तावतो दूषणस्यैव संप्रदायसिद्धत्वेन तस्याभिधा
नात् व्याख्यायां विरोधित्वासंभवादिति साध्यव्यापकाभावव्याप्यत्वादिति सुधियेपि साध्यसामानाधिकरण्यग्रहेप्यनेरितिभावः विरोधित्वा
दिति साध्याभावेनानूतव्याप्यवानसाध्यवानित्यनाहार्यता न स्यादननुभवादिति भावः असंगतमिति इदं च मूले अग्रे पंचेत्यादिना बाधादिसांक
र्यमात्रस्य धर्माचिन्त्यत्वमभिहितमिति समभिमानेन तत्तदसंगतमपरं बाधेतीति तत्याच मूले पंचेत्यादिना बाधादिसांकर्यस्यैव मामन्धकाचिन्त्यत्वमभि
हितं किंतु मतस्यैकरूपावच्छिन्नसांकर्यस्यैवेति नासंगतमितिरिति भावः एतेन मूले बाधस्वरूपासिद्ध्यन्यतरत्वावच्छिन्नसांकर्यस्य कार्याधिकत्वाभिधा
नमसंगतमित्यवमारणिकाशायध्वमवर्त्तोमान्यानां मूले अन्यतरत्वेन बाधासिद्ध्यन्यतरस्यानुमत्याघतारणिकाया असंगतिरिति दूषणो
द्भावनं परास्तं पूर्वोक्तिकाशयवतो व्याख्यानुर्भवदभिमताशयस्यैवाभावात् ननु पदद्विविरोधस्यान्यतरसांकर्यमिति पामसहाकथं तस्यापा
र्यवसानमित्यत आह दीधितौ ज्ञानेतिनचाबद्दोषांतराज्ञानेविरोधज्ञानदूषणपामनुमितिप्रतिबंधेनतस्यापि दोषत्वोपगमआवश्यक इति

भावः॥ ॥इति श्रीमहादेवरचितायां सर्वोपकारिण्यां भवानंदीव्याख्यायां विरुद्धग्रंथः॥ व्याख्या॥ ग्रंथेन मूलग्रंथेन खंडशः विशकलितस्य
व्याप्यत्वस्य पक्षधर्मत्वस्य च० गमस्य० व्याप्ये पक्षधर्मत्वेऽगमस्य पक्षधर्मविशिष्टव्याप्यत्वविरहादित्याकारकस्य च० तत्रापि० विरुद्धाद्यभावेऽपि गुणादपक्षके०
गुणो द्रव्यवान् घटादित्यादौ हेतौ साध्यसाधनभावे पक्षधर्मत्वस्यापि गुणानुयोगिकसंयोगस्यापि उचितेति ग्रनन्ताभंगार्थ+ त्वगमस्य० असं
गतइति ग्रंथेन ग्रंथेन विशिष्टगमासंभवप्रतिपादनादिति भावः इत्यस्यापि इति मूलग्रंथस्यापि अयमेव एकधर्मितावि... व्याप्य+मिति
भावः तस्य पक्षधर्मत्वस्य वैशिष्ट्यतया वैशिष्ट्यस्वरूपतया व्याप्यादिति० आदिना पक्षपरिग्रहः तदप्रसिद्धिः पक्षधर्मत्वाप्रसिद्धिः नदोषायेति अय
माशयः व्याप्तिप्रकारेण पक्षे हेतुतावच्छेदकसंबंधेन हेतुप्रकारकज्ञानस्यानुमितिहेतुतया गुणाद्यनुयोगिकसंयोगादिरूपहेतुतावच्छेदकसंबं
धाप्रसिद्धिर्न दोषाय० अथैवं खंडशः प्रसिद्धापक्षधर्मत्वाप्रसिद्धिर्न दोषायेति फलितं एवं च खंडशः प्रसिद्ध्या व्याप्तेरप्रसिद्धिरपि न दोषायेति
विरुद्धादेर्व्याप्तेरप्रसिद्ध्यभिधानमसंगतमिति चेन्न अखंडव्याप्तिप्रकारेण पक्षे हेतुज्ञानस्यानुमितिहेतुत्वमिति पक्षाश्रयाभिप्रायेणोक्ताभि
धानात् खंडशो व्याप्तिनिश्चये तानु अन्वयव्यतिरेकव्याप्तिज्ञानयोरननुगमेनैकोपादाने० अन्यत्राव्याप्तिर्दुर्वारेति साध्यानुमितिसाध्यवत्ताज्ञानाविरोधानु
मितिसमर्थित्वेनोभयोरनुगमेनुसिद्धांतलक्षणस्यैव पर्यवसानमिति दिक्॥ इष्य इत्यत्र तात्पर्यमिति शेषः तेना खंडपक्षधर्मत्वाप्रसिद्धेरदोषत्वेनाह

420

राम०

शाब्दप्रमाप्रसिद्धेर्हेतुत्वाभिधानासंगतिः व्याप्तिपक्षधर्मतयोरुक्तत्वेन तयानुमितिसंगत्वे नैकत्र तादृशप्रमासिद्धिर्हेत्वायत्तामत्रेमस्य वक्तुमशक्यत्वादि

ति फलितकानिरस्तेति दिक्। न च संगेति व्याप्तिसंगेत्यर्थः एतस्य साध्यविरोधीत्यादिमूलस्य। व्यर्थमिति तद्ग्रहज्ञानस्यानुमितितत्कारणान्यतरविरो

धित्वेन हेत्वाभासत्वासंभवादिति भावः। इदं च लक्षणं। श्रयपरामर्शमारातादृशविरुद्धादिनाविरोधि परामर्शकालीनपरिग्रहः मक्तत साध्याभा

वेतिन याववलपर्ं ग्रहणं न साध्यविरोधिनिरूपितव्याप्तिपक्षधर्मतापरमिति भावः नचैवमिति तत्र तादृशपक्षधर्मत्वाभाववद्व्यवसायोस्साध्यमया

बाधाश्रयासिद्धिनिरूपितस्य निरस्तत्वेनोपस्थितस्याभावादिति भावः। न च। विरोधि। उपस्थितित्वापेक्षया तादृशोपस्थितत्वेन पुनस्य

धेयत्वापेक्षया। संमुखत एव स्वरसत एव। तयोपस्थितेः तादृशजनकज्ञानविषयविषयकोपस्थितेः उपग्रहसंभवात् उपग्रहोचितमात् न

याच्यसाध्यविरोध्युपस्थापनसमर्थत्वेनैवोपस्थितिविशेषणमित्युक्तमिति भावः। नसाध्येति तस्यासमाध्यवत्ताज्ञानएव विरोधित्वादिति भा

वः। तत्र सत्प्रतिपक्षमपास्य केवलस्याविवक्षितत्वेन समानपदमुपस्थितिविशेषणमित्यभिप्रेत्याह हीयितोसमानयेति तयाविधेति साध्याभाव

दिनिरूपितेत्यर्थः व्याख्यायां प्रमाणस्य ग्रहइतिसतिसप्तमी ममहनुमितिप्रतिबन्धकानुमितिप्रति तत्परामर्शत्वेनैव। कस्याद्व्याप्यवत्तापरा

मर्शत्वेनैव। एवकारेणाप्रामाण्यग्रहाभावस्य हेतुतावच्छेदकत्वव्यवच्छेदः व्यवहारोपपादकत्वं तु गतासत्प्रतिपक्षासंग्राहकत्वस्याहोषमाहहत्ते

421

दी०

व्यवहारेति सम्प्रति पक्षत्वव्यवहारे स्पष्टः। एतस्यैव साध्यसिद्धौपयिकपरामर्शकालीनत्वस्यैव अगृहीताप्रामाण्यकत्वस्य फलमाह दीधितौ गृहीतेति
ति नचासत्ति गृहीताप्रामाण्यकेवापरामर्शेपरामर्शाप्रामाण्यज्ञानाभावरूपकारणविरहप्रयुक्तत्वानुमित्यनुत्पादो न तु विरोधिपरामर्शप्रयुक्त
इति वाच्यं तत्र विनिगमनाविरहेणादिरोधिपरामर्शस्यापि प्रयोजकत्वावश्यकत्वात् समानसंवित्त्वविशेषणमेवेति समानपदव्यावृत्तिर्मिश्रोक्ता
दूषयितुं तन्मतमुपन्यस्यति पक्षेति तन्निर्णयेनेति तत्तीयार्थोऽभेदः अधिकबलत्वान्वयी बाधकस्य साध्यविरोध्यनुमित्युपधायकस्य अत्रैव हेतुर
धिकबलत्वं इदं सम्प्रति पक्षव्यवहाराभावप्रयोजकं अप्रामाण्यनिश्चयपक्षवहेतुतावच्छेदकः प्रतिबन्धकतावच्छेदकश्चेति मिश्राणां संमतं विशिष्य
परामर्शस्येति तन्मतिरस्कृहीनबलपरामर्शविषयेतद्व्यवहारस्येत्यर्थः समानेत्यादि निश्चितप्रामाण्यकसाध्यपरामर्शकालीनत्वे सतीति निश्चितप्रा
माण्यकत्वं समानबलत्वमिति भावः अप्रामाण्यनिश्चयोपाधिकारणतावच्छेदको वा स्यादतद्धा समानबलतयात्तु पाह्नान ध्रौंसा इत्यनेन व्याख्या
भिचारेतेति व्याख्यायां अप्रामाण्यग्रहाभावमात्रेमित्यमात्रपदेन अप्रामाण्यनिश्चयत्वावच्छेदः अस्त्विति तत्र व्यभिचाराभावादिति शेषः ए
क परामर्शेऽप्रामाण्यग्रहस्य कथमपरपरामर्शेऽप्रामाण्यग्रहानुकूलत्वमित्यत आह अनुकूलत्वं चेति निश्चस्यहैवेति तन्यायोपदर्शिनि
रीत्या समानपदव्यावृत्तिरसंगतैवेति भावः कालीनत्वलाभादिति समानपदेनेत्यादि तन्याये बलस्यापि विवक्षितत्वेपि समानपदात्तादृशलाभत

रामः

त्पर्यग्राहकतया वल्लपदस्य तात्पर्यकामिनिति हृदयं ननु समानपदादेव तादृशार्थपरामर्शलाभे न लिंगपदोपादानस्य तादृशपदामर्शलाभाद् योजकतया
ल्लिंगपदोपादानाच्छैत्यादिकमसंगतमतो राहुरन्यथा चेत्यादिना यालब्धमिति स्वीयलिंगत्वौपयिकतादृशपरामर्शकालीनत्वं लब्धमित्यर्थः
न्यथा च लिंगपदसम ० भिव्याहारादेव तादृशपदाय र्थस्वीयलिंगत्वौपयिकत्वलाभः तेन लिंगपदाभावे समानपदान्तरलाभेन लिंगपद
मपि समानपदान्तरादृशार्थलाभे नात्पर्यग्राहकमिति नासंगतिरिति भावः अतिव्याप्तिरिति आम्नाहेरपि अगृहीताप्रामाण्यकवन्त्याद्यनुमि
त्यो व्यापि वह्निमादिपरामर्शकालीनवन्ह्याद्यभावानुमितिसमये विपत्स्यति प्रतिसद्भव वह्न्याद्यनुमितिरूपकार्यकत्वेन सत्प्रतिपक्षव्यवहारः स्यादिति भावः
असंभवाच्चेति लिंगादित्यादि इत्यादि च लिंगस्याकरणत्ववादि मूलकारमते संभवदिति भावः विरोधिपरामर्शसाधारण्ये हि नाप्रामाण्यकस्य विरोधिपराम
र्शस्याप्रतिरोधकत्वात् न विशिष्टस्वं तो यावज्जननक्षमावच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वरूपयोग्यताया गृहीताप्रामाण्यकपरामर्शः सत्वे नासीमा
कार्यप्रतिरोधानुधावनं व्यर्थमित्याशयः नाह अत्रेत्यादि तस्य तद्दलस्य नातिव्याप्तिरिति न्यायार्थकार्यप्रतिरोधानुधावनं व्यर्थमित्याशयः यद्विवेचना
उक्तेरभिप्रायं प्रकाशयति वस्तुत इत्यादिना तन्नाम यस्मा अपि वह्न्यभावव्याप्यवत्तापरामर्शसामग्र्या अपि विरोधित्वे नेति विरोधिसामग्रीत्वे
नेत्यादिना घवाद्युद्घातितिरिक्तविरोधिनः सामग्र्या अविरोधित्वाद्याह तदभावस्पष्टतिवन्ह्यभावव्याप्यवत्तापरामर्शाभावस्येत्यर्थः न यावद्विमानस्य

423

टी०

भावव्याप्यत्वांशेऽन्यथा कार्यकाऽनुमितिः तादृश्यनुमितिः तेन कार्यप्रतिरोधोपादानेन तत्रैव तादृशस्य लाभ इति · उभयं कार्यप्रतिरोधाजनितवि
रोधित्वोभयं · विशेषणं परामर्शविशेषणं · तेन वह्निव्याप्यवानिति परामर्शविषये · प्राचीन परामर्शस्य · वह्निव्याप्यवानिति परामर्शस्य · विरोधि
परामर्शेति वह्न्यभावव्याप्यवत्तापरामर्शस्यार्थः कार्यसामान्यस्यैव प्राचीन परामर्शकार्यसामान्यस्यैव · प्रतिरोधादिति यदा कदाचित्प्रतिरोधस्यैव
निवेशादिति भावः · अन्यथा · सर्वदा कार्यप्रतिरोधस्य निवेशे · प्रसंगादिति सर्वदा कार्यप्रतिरोधस्य तत्राभावादिति भावः · प्रयुक्त इति तत्पाचोक्तरीसाति
व्याप्तिरप्युक्तेति भावः · अन्यथा उभयविरोधिसत्वे कार्याभावस्यास तरमात्रप्रयुक्तत्वे · अजनितबोधत्वेति विशेषणानन्वितं अजनितबोधत्वात्म
केति नदर्थः तत्प्रतिरुद्धकार्यकत्वमिति साध्यसिद्धिसमर्थपरामर्शविशेषणीभूतमित्यादितत्कालेति यदा सत्प्रतिपक्षत्वं तत्काले समर्थः स्वकार्या
नुपहितत्वं स्वकार्याभावविशिष्टत्वं · एवं सत्येपि स्वकार्यानुपहितत्वादिति तद्विषयेऽतिव्याप्तिरत इति शेषः · इत्थं च तत्कालावच्छेदेनेत्यस्यावश्य
कत्वे च · तत्प्रतिवध्यत्वम् ॥ ननिवेशनीयमिति प्रयोजनाभावादिति शेषः · इदमुपलक्षणं बाधोपस्थितिसमर्थपरामर्शविशेषणीभूतमजनित
विरोधित्वोभयमपि तत्कालावच्छेदेन स्वविरोधित्वोधाभावविशिष्टमेव न तु जननेन तत्रातर्भावनीयं प्रयोजनाभावात् कालान्तरमादायातिप्रसंगवा
रणाय तत्कालावच्छेदेनेत्यस्यावश्यं निवेशनीयत्वादित्यपि द्रष्टव्यं · अत्रेदं बोध्यं तत्कालावच्छेदेन स्वकार्याभावविशिष्टत्वं स्वसामानाधिकरण्याव

राम०

424

च्छिन्नत्वाव्यवहितपूर्ववर्त्तित्वसंबंधेन साध्यानुमितित्वाभावविशिष्टत्वं एवं तत्कालावच्छेदेन स्वविरोधिबोधाभावविशिष्टत्वम व्युत्क्रमसंबंधेन विरोध्यनु
मितित्वाभावविशिष्टत्वं तेन नानुगमः। व्यधिकरणसाध्यानुमितिमादाय दोषवारणाय स्वसामानाधिकरण्यनिवेश इति फलनइत्यस्य फलानुरोधा
दित्यर्थमभिमतस्यभावमादाय याप्यतइत्यादिनाऽज्ञानकतयाविरोधिबोधाजनकतया उक्तस्थलेपीति पदद्वयमात्रारोपितेव्युत्क्रमेति शेषः सत्प्रतिपक्ष
स्थले तत्रोपगमात् विशेषणतांविरोधिबोधकाम्यत्वविशेषणं अतएवेति द्वितीयलक्षणइति शेषः प्रथमलक्षणोपसमर्थनं निवेशनैव वैयर्थ्यमारा
प्रयोजनासंभवादिति भावः तत्प्रयोजनं तादृशाविशेषणप्रयोजनं आहेतिमर्पकाणेतरेणेत्यादिफलतः तादृशलिंगातिप्रसंगवारणाय फलानुरोधा
त् स्थानविशेषणामेवेति अमव्याप्यव्याप्यतेगमकतोपयिकरूपेणाज्ञायमाने धर्मिताव्यापि विशेषणानुलाभेन आप्तादिरूपस्य तस्य विरोधिबोधकतयाति
प्रसंगतादवस्थ्यादिति भावः कारणाभावात् कारणान्तराभावात् प्रतिबंधकत्वात् प्रतिबंधात् अतिव्याप्तिरिति प्रकृते हेतुपरामर्शजगदितानाप्रामाण्य
त्वनिवेशे वाऽप्यानुविशेषणादेयर्थ्यमिति हृदयं तत्पदेति अप्रमात्वविशेषणोत्सर्गः लाभादितिरितस्तात्पर्यमात्मस्यगतहृतकत्वे वाप्यान्तविशेषणसार्थ
क्यमिति भावः नन्वेवं पूर्वलिङ्गादेतस्याभेदस्यतआह गमकतेति पूर्वस्मात् पूर्वलिङ्गात् इत्यधिकतावनुमितिजनकतादितिनच विरोधिपरामर्श
सामग्रीरूपप्रतिबंधकसत्त्वादनुमितिजननासंभवइतिवाच्यं तादृशसामग्र्याप्रतिबंधकत्वानेगीकर्तुरवैतदाशंकनात् व्याख्यायामनभिधाना

टी.

दिति मूलं रहस्यमनुपपन्नं तत्राविरोधात् आधिक्यप्रसंगाविरोधात् तत्प्रतिरुद्धत्वेनेति तत्प्रयुक्तकार्यानुत्पादेत्यर्थः अविरोधित्वेनेति मानाभावादनु
मितावित्यादिः प्रतिबंधे प्रतिबंधे वा अप्रयोजकत्वादिति अत्र मानाभावा यास्यादिभंगत्वाने प्रयोजकत्वेमनुमितावविरोधित्वेनानुमितिप्रतिबंधे
प्रयोजकत्वमिति दूषयंति अत्राविरोधित्वेनेत्यत्राविरुद्धत्वेनेति पाठे विरोधित्वेनेत्यस्यैव तद्घर्षकत्वेव यथाश्रुतमेव सम्यक् पदकृत्यमिति मूलं रहस्ये शे
षः अन्यथा अनुमितिप्रतिरोधस्यानावश्यकत्वे तादृशस्य वह्न्यादि सहशस्य उक्तानुक्तेति पूर्वमित्यादिग्रंथस्यैतदुपन्यासे संरक्षेत्यत्र नात्राचयः
अत्रेत्यस्य प्रकृतहृदादौ लिंगाभावेनानुमितिप्रतिरोधइतिय यथाश्रुतार्थे संगतिः तत्रैकथापापमित्यादेरसंहेनुत्साहत आह लिंगाभावेनैवेत्यादि तादृश्येरा
प्रहृतत्वादिना विरोधिवाक्यस्य पक्षेन साध्यमित्यादिवाक्यस्य तादृशेति पाकृबोधप्रयोजकेत्यर्थः एवमग्रेऽपि प्रतिबंधकत्वं प्रकृतसाध्यानुमितिप्रतिबंधक
त्वं वैपरीत्यमेवेति विरोधिवाक्यस्य यत्प्रतिबंधकत्वमावश्यकं तन्नहेतु परीत्यमेवेत्यर्थः प्रकृतसाध्यानुमितिजनकपरामर्शस्यैव विरोधिवाक्यजन्य शाब्दबो
धेन दृश्यमानत्वाप्यवगाहानमुद्धयाविरोधित्वादिति भावः विरोधिवाक्यस्य स्वानंतरं अविरोधित्वे मानाभावेन तदभिप्रायकमुक्तमित्याशंकां ताराम समंजस
मित्यालोचविरोधित्वानसामर्थ्यत्वेन तस्य प्रतिबंधकत्वमाह यावनारत्तानंतरमाह यद्वेति ति अत्र बोधोत्पत्स्य विरोधिवाक्यबोधोत्पत्यर्थः परामर्शस्येतिप्र
कृतसाध्यानुमितिजनकस्येति शेषः वानुमितिः न प्रकृतसाध्यानुमितिः भावेवेति तादृशपरामर्शस्येत्यादि तस्य तादृशपरामर्शस्य शाब्दबोधेति विरो रामः

धिवाकाजन्येत्यादिः न इमावेति प्रतिबंधकाभावेत्यर्थः सामग्र्यभावादेवेति कारणाभावस्यैव सामग्रीकारित्वमिति भावः संशयत्वस्य जन्यतावच्छेदकत्वेत
रवच्छिन्नोत्पादकसाधारणधर्माद्दिज्ञानाभावादेवेन संशयानुमितिरित्यत आह दृढेति धर्तौ रत्नकोषेति व्याख्यायां तादृशेति एतत्कल्पनादित्यर्थः अन्यासे
नवरत्नकनिष्ठत्वाभ्युपगमेन यामवेशेन च चकारात्किंचिदंशांशेपि ग्राह्यः अनुयदृश्येत्येतेन यत्रोभयविषयत्वमितत्र कत्यकंतत्वनुस्यूतत्वमस्त्यमिति
यावत् एकधर्मिकेति अत्र संशयत्वघटकविरुद्धत्वस्यापि विरुद्धत्वमेवेति नानाधर्मिकेति अत्र संशयत्वघटकस्य धर्मिविशेषणोक्तत्वस्य प्रकारे
प्रकारविशेषणता नानात्वस्य च धर्मिणितप्रवेशः नानाधर्मिकविरुद्धेति अत्र संशयत्वघटकप्रकारतानानात्वस्य धर्मिरूपपितद्वैतत्व(प्रकारा) परित्या
गेन प्रकारे विरुद्धत्वापरित्यागेन विरुद्धत्वस्य च प्रवेशः एकधर्मिकेति अत्र च प्रकारे विरुद्धत्वं नानात्वं च परित्यज्य विरुद्धत्वोभयत्वयोः प्रवेशः यथा
स्थाणुधर्मिकेति। अत्र स्थाणुधर्मिकत्वे स्थाणुत्वनिकटत्वेन स्थाणुत्वप्रकारकत्वे स्थाणुत्वतदभावादिज्ञानत्वे रेङ्गियादि स्थाणुत्वोस्थाणुत्वप्रकारकत्वे
बाधाभावादिति यावत्तद्बोध्यं अनयैव दिशा अन्यदपि बोध्यं क्वचिदेव संशयादिरित्येतच्चिन्त्यम् समुच्चयादिरूपेण कोटिनियामकमिति तथा च संशयत्वस्य जन्य
तावच्छेदकत्वेन कुत्रचित् सामग्र्या एव तत्र नियामकत्वसंभवतीति न सर्व एव ग्राहकमिति भावः संबंधविधयेति अत्र विरोधित्व प्रतियोगितानाम संबंधविधे
ये धित्वरूपप्रतियोगित्वसंबंधेनाभावे प्रतियोगिनः संबंधतया भासते भावद्वयकोटिकसंशय समन्वेतु एक कोटिविरोधापरकोटिसंबंधो धर्मिता

427

दी०

कोट्योः संबंधतया भासेनेत्यपि विवेकः अधिकं मम हृदयमिति व्याख्यायां व्याख्यातोक्तं द्रष्टव्यं असंसर्गाग्रहदशायामभावः असंसर्गाग्रहसहितेः
यामावः विशेषणतान्मनादिरिति ध्येयम् संसर्गाग्रहादिपरिपूरकः के चित्तु विरोधज्ञानोत्तरवर्तिनि तदभावप्रकारकज्ञाने समुच्चयः तद्धेतुत्तरवर्तिनि तद
भावप्रकारकज्ञाने संशयः इत्येव विरोधविषयकस्यापि संशयत्वं कथंचिद्विरोधभानस्योपपादितं यत्र रसीय्य नेभ चित्तु चित्संशया येत्तु तदपीत
यत्तु विरोधविषयकज्ञाने स्यैव संशयत्वं कश्चिदिति स्पष्टं तु भवित संशयानात्मकज्ञाने स्वयमीत् न चैवं तदनुत्तरं स्वप्रविरोधत्वं यत्पृथिवीवेत्याद्युक्तस्या
पि संशयत्वापत्तिभावद्वयकोटिकपांशयानुरोधेन तदभावपदस्य तद्भिन्नधर्मपरत्वादिति वाच्यं भावद्वयकोटिकसंशयास्वीकारात् अस्तु वा त
दुभयविरोधतायोतस्व प्रतिदुभयप्रकारकज्ञाने संशयः इत्यमेव विरोधसंसर्गव्यापकताबुद्धिं विनानुमितेर्विरोधविषयकत्वासंभवात्कथं सं
शयत्वमिति तत्त्वकोपकारमनहूबताव्युत्पादितः कथंचिद्विरोधभानस्योपपादितत्वात् संशयच्छेदानुमितिसंशयपक्षायामके सपक्षविरोधभा
नेसामग्रीसत्वान्ननुमित्यादित्युपेतमेवेति तद्व्याप्तिग्राहकवस्तुतः सर्वत्र संशयमे विरोधभानेपि न क्षतिः अवच्छेदकत्वस्य व्यापकत्वाघटकत्वेप्यनुमि
तौभानवद्विरोधस्य व्यापकत्वाघटकत्वेप्यनुमितौ भानसंभवात् पृष्ठ सर्वविरोधिविषयकप्रकारे राव्यापकजातेर्हरत्वरत्वकौमयत्वसंशयानुमितिरपेय
तद्धर्मपानहेतौ अधिकं मम पत्र मत्कृतौ द्रष्टव्यं अत्र संशयेतरज्ञानत्वरूपनिश्चयत्वस्याजन्यतानवच्छेदकत्वेनीलेतरघटत्वं मयमिदृश्यंते सं

रामः

130

428

स्फुरत्वादुपेक्षमहद्व्यांतांतरं योजयन्ति निरुक्तमित्येतिनदभावाप्रकारकज्ञानवत्त्वपनिरूपमेत्यर्थः द्वितीये घटत्वाप्रकारकेत्यादि तृतीयं एकधर्मिकेत्या
दि। इति दीधितौ संशयानन्यज्ञानत्वादिति। आदिनातदभावाप्रकारकज्ञानवत्त्वम् एकधर्मिकविरुद्धानेकप्रकारकज्ञानान्यज्ञानत्वपरिग्रहः अत्र प्रत्यमे
संशयत्वं मानसत्वव्याप्यजातिविशेषो विषयताविशेषो वेत्याशयस्तेन न योन स्मा तन्वेककोटिज्ञानसामग्र्या अपरकोटिकपरोक्षज्ञानमात्रे
प्रतिबंधकत्वस्य संशयमनुशाब्दवारणाय स्वरूपत्वात्कथं संशयानुमितिरत आह अत एवेति एतद्वचनारस्यानुसारेणैव न त्वाव ख्या ख्याया
मत एवैककोटिकेति आह येव साक्षादेव एवकारार्थमाह नत्विति प्रत्यक्षसमारोपितमनोरूपप्रत्यक्षसामग्र्या सहकारिणोनकोटिद्वयोपस्थितिजनक
तयेत्यर्थः प्रामाणिकसंशयेति मानसिकसंशये इत्यर्थः इति दीधितौ संशयसामग्रीति निरुक्तोभयकारानुपस्थितिरिति शेषः तथाच संशयात्मकशा
ब्दस्यैतेरनौकारानुपथानाद्र शाप्रतिबंधकत्वमेवाक्षर्मिसाधारणः व्याख्यायांतदेवेति फलबलकल्प्यत्वमेवेत्यर्थः दर्शयिष्यति उदाहरिष्यति शिष्य
दर्शयिष्यति दोषविशेषेति पित्तादिदोषेत्यर्थः असाधारणधर्मविशेषवत्त्वानुकोटि ततः पीतत्वप्रत्यक्षसामग्रीतः तत्संशयेति पुरुषत्वसंशयेत्यर्थः अनु
शायइति तथाच संशयात्मकस्मरणवारणाय यथासंस्कारस्य निरूप्यानुमित्यनियतवाद्यनवच्छेदकत्वं तथा परामर्शादिर्निरूप्यानुमितिकानुमि
तित्वमपि जन्यतावच्छेदकं वाच्यमिति न संशयानुमितिसंभव इति भावः इति दीधितौ किंन स्यादिति तथा चानुभवविरोधाभावे इष्टापत्तिरेवेति

दी·

(131)

भावः वस्तुतस्तेन भवविरोधएवोक्तस्तादृशपदेनानुभवेतिवाधपदादृश्यविरोधपरत्वमित्याशयेनाह आख्यायां अनुभवविरोधेनेतिवस्तुतस्तु अनुभ
वविरोधेनेत्यत्र अनुभवविवादेनेत्यर्थः भावः यद्दीधितौ भवेः ननु तर्हि संशयाकारस्मरणावारणाय निश्चयात्मकस्मृतित्वमेव तन्मतावच्छेदकं वा
च्यं न यावदोक्तरीत्या न संशयानुमितिसंभवइत्यत आह वस्तुतः इति एतदर्थं संशयाकारस्मृतिवारणार्थं नेह साध्यमिति तत्र समानविषयत्वे
नैव विरोधित्वमिति भावो मतानुसारेणासाध्याभावप्रकारकनिर्णयमुपेक्ष्य साध्याभावविशेष्यकनिर्णयत्व कः केचित्तु विरोधित्वमकारेण निर्ण
योपात्तत्वविरोधी न तत्संबंधेन साध्याभाववत्ताव्याप्ययोर्निर्णयो विरोधि स्यादितत्र निरासाय साध्याभावविशेष्यकनिर्णयत्वकः तथा च साध्याभावादेर्वि
शेष्यतयैव भानात्तद्विरोधसंसर्गकमपि तयोर्ज्ञानं विरोधीति वक्तुं शक्यमित्याशयइत्याहुः स्वरूपतः तदभावत्वावच्छिन्नग्रहत्वेन विरोधिविषयत्वे
न विरोधित्वावच्छिन्नविषयत्वेन एवं तद्ग्रहेतरभावग्रहस्य स्वरूपतएव विरोधित्वे तद्ग्रहापत्तिरिति विरोधिग्रहेन तदभावग्रहस्य विरोधित्वेन तु अप्रा
प्यत्वं स्त्रित्वप्रमद्दशायाविरोधित्वे तत्ग्रहासंभवाप्रमापत्तिरिति हृदयं तादृशात्मिं मेति अप्राप्यप्रतिबंधकतायां प्रतिबध्यतावच्छे
दककोटौ अनुप्रवेशादितिनयाच तादृशाप्रमदशायामप्रमापमानस्य तद्ग्रहस्य प्रतिबध्यतावच्छेदकानाक्रान्तत्वान्नोक्तापत्तिरिति भावः अविरोध
ग्रहेत्यादौ तादृशाप्रमात्वग्रहे प्रतिबंधकत्वात्कोपतिबंधकत्वान्तरोक्तौ अयं यदीत्यादिना दीधितौ अस्मृतविनिर्ति प्रकारतये त्यादि इत्यत्र

430

राम०

तितात्पर्यमित्यनेनान्वयः ननु तद्भाववद्व्याप्यत्वरूपविरोधकारकत्वस्यानिवेशाभोजद्दोषस्य स्वतन्त्रस्याह साध्याभाववत्ताज्ञानस्येति स्वरूपत एवेति
व कारणतादृशविरोधप्रकारकत्वव्यवच्छेदः तत्प्रकारकतया तादृशविरोधित्वप्रकारकतया स्वरूपत एव साध्याभावव्याप्यवत्ताज्ञानत्वेनैव एत
दनुरोधेन सत्प्रतिपक्षत्वादिमादिदोषव्यवहारानुरोधेन दोषविशेषज्ञानस्य ज्ञानस्यैव दोषविशेषज्ञानमलौकिकसंनिकर्षजन्यमानाहार्यत्वानवमे
व तस्य तद्भाववद्व्याप्यवत्ताज्ञानस्य दीधितौ ज्ञानत्वादेकरादिप्रमेयत्वादिस्यमाना वाद्यभाववद्व्याप्यकरादित्वेन यावत्त्वादि मतान्नमेयत्वमर्थः तथा चाबा
न्नस्यापत्तत्त्वादि लौकिकप्रत्यक्षापत्त्यालौकिकसंनिकर्षजन्यत्वनिवेशपात्करीत्या प्रतिबंधकत्वेन संभवतीति भावः व्याख्याया तद्धर्मित्वेनैवेति
यद्धर्मिकसंन्देहविशिष्टधीर्न भवति तद्धर्मित्वेनैव तत्पात्सात्विशिष्टबुद्धिप्रतिबंधकत्वात् तादृशानुमितिरिति शेषः यानुमितीत्यर्थः तथा
प्यवत्ताज्ञानकालीनतद्भाववद्व्याप्यवत्ताज्ञानमयीनां प्रतिबंधकत्वात्कल्पनादिति भावः तत्संग्रहाय प्रतिबध्यमसंग्रहाय लौकिकसंनिकर्ष
संग्रह इति इदमुपलक्षणं इच्छासंग्रहोपि इदयमस्तेनाहार्यप्रमहेनव्यभिचारः एवं लौकिकसंनिकर्षाद्यजन्यत्वस्य प्रतिबध्यतावच्छेदकत्वे इत्यत्र इ
त्युक्तेत्तद्संग्रहः उक्तस्थलीयस्यापत्त्वादि लौकिकप्रत्यक्षासंग्रहः ननु तर्हि सर्वत्रैव तत्तद्धर्मित्वेन प्रतिबंधकत्वमास्तां तथा च संशयानुमि
तिरागतैवेत्यत आह यावतामिति मतान्तरमाह नादृशेति उक्तस्थलीयेत्यर्थः बाधमिति प्रतिबध्यतावच्छेदकमित्यादि विशेषणानामावश्यकता

टी॰ १३२ 432

ह्रदाहृरस्यत्लाघवमावाभावाच्च॰ इत्यप्याहुरिति॰ नाहृदाहृरस्यन्वाहीनामननुगमेनजन्यतावच्छिन्नत्वरूपपर्यवसानेननैवप्रतिबध्यत्वमुक्तमितिमस्वर
साक्षाद्बोध्यः संनिकर्षजन्यमितिसंनिकर्षाद्यजन्यमित्यर्थः मनुदोषविशेषादिजन्यतानामननुगमेनकार्यतावच्छेदकाननुगमइत्यतआहतावदेवेति
नवज्ञेयत्वावच्छिन्नभेदेत्यर्थः निरवच्छेदत्वेनैरपेक्ष्यत॰ नार्थसमाजेतिबाधकाभावस्यापिनत्रनिवेशोनात्रबाधकसत्वात्तन्नेतिभावः स्वप्नावबाहि
तिसामानाधिकरण्यंमनुवर्थः तत्प्रकारकज्ञानत्वेनैवेतितथावद्दोषविशेषाजन्यत्वादीनांप्रतिबध्यतावच्छेदके निवेशात्नार्थसमाजग्रस्तत्वशंके
तिभावः तद्भावस्यसाक्षात्संबंधावच्छिन्नदोषविशेषाद्यभावस्यदोषविशेषजन्यमेतिदोषविशेषजन्यत्वमादायेत्यर्थः नादृशपरंपरासंबंधेनेतिया
दृशसंबंधेनेंद्रियनिष्ठदोषादेरात्मनिसत्वंनादृशेनेत्यर्थः सत्वस्याश्रयेंद्रियसंयुक्तमनस्संयोगःमानाभावादितितथाचतत्संबंधावच्छिन्नाभावनिवेशो
नसंभवतीतिभावः नाद्येतिदोषविशेषाद्यजन्यत्वेत्यर्थः तथात्वे॰प्रतिबध्यतावच्छेदकत्वे-तथा॰प्रतिबध्यतावच्छेदके॰ अनन्वेत्यादिवक्ष्यमाणाहृद
रागाहाहृवक्ष्यतस्त्विति विरोधित्वप्रकारेणाख्यापकतायामहेपरस्यसंशयानुमितिसंभवादाह विरोधित्वेनेतिइत्थमुपलक्ष्यतांविरोधसंसर्गेणात्वपिबोध्यं
नेनविरोधसंसर्गकसंशयानुमितेरप्यसंभवःसर्वथाविरोधाप्रतिसंधानेसमुच्चयात्मकानुमितौविधायकनेरादृप्रकारांतरेणातिव्यापकत्वमग्राह्यविष
यतयेत्यर्थः भानेइति सतिसमभीवाहितइभावव्याप्यवज्ञानानादिनियमः अस्वेवसंशयानात्मकेतिपाठःपरस्यसंशयात्मकानुमित्यापादाने

राम॰

नह्येषापेत्यत आह संशयानात्मकेति यमाहार्येति उक्तहार्यायांसंशयानात्मकानुमितौ वेत्यर्थः न कस्यापीति तथाविधायामितर्न संभवतीतिभावः
संप्रति पङ्क्तिः संगतिः नचैवं स्थलेयरस्य संशयसामग्रीसत्वेन तत्रैव व्याप्तिस्तद्दत्तानात्मकायत्तौ स्वाधार्यस्वाभावान्नेतिवाच्यं अनुमितौ विरोधिभा
न प्रतिबंधकतद्धार्योपकत्तनउक्तायतेस्संभवात् कश्चित्तु वह्नौ तद्भावव्याप्यवत्तास्य तद्धिलिङ्गेन संज्ञ्यात्मकेसेनपाठः तस्यचायमाशयः वह्नेव
द्वभावव्याप्यवत्ताज्ञानेनवह्न्यभावानुमितौ आपमानायांप्रतियोगितयोर्यस्मिन्नस्यवह्नेरपि वह्न्यभानेबाधकाभावः तद्धिधेयकानुमितावेवतथा
प्यवत्ताज्ञानस्यहेतुत्वात्सत्यपि तस्यद्दृशायामेवतत्वकोपकारेणासंशयानुमितेरुपगमात तत्रैव स्यापि तत्संगतिरिति पूर्वं तु उक्तपाठः केचित्तु सा
द्विकल्पमारागासेद्दर्भाविरहइति नसांप्रदायिकइतिधेयेपक्षविवपह्निनेद्दभावव्याप्ये ति अग्रिमेवरसंशयात्मकेतिपारोक्ति सविरोधिसेनव्यापकतागृहक्ता
त्तएवरत्नकोषकृता संशयानुमितिसंगीकाराभिप्रायकतयायोऽग्नीयःकल्प्यः अगत्यावधेयत्वपाविकल्प्यं अतः उक्तप्रतिबंधकातत्कुत्रापितिदोषः
संशयात्मकत्वनुमितिरिति संभवतीतिदोषः अत एव उक्तप्रतिबंधकत्वस्यावच्छेदकत्वादेव वह्निप्रतियोगिकत्वे विरोधिवह्निप्रतियोगिकत्वे सम
र्थनमितितद्रूपावच्छिन्नाभावव्याप्यवत्ताज्ञानस्यैवतद्धर्मावच्छिन्नविशिष्टबुद्धिप्रतिबंधकतयासंशयानुमितिवारणासंभवादित्याशयः प्रमु
क्तमितिउक्तरीत्यावधेयकल्प्य -- यानत्प्रकारकानुमितौ तद्भावप्रकारकानुमितिसामग्र्याः प्रतिबंधकतयातादृशसंशयानुमितिवारणासं

१३३

टी०

भवादित्तिभावः एतेनतत्र दिग्धाऽवधएककल्प्यप्रतिबंधकत्वेन शाब्दादिकं संशयात्मकशाब्दादिकंव्याख्यातं प्रत्युक्ततेनव्याख्यातं प्रथमाशयः शाब्देनिश्चयोनवे
तिवाकात्निसत्साधुपस्थितौ आह सैवयाशाब्दसंशयउत्पद्यतेइदमपिनसम्यक्विरोधस्यपदार्थानुपस्थितौविरोधाप्रसंसर्गतया कोद्याद्दित्तानदशायां
प्रकारांतरेणाविरोधज्ञानेनिश्चयत्वनदभावोभयविषयकसंशयानात्मकशाब्दापत्तिवारणायतत्प्रकारकशाब्देतदभावप्रकारकशाब्दसामग्र्याः प्रतिबंधक
त्वस्यावश्यकल्प्यतयासंशयात्मकशाब्दासंभवात् एवमप्यत्राथौ साद्दित्वपुनःशेत्याबोध्यमिति ननुतथापिदोषविशेषाद्यज्ञमप्यभावाहिताय दनुगतप्र
तिबंधकत्वमुक्तंतत्रसम्यक्तावन्देहानामेकत्रनिवेशेननैषांविशेष्यविशेषणाभावेविनिगमनाविरहेणानंतप्रतिबंधकत्वस्यावश्यकतयातत्रद्यपि
त्वेनप्रतिबंधकत्वस्यैवौचित्यमाह तत्राहप्राधिकमिति प्रपंचितं अत्रतरतात्पर्याभासक्षितं प्रथमाशयः विशेष्यविशेषणाभावानापत्तेयुतावदेहेषु
व्यासज्यवृत्त्येकावच्छेदकतायाअभ्युपगमात्तानंतप्रतिबंधकतावश्यकत्वमितिएतत्तत्वेपूर्वमेवोक्तं गौरवादिति प्रत्येकभिन्नतज्ज्ञानत्वस्यावच्छेदक
त्वेषविशेष्यविशेषणाभावेविनिगमनाविरहरूपपुनःकारणातादृशेन गौरवंचावच्छेदकतायाव्यासज्यवृत्तित्वोपगमादेवनसंभवतीत्याशयः नद्याक
त्यनेतिप्रतिबंधकताकल्पनेतप्पर्थः नस्यःसंशयस्य विरोधिविषयकमपिविरोधाविषयकंवत्तत्वात्याविरोधिविषयकमपिठक्तनेमेणःसंशयात्मा
त्मकानुमित्यापादनक्रमेणाकल्पनंआवश्यकमितिशेषः नाहदोषेतिदोषविशेषाद्यजन्येत्यर्थः नचैवंशाब्दाद्यैश्वाशेषणाप्रतिबंधकत्वकल्पनेगौरव

राम०

मत आह शाब्दादाविति प्रतिबंधकत्वमिति विशेषदर्शनस्येत्यादि असिद्धमेवेति विशेषदर्शनस्येयोगपत्ताज्ञानविरहस्येव आत्माद्यनुमत्यसंभवादित्या
शयः नत्वानुमितिः संशयानुमितिः निराकार्यैवेति शेषः इत्याहुरिति अत्र तदनुमितिसामग्रीकाले तदभाववमानसवारणाय तदभाववमानसंप्रति
तदनुमितिसामग्र्याः प्रतिबंधकत्वमावश्यकं एवं चात्रैव मानसत्वमनिवेश्यज्ञानत्वं निवेश्यानाहार्यतदभाववज्ज्ञानत्वमेव तदनुमितिसामग्र्याः
प्रतिबध्यतावच्छेदकमिति न संशयानुमितेर्निराबाधत्वमित्यस्वरसोऽस्य बोध्यः कथमिति प्रतिबंधकस्य विशेषदर्शनस्य सत्त्वादित्याशयः साध्यवि
परीतत्वानेति साध्याभावानुमितावित्यर्थः तत्पक्षेति कर्मधारयः एवमपि शेषपरशेपि- मत्येकस्य पक्षधर्महेतौ व्याप्तिबाधस्य अपक्षधर्महेतौ पक्ष
धर्मताबाधस्य च असंभवेपि मिलितस्यैव वह्निमान्धूमादित्यादावबाधस्य वह्निरनुष्णः कृतकत्वादित्यादौ वह्नितीयस्याप्यसंभवेरित्यर्थः यत्किंचिद्धेतौ व्याप्तिप
क्षधर्मतान्यतरबाधस्य सद्भावनियमसंगादाह अन्यतरेति विति होक्षितावन्यतरबाधतेति तथा च तदन्यतरबाधमूलकत्वमेकमेवलक्षणमितिनाव्याप्ति
रितिभावः व्याख्यापो साध्यजितासेति साध्यस्याविषयितासेत्यर्थः अनैकांतिकेति तस्यापि साध्यसंदेहद्वारा साध्यजिज्ञासाप्रतिबंधकत्वादितिभा
वः अतिव्याप्तिरिति इदमुपलक्षणं संसाध्यजिज्ञासायाः प्रकृतानुपयुक्तत्वमित्यपि द्रष्टव्ये स्यादितीति एतस्य हेतुत्वेन खंडने न्वयः सिद्धत्वमेव तिद्धंद्वसमा
साध्यपरामर्शादिति भावः प्रकृतेनेति तथा चात्र तत्सुरूपआश्रयणीयमिति भावः तत्वस्य तन्निष्ठासाधारणधर्मरूपतया तज्ज्ञानसाध्यतंत्रतितासा

१३४

टी०

नसंभवतीत्यतआह तथा चेति । विकल्पः ज्ञानेष्टसाधनताज्ञानासंशयायोद्धेतिमलोक्तविकल्प, मानाभावादिति अतिव्यवधानेनान्वयासिद्ध्यादि

तिभावः समीचीनत्वेति व्याप्तिपक्षधर्मतावत्त्वे समीचीनत्वं तदभावश्चासमीचीनत्वं तथा च परामर्शयोः प्रमात्वाप्रमात्वसंशये पर्यवसानं बोध्यं

असंगतमिति इदं च मूलस्य नाशाय इदं नाशोमप्रतिपरपिम्याशयेन यथाश्रुते पूर्वपरामर्शनाशस्याग्रिमविशिष्टज्ञाना नो मल्लिकासहत्तिनयाऽसंग

त्यभावेनासंगत्यापत्तेः द्वित्वं द्वित्वबोधकं द्विवचनं तेनापि पक्षधर्मताज्ञाने नापि । अन्यत्राविती ति अग्रिमविशिष्टज्ञानोत्पत्तिपूर्वक्षणमुत्पन्नपदं ता

नाप्याप्तिमिति प्रयुक्तत्वे पंचमीद्विवचनार्थः यथाश्रुतमिति अग्रिममिति शेषः व्याप्तिपक्षधर्मतयोरेवेति सविशेषणत्वेऽप्रतीतिमापादितिभावः तद

संभवात् सम्मतिपक्षासंभवात् साध्याभावाप्रसिद्धेरितिभावः अन्येवस्यकेवलत्वविशेषस्य केवलविशेषणस्यैवेत्यर्थः न च सत्तायामपि स्वरूपसं

बंधावच्छिन्नघटनिष्ठाभावप्रतियोगितारूपस्य साध्यस्य सत्त्वात् येनत्रव्यभिचारवारणाय सत्यंतोपादानमिति वाच्यं सत्ताभावो नास्तीति प्रतीत्या

सत्ताभावाभावान्मकस्य सत्तापाश्चाभावसाधारणविशेषणतां गीकारे तेन तदभिधानात् केचित्तु दीधितौ सत्तापदं मूले नास्ति पदं च भ्रमत्वाद्युप

लक्षकमित्याहुः दीधितौ न वाधाश्रयासिद्धी इति ननु घटनिष्ठसंयोगादिसंबंधावच्छिन्नप्रतियोगिताकाभिधेयत्वाभावमुभयाभावादिकं वादाय सि

द्धसाधनवारणाय स्वरूपसंबंधावच्छिन्नाभिधेयत्वमात्रावच्छिन्नप्रतियोगिताभावमेवात्र साध्यं वाच्यं तेन चाप्रसिद्धिर्दुर्वारा न च स्वरूपसंबंधावच्छि

राम०

134

436

ऽप्रतियोगिताके घटनिष्ठाभावे ऽभिधेयत्वत्वावच्छिन्नप्रतियोगिताकत्वस्याभिधेयत्वत्वावच्छिन्नप्रतियोगिताके घटनिष्ठाभावे स्वरूपसंबंधावच्छि
न्नप्रतियोगिताकत्वस्य वा साध्यत्वेऽज्ञानदोषइति वाच्यं स्वरूपसंबंधेनाकाशस्य संयोगादिसंबंधेनाभिधेयत्वस्य वा पायवोस्समनियतयोरैक्येन
सिद्धसाधनस्य वारयितुमशक्यत्वादितिचेन्न अभिधेयत्वत्वावच्छिन्नत्वस्वरूपसंबंधावच्छिन्नप्रतियोगितेतद्भिन्नयसंबंधेनाभिधेयत्वस्य साध्यत्वेना
न्वयात् अभिधेयत्वाभावइतिग्रहे तेषां त्रयाणामेव विशेषणानां विशेष्यभावापन्नानां संसर्गतया भानात् अत एव कंबुग्रीवादिमत्साध्यकेन सत्त्वाजिप
ह्यानुपपत्तिः तत्रापि घटनिष्ठाभावे कंबुग्रीवादिमत्त्वावच्छिन्नत्वस्य संयोगादिसंबंधावच्छिन्नप्रतियोगितेतद्भिन्नयसंबंधेन कंबुग्रीवादिमत्त्वस्य साध्यत्वोप
गमात् एतेन स्वरूपसंबंधावच्छिन्नायां घटनिष्ठाभावप्रतियोगितायां घटनिष्ठनिष्ठाभावप्रतियोगितात्वेन हेतुना घटनिष्ठाभिधेयत्वभेदप्रतियो
गितादृशायां तेनाभिधेयत्वत्वावच्छिन्नत्वानुमानेनाप्यरोधासामंजस्यमिति नवीनोक्तं परास्तं कंबुग्रीवादिमत्साध्यके कंबुग्रीवादिमत्त्वावच्छिन्नत्वाप्र
सिद्धौ नवीनैरसामंजस्यादित्यादिकं तु साध्याप्रसिद्धा अभिचारेति समेव नन्त्वादोषव्यभिचारेत्यर्थः व्याप्यत्वाभिधेयत्वस्येति व्याप्याभिधेयत्वोप
न्येनाभावइत्यर्थः तेन वास्तवस्य तत्स्याप्रसिद्धावपि न क्षतिः अप्रसिद्धावेति न यावत्तत्र साध्यविशेष्यकानुमितिरेव तादृशस्थल इति भावः तादृशे
ति पक्षे ऽभिधेयत्वाभाववोधके ऽर्थः विशिष्टवाप्यप्रत्यनस्य न हेतुत्वादिति भावः वोधस्यस्य अभिधेयत्वत्वावच्छिन्नत्वस्वरूपसंबंधाव

च्छिन्नप्रतियोगिताविशेषतावाविशेष्याभावायन्नैतत्रितयात्मकसंबंधस्य प्रतियोगिमत्पक्षत्वादिति अवच्छिन्नापक्षे साध्यव्यापकीभूताभावप्रतियोगि
मत्वपरिग्रहः लाघवज्ञानादिवशाद्यपि व्यापकतावच्छेदकत्वे यो वसाध्याभानस्योपाधापाधिभिरत्यगमात्राहघटीवेति लाघवादिति लाघवज्ञाना
दित्यर्थः अनुमितावितिवन्यंशाद्इति शेषः भासतइतित याचतत्र महानसीयवन्ह्यभावव्याप्यवत्पक्षरूपसत्प्रतिपक्षेऽव्याप्तिः तत्स्यसाध्यतावच्छे
दकवन्हित्वविशिष्टवैशिष्ट्यग्रहाविरोधित्वात् न वतस्यापि महानसीयवन्हिमानितिमाकारकताद्दशग्रहविरोधित्वमस्त्येवमहानसीयवन्हिमा
नितिग्रहस्याप्यधिकंत्विति स्यायेन वन्हित्वविशिष्टवैशिष्ट्यग्रहत्वादितिवाच्यं वक्ष्यमाणरीत्यातादृशग्रहसामान्यविरोधित्वस्यावश्यंवाच्यतया
तस्य यत्किंचितादृश्यग्रहविरोधित्वेपि सामान्यतगतिवन्हिमानितिग्रहप्रत्यविरोधित्वेनाव्याप्तेर्दुर्वारत्वादित्याशयः विषयतावच्छेदके तिविषयता
वच्छेदकतायर्यामधिकरणोप्यर्थः तेन तत्रवन्हित्वस्याप्यनुमितिविषयतावच्छेदकघटकतया नोऽव्याप्तिता दृशस्थले तत्र लाघवज्ञानादिवशा
न्महानसीयवन्हिमानित्यनुमितिस्थले संग्रहइतितत्रमहानसीयवन्हित्वस्यैवानुमितिविषयतावच्छेदकत्वेन तदवच्छिन्नसाध्यवैशिष्ट्यग्रह
विरोधित्वस्यान याया दितिभावः इदमुपलक्षणं यदि वलाघवज्ञानादिवशात्पक्षतावच्छेदकं स्वमप्यनुमितौ वह्न्यंशेप्रकारतयाभासते तेन तदा मस्य
तपक्षपदमनुमितिविषयतावच्छेदकावच्छिन्नपक्षपरं तेनैवन्ह्यभावव्याप्यवत् त्रुयावच्छिन्नपक्षरूपसत्प्रतिपक्षस्यापि संग्रह इत्यपि बोध्यं वक्षुं देखि राम०

प्यत्ताना विरोधित्वाच्चेति तत्राव्याप्तिरिति शेषः यन्निष्ठेति निरूपितवह्निमान्नित्याकारकेत्यर्थः तादृशेति निरुक्तवैशिष्ट्यावगाहीत्यर्थः एवमग्रेपि समन्व
ये· समन्वयेनाव्याप्यभावेः ह्रदान्यत्वेति उक्तायकान्वितमतिपक्षेति वह्न्यभावव्याप्यवद्ध्रदात्मकसत्प्रतिपक्षेत्यर्थः उभयेति साध्यतावच्छेदकविशिष्ट
साध्यपक्षतावच्छेदकविशिष्टपक्षोभयेत्यर्थः वा अग्निमिति तथा च तादृशाग्रहसामान्यं तत्र निरूह्रदो वह्निमान्नित्याकारकग्रहाविरोधित्वान्न वह्न्यभावव्या
प्यव्याप्यवद्ध्रदेति व्याप्तिरिति भावः तथा सति तादृशाग्रहसामान्यविरोधित्वविरहितत्वविवक्षणे सति उक्तरीत्या न्यूनत्वरूपेणासाधुत्वमित्यतः विशिष्यत्वत्तद्वय
मिति वाच्यमिति शेषः अत्रेदं बोध्यं सामान्यत्वस्य व्यापकत्वांशस्य पूर्ववत्तया तादृशाग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबंधकत्वमेव तादृशाग्रह
सामान्यविरोधित्वं· नच दोषविशेषादिजन्यस्याहार्यस्य च ज्ञानस्याप्रतिबध्यतया सत्प्रतिपक्षप्रतिबध्यतायास्तादृशाग्रहत्वव्यापकत्वासंभवेनासंभ
व इति वाच्यं दोषविशेषाद्यजन्यानाहार्यतादृशाग्रहत्वव्यापकत्वस्य प्रतिबध्यतायां निवेशात् न चैवं लाघवात् तादृशग्रहत्वावच्छिन्नप्रतिबध्यता
निरूपितप्रतिबंधकत्वेनैव कुतो न निवेश्यते अवच्छिन्नत्वं च स्वरूपसंबंधविशेष इति वाच्यं तथा सति ह्रदः कांचनमयवह्निमान् कांचनमयह्रदो व
ह्निमानित्याहार्ये वह्न्यभावव्याप्यवद्ध्रदः सत्प्रतिपक्षमयान ज्ञानप्रतिबध्यतायां कांचनमयत्वादेरनिवेशेन तद्दूरितसाध्यतावच्छेदकाद्यघटितता
दृशाग्रहत्वस्य तज्ज्ञानप्रतिबध्यतानवच्छेदकत्वेन तत्राव्याप्तिप्रसंगात् अत एवाविरोधित्वोत्तस्य नैवेयर्थ्यं अन्यथाप्रयासि साधुत्वापकत्वान प्र

439

तिविषयतावांतादृशाग्रहत्वस्यानवच्छेदकतयासंभवेनद्भत्वेनैवहेतुतत्सपक्षतास्यादिति विषयतावच्छेदकत्वं विषयतावच्छेदकतापर्याप्त्यधिकरणत्वं तेनन्द
द्वेववन्हिमान्धूमादिति स्थापनायां हृदोनवन्हिमान्वन्ह्यभावव्याप्यजलवत्वादिति प्रतिस्थापनायां सत्प्रतिपक्षैकदेशे वन्ह्यभावव्याप्यव्याप्यवत्वाद्दा
द्वैयप्रसक्तपक्षसाध्यवैशिष्ट्यग्रहाविरोधितावच्छेदककोटिप्रविष्टैकदेशे वन्ह्यभावव्याप्यवत्वात्मकस्य पक्षसाध्यवैशिष्ट्यग्रहविरोधिनउन्नायकता
पर्याप्त्यधिकरणेनातिव्याप्तिः नासंभव इति वन्ह्यभाववद्वाभावव्याप्यवत्वादेर्हेतोर्निष्ठस्यैव विरोधितयातत्स्याविरोधित्वेनासंभवः स्यादिति भावः उक्त
त्रापीति प्रसक्तपक्षसाध्यग्रहाविरोधीसत्वात्त्रयासिद्धानुन्नायकेति प्रसंगानाद्दवस्यकारणायविरोधिहृपोन्नापरूपमितमत्रवासंभववारणायवि
रोधित्वं विरोधितावच्छेदकत्वं वा ग्राह्यमिति भावः अविरोधित्वांतस्योन्नेयविशेषणत्वमित्याशयेन तत्वये प्रसक्तपक्षेत्यादि [illegible] इति पक्षतान
मितिनवकांचनमयो हृद इति पक्षतानेप्रतिविरोधित्वेन जसमभिव्याहारत्वेप्यस्य पक्षतानविरोधित्वसामान्याभावस्यासत्वमेवेति वाच्यं वन्ह्यभावव्य
प्याद्देरपि वन्हिमान्पक्ष इत्यादिपक्षतानविरोधित्वेनासंभवापत्यापत्किंचित्पक्षतानाविरोधित्वभावस्य विवेश्यः केवलपक्षतानाविरोधित्वेन लक्षणस
मन्वयस्याशयात् नाहरोति अविरोधित्वांतविरोधित्वांतात्त्रांतेन्यथः एतस्य वोन्नेये कांचनमयत्वाभाववत्वहेत्वयः हृदोन्नायकेति तादृशहेतुद्दरूपा
प्रयासिद्धन्नायकेत्यर्थः अन्नोन्नायके सम्यंतद्दलसत्वं स्फुटत्वान्नोक्तं साध्यविशेषणतास्यापीति प्रसक्तेनेत्यादि बोध्येति अयमाशयः साध्यग्रहवि

५५१

मितीति नन्वेवमप्युपनयपदस्याप्रसिद्धिमत्त्वेनाप्रसिद्धत्वानुपपत्तिरेव अत आह काञ्चनमयो वह्निरिति शेषधीनैवाबाधोऽस्त्विति ननु महानसीय

वन्ह्यभाववानितिबाधग्रहस्यवह्निमानितिविशिष्टबुद्धौप्रतिबंधकत्वेनविशिष्टबुद्धिप्रकारतावच्छेदकतापर्याप्त्यधिकरणधर्मप्रतियो
गितावच्छेदकतापर्याप्त्यवगाहिबाधग्रहस्यैवप्रतिबंधकत्वमितिनियमोऽभ्युपेयः एवंच प्रकृतेऽप्यधिकरणकांचनमयत्वावच्छिन्नवन्ह्यभाव
प्रतीतौ कांचनमयत्वमेवप्रतियोगितावच्छेदकतया भासते समानाधिकरणवह्नित्वादिकं तत्र प्रतियोगिन्युपलक्षणतयैव भासते न तस्य प्रति
योगितानवच्छेदकत्वादिति कांचनमयवह्निमानित्यनुमितौ कांचनमयत्ववह्नित्वयोः प्रतियोगितावच्छेदकतापर्याप्त्यवगाहिबाधग्रहस्यैवप्र
तिबंधकतया नोक्तबाधग्रहस्य विरोधित्वमिति किंच सहेत्वाभासस्थलेऽन्यथैवं वन्ह्यभाववानिति बाधग्रहस्यापि महानसीयवह्निमान् वह्निघटो
भयवानित्यादिविशिष्टबुद्धौ विरोधितया प्रदर्शितनियमस्यैवासिद्धेः विशिष्टबुद्धिप्रकारतावच्छेदकताधिकरणानतिरिक्तधर्मप्रतियोगिताव
च्छेदकत्वानवगाहिबाधग्रहस्य प्रतिबंधकत्वेनैव महानसीयवन्ह्यभाववत्ताग्रहस्य वह्निमत्ताविशिष्टबुद्धौ प्रतिबंधकत्वोपपत्तेः इत्यभाववत्ता
निति ग्रहस्य च वह्निमत्ताबुद्धौ तदभाववत्ताप्रत्यक्षतानमुद्रयैव प्रतिबंधकत्वात् एतेन प्रतियोगिविशेषणतया भासमानस्य धर्मस्य प्रतिसमानाधि
करणतयाऽप्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावप्रतियोगितावच्छेदकताया उपगमेन कांचनमयवन्हिर्नास्तीत्यादिभ्रमदर्शकांचन
मयत्वेन वन्हिर्नास्तीत्यादिबुद्धावपि कांचनमयत्ववन्हित्वयोः प्रतियोगितावच्छेदकतापर्याप्त्यभावाभ्युपगमादुपदर्शितनियमांगीका

रामं०

रेपि न दोष इति नवीनोक्तं परास्तं उभयोस्तादृशनियमस्यैवाभावात् भवानंदीप्रकाशे समानाधिकरणावच्छिन्नाभावप्रघट्टके
समानाधिकरणधर्मस्य प्रतियोगितावच्छेदकत्वाभावस्योपपादितत्वाद्वेतिदिक्। ननु कांचनमयत्वेन वह्न्यभाववतिहेतुग्रहज्ञानेऽल्हमयपिवा
रण्यग्रह एव विरोधस्य किं वाधेनेत्यत आह तेन रूपेणेति व्याख्यायां तस्यैव कांचनमयत्वावच्छिन्नवह्न्यभाववद्वृत्तित्वस्यैवार्थः। अवि
रोधित्वादिति तद्धर्मावच्छिन्नव्याप्यत्वहेतद्धर्मावच्छिन्नव्यभिचारस्यैव विरोधित्वादिति भावः। एवं अनुमितावुपनीतभानांगीकारे उप
नीतभाने तत्प्रसंगः। तत्र यत्नांतरं। इहापि अनुमितावपि तादृशदोषाभावान्नोपनीतमानमित्यनुषज्यते। तत्सभाष्ये शेपीति अप्रामाण्य
वादिविजयप्रयोजकमित्यनुषज्यते। यत्सिद्धिर्वाह्निमत्वेऽपि तद्व्यापारसाधनप्रतिकूलस्यैव हेत्वाभासस्य निग्रहस्थानत्वेनोद्भाव्यत्वेनानुमिते
रप्रामाण्यमेव तादृशदोषसंभवइत्याशयः ज्ञानस्यैवेति एवकारेण ज्ञानदृश्यस्य व्यवच्छेदः नव्यासत्यस्यैव र्यमात्रमुच्छिद्येतेति भावः। के
दाचिदिति संदेहान्यकोपप्रवृत्तावितिशेषः। तद्वारणाय इच्छोपनिवारणाय तत्र च उक्तस्थले तस्याविशेषेण निष्कंपप्रवृत्त्यापादनेनेत्यापत्ति
रिति। अनुमित्यत इति प्रत्ययेन समभिव्याहारेण तादृशानुमितिर्द्वितीयक्षणे निष्कंपप्रवृत्त्यापत्तिरितिकल्पते न तत्र वानुभवविरोधान्निष्प्र
पत्तिरित्याशयः एतेनेदमपास्तं तादृशानुमितिर्द्वितीयक्षणे वा दृष्टमानसनिश्चयोत्पत्तौ वा बाधकाभावात्तद्वारणविलंबेन निष्कंपप्रवृत्ते

दी॰१

दी.

171

तु॥ नद्यतश्च॥ न स्युन्नापदादृष्टेनान्तरपदा वच्छेदकत्वेनेष्टापत्तिसंभवादिति परास्तं विशेषदर्शनं विना संशयोऽनन्तरमसह्न-
निश्चयासंभवेन निश्चयप्रकारतारूपावच्छेदकत्वाद्य वह्निव्याप्यधूमवान्पर्वत इति परामर्शान्महानसीयवह्निः पर्वते नास्तीति बाधादेव पर्व-
ते महानसीयवह्न्यनुमितिर्न जायत इति बाधस्य प्रत्यक्षहेत्वाभासत्वमावश्यकमिति यत्तु धर्मितावलेनेत्यादिना मूले ऽऽकंतत्रोपाध्यायो-
क्तं दूषयितुं शंकते दीधितौ न चेति व्याख्यायां विशेष्यत इति महानसीयवह्नित्वादिनेत्यर्थः कारणाभावादेव महानसीयवह्नित्वादिना व्या-
प्यग्रहरूपकारणाभावादेवः कार्याभावेति महानसीयवह्नित्वादिना महानसीयवह्न्यनुमितिरूपकार्याभाव इत्यर्थः विशेषबाधस्य महानसी-
यवह्नित्वादिना महानसीयवह्न्यादिबाधस्य तथा च न बाधस्य प्रत्यक्षहेत्वाभासत्वमावश्यकमिति भावः महानसीयवह्नित्वादिनेति महान-
सीयवह्नित्वाद्यवच्छिन्नाभावनिश्चयपरमित्यर्थः दीधितौ भिन्नेत्यसिद्धप्रकारतावच्छेदकान्यनिष्ठप्रतियोगितावच्छेदकताकाभावप्रकारक-
निश्चयत्वादित्यर्थः बाधबुद्धेः समानप्रकारकत्वेनैव प्रतिबंधकत्वादिति भावः ननु तद्धर्माग्रहं प्रति प्रतियोगितासंबंधावच्छिन्नतन्निष्ठप्र-
कारताकाभाववन्निश्चयत्वेनैव प्रतिबंधकत्वं लाघवात् न तु समानप्रकारकत्वेन प्रतिबंधकत्वं तथा सति तद्धर्मविशिष्टानंतधर्मभेदेन प्रतिबंध-
कतानंत्यप्रसंगेन गौरवापत्तेः न चैवं वह्न्यादिसामान्याभाववन्निश्चयेऽपि यद्वह्न्यादेर्नाभावेऽमानं तद्बुद्धिप्रसंगो गुरुर्वीर इति वाच्यं प्राचीनैस्तामा

510

राम॰

न्याभाववुद्धौ सामानाधिकरण्यापादकत्वप्रतियोगितावच्छेदकांगीकारेणाहोयात् नवैवं वह्नित्वेनाभावग्रहे द्रव्यत्ववह्निरिति वुद्धेरप्यनुदयापत्तिरिति
वाच्यं तस्याः स्वांतरविषयकत्वेन वह्निमन्नानवगाहित्वात् तथा च महानसीयवह्निर्नास्तीति बाधग्रहे वह्नित्वेनापि न महानसीयवह्न्यनु 511
मितिरिति वाच्यं स्वहेत्वाभासत्वमावश्यकमित्याशयेनाशंकते निरवच्छेदेन चेति समानविषयत्वमेवेति स्वप्रकारेण समानप्रकारकत्वमव
च्छेदकं तेन प्रयोजकं व्याख्यायां तद्वदिति महानसीयवह्न्यादिस्थले पृथिवीरूपत्वादिनेति आदिना जलरूपत्वादिपरिग्रहः तत्संशयात्
वायौ रूपसंशयात् तत्र संशये तथानुभवेति पृथिव्यादिरूपबाधग्रहेपि वायौ रूपवान्नवेति संशयानुभवबलादिति भावः समानवि
षयत्वेनैवेति स्वप्रकारेण समानप्रकारकत्वमवच्छेदः स्पर्शादि वायुसमवेतस्पर्शादि क्वचित्पुस्तके वायवीयेति पाठः तत्रापि वायुसम
वेतपिशाचादिरित्यर्थः रूपत्वाद्यभावेति वायुसमवेतस्पर्शादिवित्यादि एतदिति अरूपमेव तद्विषयकत्वमित्यर्थः शंकितमितीतिनया
वस्पर्शादौ रूपं नवेति शंकाविषयः स्पर्शादिरिति शंकितमित्यनेनार्थः रूपत्वसंशये वेति वायुसमवेतस्पर्शादिविषयादिः इति द्रव्या
संशयस्य वायुरूपवान्नवेत्याकारकस्य वायौ रूपसंशयस्य औचित्यादवर्जितत्वादिति रूपत्वसंशयस्य वृत्त्यासंशयोपयोगित्वादिति शेषः
आरोपितमितीतिनयावस्पर्शादौ रूपमित्यारोपविषयः स्पर्शादिरित्यारोपितमित्यनेनार्थः विशिष्टेति रूपत्वविशिष्टेत्यर्थः वैशिष्ट्यं

टी०

वह्वेस्तानिकं तथा पक्षरूपत्वेन स्पर्शादिमत्त्वावगाहनानुमितावित्मर्शः पर्यवसन्नः विशेषणतावच्छेदकनिरूपणप्रकारकनिर्णयस्य
स्पर्शः हेतुत्वादिति तथा च वायुसमवेतत्वप्रकारकं रूपत्वं निर्णयविषयो रूपत्वविशिष्टस्यो विषयत्वमिति तेन ताद्दशाशेषस्य वायोरूपवान्
स्पनुमित्युपयोगित्वमिति भावः यथाश्रुते रसमाहं स्वानित्यादि विशेषणतावच्छेदकांशे सधर्मितावच्छेदकविशिष्टवैशिष्ट्यबोधक
विशेषणतावच्छेदकप्रकारकनिर्णयो हेतुर्नतु रसत्वानित्यादिरकत्वांशे तत्र धर्मितावच्छेदकविशिष्टवैशिष्ट्यबोधधर्मितावच्छेदक
संशयाभावेन कारणता यानिश्चयत्वप्रवेशे प्रयोजनाभावादिति रूपवान्न्यनुमितेरूपत्वांशे तु धर्मितावच्छेदकतया तत्र विशेष
णतावच्छेदकप्रकारकनिश्चयत्वेनाकारणतादिसंगत्यापत्तेः एतेन पक्षित्वमारोपितं वेति वाकारोनास्यायां रूपत्वांशे धर्मितावच्छे
दकनरवच्छिन्नविशेषणतावच्छेदकप्रकारकज्ञानत्वेन तत्संशयतन्निश्चयसाधारण्येनैव हेतुत्वादिति नवीनोक्तमपास्तं संशयानुमि
त्योरितिताद्दशीत्यादिः दीधितौ ताद्दशशंकादिमिति ग्रन्थे रूपत्वशंकारोपे स्पर्शः व्याख्याय संशयानुमित्योः वायौ रूपसंशयानुमित्योः
प्रत्र संपादयत्यानुमितिस्थले च शंकास्त्विति आदिना रोपपरिग्रहः उपेयते इति उक्तरीत्या शंकारोपयोः संशयेनुमितौ चोपयोगि
त्वसिद्धेः संपादयत्युपन्निवत्वात् शंकारोपयोरन्यतमावत्तिभावः पीतत्वमेव तिष्ठत्याभावत्वमेव स्पर्शः द्रव्यमितिति द्रव्यपदानुपादाने स्पर्श

512

५१०

नपदस्य गुणपरत्वभ्रमे सति नेदृशादेः श्वेतरूपाभाववोधत्वाभेसमानविषयकत्वेनाविरोधित्वेपि नेतु शंखश्वैत्यं इत्थमितीति इत्थपद
(लुपादाने श्वेतपदस्य गुणपरत्वभ्रमे सति नेदृशादेः श्वेतरूपाभाववोधत्वाभेसमानविषयकत्वेनविरोधित्वेपिने) तित्ता नानुपपत्तिरिति गु
णपरत्वभ्रमनिरासाय इत्थपदोपादानमित्याशयः अथ गुणेशुक्लादयः पुंसीतिकोषाद्गुणवाचकश्वेतपदस्य पुंल्लिंगतानियमेनात्र
श्वेतमितिनपुंसकलिंगनिर्देशेन कथं श्वेतपदस्य गुणपरत्वभ्रमसंभावनेतिचेन्न श्वेतंरूपं नास्तीत्यादिप्रयोगदर्शनेन तादृशको
षस्य विशेष्यासमभिव्याहारं शुक्लादिपदानां पुंल्लिंगत्वमित्यत्रतात्पर्येण अत्ररूपमिति विशेष्यपदाध्याहारेण कदाचिद्गुणपरत्वभ्रम
संभवनासंभवात् केचित्तु श्वेतइत्यलिमप्यामघटादावपि श्वेतादिपदप्रयोगेणपरंपरया श्वेतपदवोधकस्यापि श्वेतपदस्य सामान्य
तोनपुंसकलिंगतासंभवेन तदभावनिर्णयेपि शंखवत्ताबुद्धिसंभवतीतिसमानप्रकारकत्वेनविरोधितायांनेयंयुक्तिस्साधीयसीति श्वेत
पदस्य समवायेन श्वैत्यपरत्वलाभाय इत्थपदोपादानमितिवदंति तदसत् घटादौ घटत्वादिकमेव घटादिपदप्रयोगवत् समवायेन श्वैत्या
दिकमादेव श्वेतइत्यलिमप्यामघटादावपि श्वेतादिपदप्रयोगाय यस्मात् श्वेतादिपदानां परंपरया श्वैत्यादिमतिहत्तेमानाभावात् अ
तरावविशेषदर्शिनांप्यमोयंघटः श्वेत इत्यलिमोनतु श्वेतरूपादयः प्रयोगास्संगच्छंतइतिदिक् तमाहेतिपाठः समानविषयत्वेनम

513

१७३

दी.

निबंधकत्वस्याव्यभिचारमाहेत्यर्थः। क्वचित्तदाहेति पाठोऽस्ति स च सामान्येन नपुंसकमित्यभिप्रायेण तदित्यस्याव्यभिचारस्य समाहेत्यर्थकतया

योजनीयः। उभयवत्ताज्ञानमितिश्रुतेन समानविषयत्वेन विरोधित्वे विद्यव्यभिचार इति शेषः। अन्योभयस्य प्रत्येकानतिरिक्ततया घटो

ऽस्तीति ज्ञानमप्युभयवत्ताज्ञानमेवेतीदमसंगतं नचोभयत्वेनोभयवत्ताज्ञाने उभयत्वेनोभयाभाववत्ताज्ञाने तेन विरोधिता यो तात्पर्यमि

ति वाच्यं तथा सति समानप्रकारकत्वेन विरोधिताया एव तात्पर्यमिति चेन्न उभयवत्ताज्ञानीयोभयत्वनिष्ठप्रकारताया उभयाभावीयोभय

त्वनिष्ठप्रतियोगितापर्याप्त्यसम्भवात्। तदुपगमेन तत्रोभयपर्याप्तिप्रकारताकत्वे उभयपर्याप्तप्रतियोगिताकाभाववत्त्वनिश्चयत्वेन विरोधित्व

मित्यत्र तात्पर्ये तु समानविषयत्वेन विरोधितामते विषयभेदेन प्रतिबध्यप्रतिबंधकभावभेदात्। एवं च प्रकृते उभयाभाववत्ताज्ञानमित्यस्यो

भयपर्याप्तप्रतियोगिताकाभाववत्ताज्ञानमित्यर्थः। उभयवत्ताज्ञानमित्यस्य चोभयपर्याप्तप्रकारताकज्ञानमित्यर्थ इति ध्येयं। इदमत्ताज्ञानत्वा

दित्यविच्छिन्नमात्रवृत्तीयस्यैतत्रत्यपर्याप्तप्रकारताकत्वादित्यर्थः। अत्र प्रकारताप्रतियोगितयोरैक्यमात्रे इति चैत्रत्वपर्याप्तत्वादिति भावः।

अत्र प्राचीनानुयायिनः नेह घटोऽस्तीत्यादिज्ञानमेतद्वृत्तिघटीयाभावविषयकमेव विशेष्यतानिविष्टाभावप्रत्ययस्य विशेष्यविशेषणा

भावविषयकत्वनियमात्। एवमुभयाभाववत्ताज्ञानमपि प्रत्येकाभावविषयकमेव प्रत्येकाभावानतिरिक्तस्योभयाभावस्याभावात्। एवं प्रतियोगि

राम०

514

नपिनोभयस्मिन्नपि यथार्थज्ञानबोधयत्वं प्रतियोगितावच्छेदकं · एवं चैत्रवद्देशाद्यौ देशो चैत्रो नास्तीति ज्ञानमपि चैत्रवद्देशाभावविषयकमेव एवं
सामानाधिकरण्येन विशेषणताविशिष्टाभावोऽपि विशेषणताविशेष्ययोरभाव एव इत्थं च नानुपपत्तिलेशोऽपीत्याहुः अन्ये इति तत्र
तत्रत्यं चेदुभयोरपि इतिताभिरनुपपत्तिभिः एवं तद्वत्त्वेन घटस्य घटोभयत्वेन देशे चैत्रत्वेन गुणानन्वविशिष्टसत्त्वेन वावच्छिन्नप्र
तियोगिताकस्यातिरिक्ताभावस्य तज्ज्ञानविषयत्वमावश्यकमिति एवं समानप्रकारकत्वेन प्रतिबंधकत्वे आपातमिति समान
विषयत्वेन विरोधितामते तु तत्र बाधाहितत्वेन भ्रमानुमितिरित्याशयः समानप्रकारतामत इति समानप्रकारकत्वेन प्रतिबंधकतामत
इत्यर्थः विशेषणबाधावतार इति वह्नित्वेन विशेषणतान्प्रसंग इत्यग्रिमेणान्वयः समानविषयतेति समानविषयत्वेन प्रतिबंधकता
मत इत्यर्थः प्रसंग इति तथा च समानप्रकारकत्वेन प्रतिबंधकत्वे विशेषणबाधावतार इव समानविषयत्वेन विरोधितामते विशेषणबाधा
नवतारेण तथानुमितिप्रसंग इति मतद्वये तुल्योऽयं दोष इति भावः इष्टापत्तिरेवेति वस्तुतस्तत्र चैत्राभाववद्भूमिविशेष्यकसत्यसत्वोल्लं
गपरामर्शस्य विवक्षितमिति नोक्तदोष इत्युभयमतेऽपि समाधानं बोध्यं तथाप्यभिप्रायहेतुविशेषतोऽप्यप्रियग्रहाभावेऽपीत्यर्थः तस्या
नाहार्यत्वामान्याः प्रसिद्धविशेषणबाधेति अनुमितिप्रकारीभूतविशेषणतया प्रसिद्धविशेषणबाध इत्यर्थः मूलकृत एवं समानमाह हेधि

515

१५४

शि

174

तोपयाज्जीवनमरणोमितिताद्दशामानमेवमूलकत्वाव्यतिरेकिण्यंयेउक्तमितिभावः अत्रेदंबोध्यं आत्मविशेषगुणाजनकमनःसंयोगोजी
वनं तथाचपक्षशरीरावच्छेदेनात्मविशेषगुणाजनकमनःसंयोगःसतच्छरीरावच्छेदेनजीवनमितिपर्यवसितंघटमनस्संयोगवारणा
यात्मविशेषगुणेति इंद्रियात्मसंयोगवारणायमनःपदं अयंद्रियमनस्संयोगाद्भीतिचाभिः न चसजीवनमेवेतिवाच्यं आत्ममन
स्संयोगोजीवनमितिअभियुक्तलिखनविरोधात् आत्मपदंवैयर्थ्यापत्तिरितिचेदत्राहुः आत्मनोविशेषगुणाजनकमनस्संयोगइतिष
ष्ठीतत्पुरुषाद्विशेषगुणाजनकात्ममनस्संयोगोजीवनमितिपर्यवस्यति मुक्तात्ममनस्संयोगस्यजीवनत्ववारणायविशेषगुणाज
नकेतिसंयोगविशेषणं अदृष्टवदात्मशरीरसंयोगवारणायमनःपदं ज्ञानजनकमनःसंयोगाजनकस्पंदजन्यविभागजन्यज्ञानज
नकमनस्संयोगध्वंसोमरणं ज्ञानजनकोयोमनस्संयोगस्तज्जनकोयस्पंदस्तज्जन्योयोविभागस्तज्जन्योज्ञानजनकस्यमनःसंयोगस्य
ध्वंसोमरणमित्यर्थः अत्रपदव्यावृत्तिःसुधीभिरूह्याः इतिप्रतियोगित्वितिनाद्द्वत्वं चात्र साध्यतावच्छेदकसंबंधः अत्रभावत्वमेवलाघ
वंबोध्यं जीवित्वे· जीवनप्रतियोगित्वे· अपिद्याअनिष्टापेन· व्याख्यायां जीवित्वस्येतिजीवनप्रतियोगित्वस्येत्यर्थः प्रविष्टस्येति एवं
इच्छाइत्यादि· जीवित्वस्यजीवनस्यप्रतियोगित्वस्यच· स्वात्मनेत्र· विशिष्टरूपेण· एवमित्यादिनेतिएवमित्यनेतरं हितिः सकरो

516

राम॰

कार्यकार्यत्वादिम्यनुमानमिति दोषः यत्तूक्तस्यैहेतुत्वं न तरेरौपवत् बहिस्सत्वानुमानसंभवादाह एवमिति तिनवीनैरुक्तं तदसत् अत्रापि
हेतुत्वं न तरेरौकत्वानुमानसंभवात् अन्ये तु सामान्यरूपेण विशेषसिद्धावपि समानविषयत्वेन विरोधितामते विशेषसंशयानिवृत्तेः सामा
नसाहेतुसिद्धिरिति नानुपपत्तिरतश्चाह एवमितीत्याहुः एकत्वमपीति नन्वत्र किं तावदेकत्वं न तावत्संख्यामात्रं द्वित्वादिकं तु नेति ना
न्वेयितत्संभवेन पक्षमात्रासिद्धेः यत्तु द्वित्वादिकर्तनिष्ठस्यानित्यत्वानवान्निषेधस्यवान्योन्याभावस्य प्रतियोगितानवच्छेदकैकत्वं तदपि तत्र
सकर्तृकत्वानुमानात्पूर्वं तदसिद्ध्या लाघवज्ञानासंभवादिति चिरन्तननवीनाः अन्यानाम्नोभयपाद्यन्निदः एवं द्वित्वादिद्वित्वसमस्तत्वं तदे
कत्वं नाद्रशं च द्वित्वमात्मतरद्वयसहद्येयप्रसिद्धं तच्चूमत्त्वं गुणाश्रयवेत्याहुः अपरे तु द्वित्वादिकेतु रात्मत्वासिद्धिकालेनाद्रशद्वित्वप्रस
त्वग्रहासंभवात्तदेवं युक्तं स्यात् एव चेतनभिन्नासमवेतद्वित्ववदत्यत्वेनादिपपुरुक्तं तत्र चेतनप्रसिद्धेः पूर्वं चेतने तत्त्वविरोधिनद्वस्यात्वग्र
हासंभवात् किं तु द्वित्वं पर्याप्तिनवच्छेदकहेतुसित्विनदेकत्वं न च जात्यादिनानन्ततेद्वित्वपर्याप्त्यवच्छेदकत्वात्तेद्रमपि सामान्यमिति वाच्यं
द्वित्वादिफलोपधायकत्वावच्छिन्नस्यावच्छेदकत्वस्याप्यसंभवात् प्रसिद्धस्यैव लेच सजातीयादिनानन्तेद्वित्वपर्याप्त्यवच्छेदक) यद्वि
तीयरहितत्वरूपमेवैकत्वं लाघवज्ञानमपि तद्वित्वपर्याप्त्यनवच्छेदकत्वे लाघवमित्याकारकमेवेति प्राहुः अधिकं परस्मान्तेम्य

दी॰

रवारेदूषयं अन्यथेतीति अन्यथेत्यस्य लाघवज्ञानवशात् अनुमितावेकत्वस्याप्रकारत्वे इत्यर्थः दीधितावनेकेति एकत्वाभाववान्निश्च
यः व्याख्यायां मानसेति मानसैकत्वनिश्चयानंतरमेवेत्यर्थः तत्र हीति कर्त्रीति न संदेहः नोक्तसंदेहः अन्यथा मानसैकत्वनिश्चयाभावे न
ग्रहीति कर्त्रीरिः संदेहसत्वं एकत्वसंदेहसत्वं वस्तुगत्येति अनुमितेरित्यादिकं तरिमिति अनुभवसाध्यस्येत्यादि इत्याकारकः इमिका
रात् एवकारेण एकत्वकर्त्रीरिंजानामीत्याकारस्य व्यवच्छेदः फलनिर्णायस्येति यावत् फलनिर्णयेन लाघवज्ञानस्य हेतुत्वकल्पनमेव न
संभवतीति भावः ननु लाघवज्ञानादिसहकारिवशादायकतानवच्छेदकरूपस्यानुमितौ प्रकारतया भानात् किमिति कुतो बाधस्येत्य
पक्षहेत्वाभासत्वे विशेषेति महानसीयवह्नित्वादेरित्यर्थः असल्लिंगपरामर्शस्य तद्धर्मकरोधस्य इत्यंचदीधितोक्तयुक्तिर्दोषपर
प्रकारतासत्वादिति भावः नज्ञायेतेवेति सल्लिंगपरामर्शरूपप्रमाकारतासत्वादिति भावः यथार्थेति अनुमितिरिति प्राक्तनमनुषज्यते
व्याख्यायां तादृशेति लाघवज्ञानस्येत्यर्थः न हि भावः तादृशदोषाभावः न तु भ्रमेयेति भ्रमप्रमाभावाभावेत्यर्थः वस्तुतस्तु बोध्यतदभाववच्छे
शेष्यकत्वमेव परामर्शस्य सत्वासत्वरूपमनुमितेः प्रमात्वभ्रमत्वे च प्रयोजकमित्येव सारमिति ध्येयं प्रसिद्धेति स्वोक्तलाघवज्ञानादिमा
दिपदग्राह्येत्यादिः अनुमितिप्रकारीभूतविशेषेतरप्रसिद्धविषयबाधेत्यर्थः अप्रसिद्धत्वेनेति तन्त्वकल्पने गौरवादिति निशेषः अन

राम०

एवंसहकारिकोटौप्रसिद्धाशेषमत्रप्रसिद्धेनुक्तं अप्यायामप्रवृत्तित्वायप्रसिद्धानांतद्बाधासंभवेनानुमितिप्रकारीभूतविशेषेतराशेषबाध्या
त्मकसहकार्यसंभवात् ननुलाघवज्ञानेनतद्बाधादिसहकारिविरहायांव्यापकतानवच्छेदकरूपस्याधिकस्यानुमितौभानेपिप्रकृतसाध्य
तावच्छेदकावच्छिन्नविषयकफलस्यैवयत्नेनइच्छाप्रवृत्तिसाध्यत्वगुणत्वेनकर्त्येमनोवृत्तित्वानुमितिर्मनोवृत्तित्वस्यप्रकृतसाध्यता
वच्छेदकद्रव्यवृत्तित्वलाघवनवच्छिन्नत्वादित्यत आह अत्र चेति घटितमेवेति तथा च प्रकृते मनोरूपद्रव्यवृत्तित्वेन मनोरूपद्रव्यवृत्तित्वा
नुमितिरेवमनोवृत्तित्वानुमितिरित्यस्याभिप्रेतेतिभावः भासत इति अस्य तेन हेतुघटनादिति शेषः ननु तथापि विशेषरूपेणानुमितौ वि
शेषतोव्याप्यवगाहिपरामर्शस्यहेतुतायाःक्लृप्तत्वात् तादृशपरामर्शंविनालाघवज्ञानेनतद्बाधस्यादृष्टिपक्षेविशेषरूपेणानुमि
तिरत आह अनुभवानुरोधेनेति तथैव तेन रूपेणापि लाघवज्ञानेन तद्बाधत्वादिनापीति यावत् कार्यकारणभावादिति विशेषरूपेणानु
मितौकारणत्वकल्पनादिपर्यवसितः तथाचसामान्यतोव्याप्यवगाहिपरामर्शघटितायाःलाघवज्ञानेनतद्बाधघटितसामग्र्या अपि विशेषरू
पेणानुमितिजनकत्वांगीकारेतादृशसामान्यतादृशानुमितिजननेऽपिविशेषसामग्र्यन्तरविरहस्यनबाधकत्वमितिभावः ननु तथापि
प्रसामग्र्यास्तादृशसामग्र्याश्चविशेषरूपेणानुमित्यात्मकस्यफलस्यजननेपरस्परंव्यभिचारादुर्वारत्वेति चेन्न एतादृशसामग्र्याविशे

519

१७६

टी०

176

ष्येविशेषणतामितिन्यायेनैवानुमितिजननेनलक्ष्यसामग्र्याःविशिष्टस्यैवेशिष्ट्यामितिन्यायेनतज्जननेनेतरत्ताद्दृशज्ञानाद्दृशाविशेष्यताशास
नुमितित्वस्यैवजन्यतावच्छेदकतयाव्यभिचाराभावात् नचैवंविनिगमनाविरहः वैपरीत्यस्यापिवक्तुंशक्यत्वादितिवाच्यं वन्हेर्महानसीय
त्वेलाघवंमहानसीयेतरस्वत्वाभाववानित्यादौलाघवत्तानेतत्साधनतायामनुमितिपूर्वकालेनियमतोविशिष्टविशेष्यकरणताज्ञानतस्या
नस्यैवविनिगमकत्वसंभवादितिसंप्रदायः तन्मात्रसाध्यलिंगकानुमित्यादौव्यभिचारवारणायावच्छेदकोत्तरत्वस्यकार्यतावच्छे
दककोटौनिवेशस्यावश्यकतयानव्यभिचारशंकापीत्याहुः अत्रोपाध्यायानुयायिनः लाघवज्ञानादिवद्यादनुमितौज्ञापकतानव
च्छेदकरूपस्याभानांगीकारेसंशयात्मकानुमितिस्वीकारापत्तिरितितस्यैवविषयापकतावच्छेदकरूपेणैवानुमितिस्वीकारोयुक्तः तथा
हि यत्रवन्हिव्याप्यमत्वाभवर्वतस्थभावव्याप्यवान्पर्वत इतिसमूहालंबनात्मकपरामर्शः एवंमहानसीयवन्हौलाघवमितिलाघ
वज्ञानंअभावस्यमहानसीयवन्हिप्रतियोगिकत्वेलाघवमितिलाघवज्ञानंवतत्रमहानसीयवन्हौलाघवमितिलाघवज्ञानसहकृता
त्वन्हिव्याप्यधूमवान्पर्वत इतिपरामर्शात्पर्वतोमहानसीयवन्हिमानित्यनुमित्युत्पत्तौअभावस्यमहानसीयवन्हिप्रतियोगिकत्वेला
घवमितिलाघवज्ञानसहकृतात्अभावव्याप्यवान्पर्वत इतिपरामर्शात्पर्वतोमहानसीयवन्ह्यभाववानित्यनुमित्युत्पत्तौचनकिंचिद्बाध

520

राम०

केनद्दामहानसीयवन्ह्याद्दिविधेयकानुमितिप्रतिबंधकस्य महानसीयवन्ह्याद्यभावव्याप्यवत्ताज्ञानस्याभावात् एवं यत्र तत्र ह्रदसाम
ग्रीवृत्तात्पर्वते महानसीयवन्हित्व महानसीयवन्हित्वावच्छिन्नप्रतियोगिताकाभावत्वोभयावच्छिन्नप्रकारताकानुमित्सुत्पत्तावर्पव
शासपक्षसंशयाकारानुमितिनिरिवाधैव व्यापकतावच्छेदकरूपेणैवानुमितिस्वीकारे तु तत्र वन्हित्वाभावत्वोभयावच्छिन्नप्रकारताका
नुमितिस्वीकारेपि न संशयानुमितिस्वीकारः तदुभयावच्छिन्नप्रकारविरोधेन विरहोभयप्रकारताघटितसंशयत्वस्यात्राभावादिति
वदंति अत्र केचित् लाघवतामादिवशादनुमितौ व्यापकतानवच्छेदकरूपस्य प्रकारत्वोपगमेनान्तरीत्या संशयाकारानुमितिस्वीकरप्र
संगस्तथाहि यथा महानसीयवन्ह्याद्यनुमितिप्रति महानसीयवन्ह्याद्यभावव्याप्यवत्ताज्ञानं प्रतिबंधकं तथा महानसीयवन्ह्याद्यप्र
कारकानुमितिं प्रति अभावस्य महानसीयवन्हिप्रतियोगिकत्वे लाघवमित्यादिलाघवज्ञानविशिष्टस्याभावव्याप्यवत्ताज्ञानस्यापिप्र
तिबंधकत्वं कल्प्यते अन्यथा महानसीयवन्ह्यभावव्याप्योयं लघुमहानसीयवन्हिप्रतियोगिकत्वविशिष्टाभावकालीनपर्वतस्तदा
नपर्वतस्त्वादिज्ञानस्य महानसीयवन्हिविधेयकानुमितिं प्रति स्वातंत्र्येण प्रतिबंधकत्वं कल्प्यते गौरवात् अस्मन्मते तु न दोष इति ला
घवत्तानविशिष्टस्याभावव्याप्यवत्ताज्ञानस्यावश्यकतया तत्प्रतिबंधकतायैव निर्वाहे नुपाधिगुरुधर्मावच्छिन्नस्य तत्र प्रतिबंधकत्वा

521

दी॰ १७७

कल्पनेन लाघवस्याभिसंधानात् एवं लघुमहानसीयवह्निप्रतियोगिताकाभावकालीनो योऽभावव्याप्यवत्पर्वतस्तद्वान् महान
सीयवह्न्यभाववानिति तथाविधव्याप्यधर्मविशिष्टपर्वतत्वावच्छेदेन महानसीयवह्न्यभावावगाहिज्ञानं तदुत्तरोत्पन्नलघुम
हानसीयवह्निप्रतियोगिकाभावकालीनाभावव्याप्यवान्पर्वत इति ज्ञानस्यावच्छेदकधर्मदर्शनविधया महानसीयवह्निप्रकारकानु
मितिप्रतिबंधकत्वे कल्पनीये तथाविधज्ञानविशिष्टलघुमहानसीयवह्निप्रतियोगिकाभावकालीनाभावव्याप्यवान्पर्वत इति ज्ञा
नत्वेनैव प्रतिबंधकत्वं कल्पनीयं वैशिष्ट्यं चात्र स्वाश्रयविहितानन्तरत्वस्वसामानाधिकरण्योभयसंबंधेन बोध्यं एवं च तथाविधधर्म
वैशिष्ट्यस्यात्र प्रतिबंधकतावच्छेदककोटौ निवेशे गौरवेण तत्र तथाविधलाघवज्ञानविशिष्टाभावव्याप्यवत्ताज्ञानत्वेन प्रतिबंधकत्व
कल्पने तु तथाविधधर्मवैशिष्ट्यं प्रतिबंधकतावच्छेदककोटौ न निवेशनीयमिति यदि लाघवं एवं च कथं पूर्वोपदर्शितस्थले संशयात्मा
नुमितिप्रसंगः तत्प्रतिबंधकस्योपदर्शितलाघवज्ञानविशिष्टाभावव्याप्यवत्ताज्ञानस्य तदानीं सत्वादित्याहुः अपरे तु मतद्भाववत्ता
सेन तत्प्रकारकानुमितिसामग्र्याः प्रतिबंधकत्वे कल्पनीये तत्रैव ज्ञानत्वे निवेश्य प्रतिबंधकतावच्छेदकत्वात्तत्स्थले संशयानुमितिप्रसंग इ
त्याहुः अन्ये तु निर्वह्निर्वह्निमानित्याहार्यवाक्यश्राव्यवाक्यजन्यतद्धर्मावच्छिन्नप्रतियोगिताकाभाववत्तावच्छिन्नप्रकारतानिरूपितवि

522

राम॰

शेष्यतानिरूपितप्रकारतावच्छेदकतासंबंधेन परोक्षत्वावच्छिन्नेन धर्मेदस्य हेतुत्वकल्पनात् कायिसंशयानुमितिप्रसंगः इति वदंति
वस्तुतस्तु लाघवेन ज्ञानादिवृत्त्यव्याप्यकतानवच्छेदकरूपस्यानुमितौ भानबाधिद्वृत्यिति कारस्य संशयानुमितिस्वीकारे एव नवप
रोक्षत्वेनेनिश्चयात्मकमेवेति सिद्धांतविरोधापत्तिरितिवाच्यं नाद्यः सिद्धांतस्य निर्युक्तिकत्वेनाग्रहेयत्वात् अत एव पक्षपातत्यागविवेके
आह स्यविप्रतिपत्तिजन्यासंशयोऽरीधितिकारेणाभ्युपगतः समानानेकेत्यादि सूत्रस्वारस्यमप्यत्रैवेति संक्षेपः साध्याभावतामावसत्त्वा
दिति क्वचिद् ध्वंसात्यंताभावेत्येव पाठः ध्वंसप्रागभावयोरत्यंताभावविरोधित्वेमानाभावादितिभावः असत्त्वेति उत्पत्तिकालावच्छिन्नोघटोत्पं
धवान्न पृथिवीत्वादिमत्वादिव्यादिः तथा च तत्र व्यभिचाराद्यसंकीर्णाभिधोद्धाहरणमप्यदृष्टमिति मूलकारस्यासंगतमितिभावः संयोगादिसा
ध्यक द्रव्यत्वादावतिप्रसंगवारणायाह प्रतीयोग्यसमानाधिकरणेति समवायेन वह्न्यभावादिकमादाय संयोगेन वह्निमान् धूमादि
त्यादावतिप्रसंगवारणायाह साध्यतावच्छेदकसंबंधेनेति उभयाभावादिकमादाय योक्तस्थले एवातिप्रसंगवारणाय साध्यतावच्छेदका
वच्छिन्नेति साध्यतावच्छेदकपर्याप्त्यावच्छेदकताकेत्यर्थः तेन महानसीयवह्नित्वाद्यवच्छिन्नप्रतियोगिताकाभावमादाय नोक्तस्थलेति
प्रसंगतादवस्थ्यं ननु नाशात्मनव्यापकतानविरोधिनो भेद इति घटितव्यभिचारस्यासंग्राह्यतया भेदवारकसंसर्गाभावोपादानमनप

523

टी०

कमतस्त्राह अत्रचेति अनभ्युपगमेनेति तन्नवनयापि लाघवेनाभावत्वेन निवेशसंभवोचित इत्यभिप्रायं अभावत्वसंसर्गाभावत्वयोर्द्वयोर
प्यखंडोपाधित्वे तयोर्लाघवासंभवस्याप्याशयात् अनुपादेयमेवेत्यन्तदुपादाने भेदघटितव्यभिचारस्यासंग्रहापत्तेरिति भावः ननुसंसर्गा
भावत्वेन निवेशे प्रागभावादिकमादायातिप्रसंगइत्यतआह स्वप्रागभावादेश्चेति आदिनाध्वंसपरिग्रहः प्रतियोग्यसमानाधिकरणाय
देशैवप्रतियोग्यसमानाधिकरणत्वादियदेशैवेत्यादिनासाध्यतावच्छेदकसंबंधावच्छिन्नपदपरिग्रहः तथाचोत्पत्तिकालावच्छिन्नोघटोगंध
वानित्यादावत्यंताभावस्यप्रतियोग्यसमानाधिकरणपदेनप्रागभावादेः संबंधविशेषावच्छिन्नपदेनापिवारणेप्यभिधानाभावात्सव्यभि
चाराघंसंकीर्णवाधोदाहरणत्वमित्याशयः नहाग्रेयेतिगंधाद्याग्रेयेत्यर्थः प्रागभावादीतिमूलइत्यादिः कथं तु नः दीधितौस्पष्ट
त्वेनेतिध्वंसप्रागभावयोः प्रतियोगिमद्वृत्तित्वस्यसर्वसंमतत्वेनेत्यर्थः व्याख्यायांतदभिधाने प्रागभावावच्छिन्नपक्षकासंकीर्णवाधो
दाहरणाभिधानंनाभिधानमितिपाठेऽत्यंताभावस्यपक्षतावच्छेदकतमानभिधानमित्यर्थः प्रागभावकाले प्रागभावादिकाले
निरस्तत्वादितिपूर्वमित्यादिः तत्प्रागभावेतितद्घटत्वाद्यवच्छिन्नप्रागभावेत्यर्थः तत्साधने तद्घटत्वाद्यवच्छिन्नसाधने रूपत्वादीति
आदिनागंधत्वादिपरिग्रहः वाधं असंकीर्णवाधं एवमग्रेपिप्रतियोग्यसमानेति अन्यथातद्घटितव्यभिचारस्यतत्रापिसंभवे

178

524

राम

नासंकीर्णबाधानुपपत्तिरित्युपष्टंभसंगतिरिति भावः नवीनास्तु अन्यथा हि कालेघटादौ गंधादेरत्यंताभावाप्रसक्तेरिदं घटत्वादिना साध्य
तायां प्रागभावादिकमादाय बाधसमर्थनेपि रूपत्वगंधत्वादिना प्रागभावपुरस्कारेण साध्यतायां न बाधनिर्वाहः इति प्रागभावादिमत्यप्यत्यंता
भावस्वीकारस्यावश्यकत्वमित्याहुरत एवेति अन्त एव ध्वंसप्रागभावसमये तद्घटेऽत्यंताभावसत्वादेव अन्यथात्यंताभावज्ञानस्यैव स्वतो
रयथार्थावच्छिन्नत्वनियमात्ज्ञानविरोधित्वेन ध्वंसप्रागभावयोर्बाधत्वासंभवेनोक्तस्थले बाधानवकाशादुपष्टंभसंगतिः नहि साध्यप्रतियो
गीकाभावमात्रज्ञानमेव साक्षात्साध्यतावच्छेदकावच्छिन्नसाध्यधीविरोधि तत्तत्साध्यकालाभावज्ञानस्यापि साध्यसामान्यधर्मस्य प्रतियो
गितानवच्छेदकत्वादिति भावः प्रतियोग्यनवच्छेदककालेत्याहुः एवंच मूले स्वप्रागभावध्वंसपदे स्वानवच्छेदककालत्वे तात्पर्यमिति भावः
ननु बाधासांकर्यं दीधितौ बाध इति धूमादिहेतावित्यादिः साध्याभाववत्पक्षतावच्छेदकावच्छिन्नत्वं त्वर्थः तत्र पक्षतावच्छेदकं शिखरा
द्यवच्छिन्नं धूमादिमत्त्वस्य तदवच्छेदेन वह्न्याद्यनुमितिजनकज्ञानविषयस्यासत्त्वाद्धेतुसिद्धिरिति तु तोयाधस्यासांकर्यमित्याशयेनाशंक
ते अप्रत्येतीत्यारव्यापाठे तत्सामानाधिकरण्येन पक्षतावच्छेदकसामानाधिकरण्येन प्रयोजकत्वे अवच्छेदकावच्छेदेनानुमितेर्जन
कत्वे दीधितौ घटत्वादेरिति पंचमी आरव्यायां भागासिद्धेः सामानाधिकरण्येन हेत्वभावग्रहस्य पक्षतेपि शिखराद्यवच्छिन्नपर्व

525

दी०

नाद्यः पक्षत्वेपि॰ शोधितो वस्तुतो नारीति॰ स्वरूपसंबंधातिरिक्तव्याप्तिस्वरूपयोरित्यर्थः व्याख्यायां पृथिवीत्वेनेति सिद्धिरित्यंतं प्राचीनमतानुवा
दः अवच्छेदकावच्छेदेनानुमितौ नावच्छेदकत्वस्य संसर्गतया भानं मानाभावात् पक्षतावच्छेदकाक्रांतपावच्छिन्नविषयकानुमितिरेव प
क्षतावच्छेदकावच्छेदेनानुमितिरिति हि प्राचीनमतं॰ तत्र पृथिवीत्वरूपे यावत्पदाद्दिसाध्यतायां सिद्धिरित्यंतेन प्राचीनमतमनूद्य स्वसंम
तमतमाह अनतिरिक्तव्याप्तित्वपर्यवसन्नमिति इदमपि विशेषणानि ष्टसंसर्गाभासनं इति प्राचां नये न पक्षतावच्छेदकन्यूनानतिरिक्त
व्याप्तित्वं पक्षतावच्छेदकस्य साध्यसंसर्ग इत्यादायेन वस्तुतो व्यापकत्वरूपावच्छेदकत्वं संसर्ग इति द्रष्टव्यं अयमाशयः प्राचीनमते य
त्र पक्षतावच्छेदकता घटकसंबंधेन पक्षतावच्छेदकमवच्छिन्नं तत्रैतेन संबंधेन पक्षतावच्छेदकाक्रांतताप्रसिद्ध्यावच्छेदकावच्छेदेन गंधत्वाद्यव
च्छेदेन तन्निष्ठ्यस्यापि गंधोजलत्वव्याप्तिर्न वेत्याद्यो गंधत्वसामानाधिकरण्यमात्रेणाजलत्वव्याप्तित्वादिसंशये विरोधिताप्रसंगः उभयोरेव
निष्ठ्यस्य योगं भिन्नाश्रययावद्धर्मितानामवगाहितया विशेषात् नव धर्मितावच्छेदककोटौ अधिकभानमेव विशेषइति
वाच्यं विरोधिविषयकत्वाविशेषे धर्मितावच्छेदककोटावधिकभानस्याविरोधिता यांबीजत्वासंभवेन द्वितीयस्य विरोधित्वे प्रथमस्या
पि तत्त्यात्वप्रसंगस्य दुर्वारत्वात् अवच्छेदकत्वमाने तु अनतिरिक्तव्याप्तित्वादिरूपस्य तस्य भेदेन विशेषसंभवान्नोक्तप्रसंग इति देव

राम०

समंजसमिति संयोगादिव द्वित्तिशिखरादौ संयोगादेः स्वरूपसंबंधात्मकमवच्छेदकत्वं सर्वसंमतमितितस्य हृदयंगमीकरणं साध्यसि
द्धिरितितदीयतत्संबंधावच्छेदकस्यतेन संबंधेनतदवच्छेदकत्वमप्यौचित्यावर्जितमेवेतिभावः स्वरूपसंबंधेनेतिशिखरादेरित्यादिः
ततः अवच्छेदकत्वं प्रकृतेनेनतः किमत आहतथाचेतिभागासिद्धेर्दुष्टत्वानुरोधेनेतिहेतोः हेतुत्वेपीतितावतैवामयेत्यादिनोक्त
स्यभागासिद्धेर्दुष्टत्वानुपपत्तिरूपदोषस्यापरिहारसंभवादितिभावः तद्धीति अवच्छेदकत्ववदित्यर्थः सामानाधिकरण्येनेतितदव
च्छेदेनबाधादिरूपप्रतिबंधकाभावसहितस्येत्यादि अत्रापि स्वरूपसंबंधरूपावच्छेदकत्वावगाह्यनुमितावपि नहेतु पक्षतावच्छेद
कावच्छिन्नहेतुमत्ताज्ञानमेव ननुसामानाधिकरण्येनहेतुमत्ताज्ञानस्यबाधाभावादेः सहकारितया अत्रैव स्वरूपसंबंधरूपावच्छेदकत्व
त्वस्यलक्ष्यतत्रापि अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्यलेपि अतः भागासिद्धेर्दुष्टत्वानुरोधात् अभ्युपगम्य अभ्युपगम्यापि
आहेतिबाधस्यदोषतामित्यादि हीयिनो बाधप्रमेति विशिष्टरूपहेत्वप्रसिद्धिस्तत्त्वनायप्रमात्वोक्तिः व्याख्यायो तदानीं अवच्छि
न्नाहत्तेरपिहेतोरवच्छिन्नवृत्तित्वेनग्रहदशायांवक्ष्यमाणसांकर्यस्वरूपस्य भागासिद्धिसांकर्यं तस्यैव तानासांकर्यस्यैव हेत्वाभास
भेदेति असिद्धतानदशायांबाधज्ञानस्येवानुमित्यनुत्पादप्रयोजकत्वादितिभावः तानासांकर्येण तन्मात्रेण किमितितत्रापिता

१८०

दी.

180

नासांकर्यसंभवादिति भावः वस्तुसांकर्यमेव वस्तुसांकर्यमपि नारकिशरीरादीति सुखाद्यनवच्छेदकं नारकिशरीरादौ इत्यर्थः आदिना
शरीरस्य अग्निविशेषादि पीयग्रहः हेतुसत्वेपीति पक्षे नासिद्ध्यभावसत्वान्वितः न स्वच्छेदेन नादृशशरीराद्यवच्छेदेन बाधएवेति एवकारेणा
सिद्धिव्यवच्छेदः उदाहरणांतरमिति मत्वावच्छिन्नोदाहृः कपिसंयोग्येतद्वृक्षत्वादित्यादावपि वस्तुसांकर्यमाहेत्यर्थः शाखिनो वृक्षविशेष
त्वादेरिति एतद्वृक्षत्वादेरित्यर्थः न चैतद्वृक्षत्वादेरेतद्वृक्षवृत्तिपरिमाणादिरूपतया तस्य च व्याप्यत्वमित्यनेनावच्छेदकमिति वाच्यं
व्याप्यत्वेनैरूप्यावच्छेदकत्वस्य स्वयंस्वीकारात् केचित्तु तद्वृक्षविशेषत्वादित्यत्र मूलावच्छेदेन वर्तमानं यत्कपिसंयोगव्याप्यत्वन्तरस्यतो
व्याप्यत्वेनैरवच्छेदकत्वानंगीकारेपि न दोष इत्याहुः व्याप्यायां सामानाधिकरण्येनेवेति एवकारेणावच्छेदकत्वव्यवच्छेदः एवकारव्य
वच्छेद्यस्य पृथयति न स्वच्छेदेनापीति न पक्षतावच्छेदकावच्छेदेनापीत्यर्थः न चैवं नादृशानुमितिजनकत्वं चैवं तनोपायेति भेदः स्वाभा
व्यात्विम : कारणस्याभावादिति नादृशानुमितित्वस्येव पक्षमर्यमात्रमतावच्छेदकत्वादिति भावः कारणेति व्यवच्छेदकत्वावगाह्यनु
मितिकारणेत्यर्थः कार्यति अवच्छेदकत्वावगाह्यनुमितिरूपकार्यमित्यर्थः एतादृशेति पक्षतावच्छेदकावच्छेदेन साध्याभावरूपेत्यर्थः वि
रोधित्वमिति अतः कल्पेबाधासांकर्यमिति भावः दोषिनो शब्दादिवेति शब्दोपतंतेनानुमानेवच्छेदकत्वविषयकत्वं साधयितुमिवश

528

रत्न१०

देपन्यासः एतत्कालीनेति धूमकालीनमित्यर्थः एवमग्रेपि ज्ञातव्यम् व्याख्यायामभ्युपेयइति तथा च धूमकालावच्छेदेन वह्निव्याप्यधूम
वत्पर्वत इति परामर्शस्यैव धूमकालावच्छेदेन अनुमितित्वं धूमकालत्वसमानाधिकरणत्वेन अनुमितित्वे कार्यतावच्छेदकं तदवच्छेदेन वा
धाद्यग्रहे व्याप्त्याद्यभावादिग्रहे तु चरमोक्तिभावः व्यापकताघटकेति व्यापकतावच्छेदकेत्यर्थः एवमग्रेपि अग्रिमप्रसंगवारणायेतादृशनिय
मस्यावश्यमभ्युपेयत्वादिति भावः प्रयोजनाविरहेणैवकारमनंतर्भाव्यैव तादृशनियमोक्तौ तावतैव व्यापकताघटकसंबंधमादायाप्या
तिप्रसंगवारणासंभवादित्याशयेन शंकते नचेति अवच्छेदकत्वावगाह्यनुमिताविति शेषः तानमितिपाठः अधिकमिति तथा च
वच्छेदकत्वावगाहित्वेपि न तादृशनियमभंग इति भावः तथा सतीत्येवकारमनंतर्भाव्य तादृशनियमे सतीत्यर्थः व्यापकतायामिति ग्रहणाप
मितिशेषः संयुक्तसमवायेनापीति अपिना संयोगपरिग्रहः प्रसंगादिति तथा चैवकारमनंतर्भाव्यैव तादृशनियमोऽभ्युपेय इति नावच्छे
दकत्वस्यानुमितौ भानं संभवतीति भावः अत्रेदमपि पक्षतावच्छेदेन हेतुमत्तावच्छेदेन साध्यमिति व्याप्तिग्रहोत्तरं तादृशकालत्व
पक्षतावच्छेदकावच्छेदेन हेतुमत्ताज्ञानानन्तरं तदवच्छेदेन साध्यानुमितिस्यादेव तत्रावच्छेदकत्वस्य व्यापकताघटकस्य सत्वेनोक्तनियमभं
गाभावादिति चेन्न तावतापि साध्यानवच्छेदकधूमकालावच्छिन्नवृत्तित्वे तादृशानवच्छेदकत्वं भविष्यत्याप्तेरसिद्ध्यादिदोषात् तदा

529

१८१

टी.

संकोर्णवाधासंभवस्यानुद्धरित्वात् पर्वतइतित्यवच्छेदकावच्छेदेनहेतुमत्तापरामर्षजन्येत्यादिः संदेहाभावादितिअग्निमत्तत्स्यानैवेत्यादि
कल्प्यतइत्यंतेनान्वयः नन्वनुमितेरवच्छेदकत्वान्नवगाहित्वेपितदनंतरं तद्वगाहिमानसत्तानांतरकल्पनयैवानुमित्यनंतरंतादृशसंदेहाभाव
उपपाद्यइत्यतआहतन्मानांतरेतिमानसेत्यादिः तस्याएवानुमितेरितिनादृशपरामर्षजन्यायाअनुमितेरेवेत्यर्थः कल्प्यतइतिलाघवादि
तिशेषः तथासतीत्यादिनोक्तदोषमुद्धरतिसंबंधांतरेत्विति अवच्छेदकत्वान्यसंबंधेत्वित्यर्थः तथानुभवेति संयोगेनव्यापकत्वावगा
हिपरामर्षजन्यानुमित्यनंतरंसंयुक्तसमवायेनसाध्यसंदेहाभावानुभवाभावादितिभावः तथात्वंसंबंधांतरविषयकत्वंकल्प्यत
इतिप्रमाणाभावादितिशेषः तथावानुभवानुरोधात्व्यापकतावच्छेदकसंबंधाघटकमप्यवच्छेदकत्वमनुमितौसाध्यस्यसंस
र्गतयाभासतइतिकल्प्यतइतिभावः यत्तुनवीनैरुक्तं उक्तयुक्त्यावच्छेदकावच्छेदेनानुमितिस्वीकारेऽवच्छेदकत्वाघटितव्यापकत्वा
वगाहिनोवच्छेदकावच्छेदेनहेतुमत्तावगाहिनः प्रमात्मकपरामर्षाद्व्यानवत्तारेवच्छेदकावच्छेदेनप्रमानुमितिस्तद्वत्तारेसामानाधि
करण्येनप्रमानुमितिरितिपर्यवसितंतन्नयुक्तं तथासतितुल्ययुक्त्यागुरुणोगुरुत्वकर्मत्वविशिष्टसत्तावान्ज्ञानेत्यादौप्रतियोगि
तावच्छेदकावच्छिन्नत्वाविशेषितप्रतियोगितैयधिकरणाघटितव्यापकत्वावगाहिनः प्रमात्मकपरामर्षादिसत्वबाधादिप्रहेतुत्वक

राम०

181

530

र्मित्वविशिष्टसत्ताविषयिणीप्रमानुमितिरिष्यते बाधादिग्रहे गुणकर्मान्यत्वोपलक्षितसत्ताविषयिणीप्रमानुमितिरित्यस्याप्यनु-
शकात्वेन व्याप्तिलक्षणे प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिवेशानमनर्थकं स्यादिति शिरोमणिनो पूर्वापरविरोधो दुर्वार इति न दूषणाय
कारस्यानुभवानन्दीप्रकाशोऽस्माभिः प्रपञ्चित इति ग्रन्थगौरवभियानेह प्रस्तूयत इति दिक्। ननु तत्स्थले साध्यसंदेहाभावानुभवानुरोधेनावच्छेद-
कत्वमनुमितेर्भासत इत्ययुक्तं तादृशानुभवस्य संदिग्धत्वात् अपरत्रानुभवसंदेहे लाघवतर्कस्य निर्णायकत्वे योग्यस्थलेऽनुमितावच्छेद-
कत्वभानोपगमे लाघवसंभवात्तदुपगमस्योचितः तथाहि बाधाभावादिबलादनुमितावच्छेदकत्वभानोपगमेऽवच्छेदकत्वघटितव्यापकता-
विषयकपरामर्शस्यावच्छेदकावच्छेदेनानुमितौ कारणत्वान्तरं कल्पनीयम् अवच्छेदकत्वाघटितव्यापकताज्ञानतद्घटितव्यापकताज्ञानोभय-
साधारणरूपेणैव कारणतायाः स्वीकारे तौ कारणतैक्येनैव निर्वाहात् भवन्मतेऽवच्छेदकत्वाघटितव्यापकताज्ञानादवच्छेदकावच्छेदेना-
नुमित्यनुत्पादेन तादृशानुमितावच्छेदकत्वघटितव्यापकतावगाहिपरामर्शस्य कारणतान्तरकल्पनापाश्यावश्यकत्वात् तथावच्छेदक-
त्वघटितव्यापकतायास्तदघटितव्यापकतात्मकाभावात्तदतिरिक्ताभावरूपतया न द्विविधव्यापकतावगाहिपरामर्शयोरनुगमसंभवः वि-
षयतानुगमादिति वाच्यं व्यापकतात्वेन पदार्थान्तरावगाहिपरामर्शादप्यनुमित्युदयेन वास्तवव्यापकताविषयकत्वस्यानिवेशात् व्यापक-

८२

टी.

नाद्य एकपदार्थांशोपरस्परोपश्लेषावगाहित्वस्यैव निवेशनीयतयावच्छेदकत्वघटितव्यापकतातात्पर्यकस्थापितस्वघटितव्यापकताप्रविष्टत्वा
वद्धूल्कविषयकत्वाननेनरूपेणाभयपरामर्शसंग्रहसंभवादिति चेन्न तथासति तुल्ययुक्त्यानुमितौ उपनीतमहानसीयवह्नेरपि भानोपगमापत्तेः
तस्मान्न[illegible]यगामेयि महानसीयवह्नित्वावच्छिन्नव्यापकतावगाहिपरामर्शस्य महानसीयवह्नित्वावच्छिन्नानुमितौ स्वतंत्रकारणत्वकल्प
नेन लाघवसंभवात् उक्तरीत्या वह्नित्वावच्छिन्नानुमितौ हेतुत्वेन परामर्शतावच्छेदकरूपेण वह्निव्याप्यवत्ताज्ञानहेतुतयैव निर्वाहात् नच
शुद्धवह्नित्वावच्छिन्नव्यापकतावगाहिपरामर्शजन्यमहानसीयत्वाद्युपस्थितिकालीनानुमितेरुत्तरं विनैव प्रमाणं संशयं च तत्र म
हानसीयत्वादिसंदेहाननुभवात् अनुमितावुपनीतमहानसीयत्वादिभानमिति वाच्यं अवच्छेदकत्वाघटितव्यापकतावगाह्यवच्छेदकावच्छे
देन हेतुमत्तावगाहिपरामर्शजन्यानुमित्युत्तरं पक्षे साध्यसंदेहाननुभवात् अनुमितावच्छेदकत्वभानमित्यस्यापि सुवचत्वात् एतेनानुमिता
वुपनीतभानांगीकारे एकधर्मिकोपस्थितविरोधिकोटिद्वयव्याप्यवत्ताधीबाधाभावादिविलक्षणैकदाभानसंभवेन संशयानुमितिप्रसंगः तदप
कालिकप्रतिबध्यप्रतिबंधकभावकल्पने च गौरवमित्यपि प्रत्युक्तं बाधाभाववत्त्विलक्षणावच्छेदकत्वभानोपगमेऽप्युक्तरीत्या संशयानुमिति
प्रसंगस्य तद्वारकप्रतिबध्यप्रतिबंधकभावकल्पनप्रयुक्तगौरवस्य तुल्यत्वात् नानुमितावच्छेदकत्वभाने युक्त्यंतरमाह प्रमाणमात्रस्यैव सा राम०

182

532

ष्टितामात्रपरत्वं तस्यार्थः अयमाशयः व्याप्तिप्रमाणस्यावच्छेदकावच्छेदेन प्रत्यायकत्वमौत्सर्गिकमिति सर्वसिद्धं तत्संसर्गग्रहासंसर्गाग्रहादिरेव.
तत्र संग्राहकत्वाद्यवेन प्रमाणत्वावच्छेदेनैव तस्यौत्सर्गिकत्वं कल्प्यते एतन्मूलक एव चोत्सर्गतः प्रमाणमात्रस्यैवावच्छेदकत्वे पक्षतापादनमिति
सर्वसिद्धः प्रवादः अत एव वाजपेयेन यजेतेत्यादौ यागत्वावच्छेदेन वाजपेययजमानत्वस्य स्वर्गविशेषसाधनत्वस्य चान्वयासंभवेन वाजपेया
दिपदं कर्मविशेषे लक्षणमिति कर्मनामधेयत्वमिति मीमांसकसिद्धान्तः अन्यथा यागत्वसामानाधिकरण्येन वाजपेययजमानत्वस्वर्गविशेष
साधनत्वयोरन्वयसंभवेन कर्मनामधेयत्वाङ्गीकारस्यासंगत्यापत्तेः एवं चानुमितावप्यसंसर्गाग्रहादिवशादवच्छेदकत्वभानेनैव प्र
त्यूहमिति अधिकं मत्कृतमायपक्षोक्तभेदे द्रष्टव्यं ये तु अनुमितावच्छेदकत्वे साध्यस्य संसर्गतया न भासते अत्रावच्छेदकत्वस्य व्यापकत्वाघ
टकत्वात् किन्तु पक्षतावच्छेदकस्यैव तत्त्वमेतावच्छेदकावच्छेदेनानुमितित्वमिति वदन्ति तन्मतमनमाहके चित्त्विति पर्वतत्वस्यैवेति पर्वतत्वमिति
शेषः एवकारेण साध्यस्यावच्छेदः नहेवस्य यद्यपि वह्नेः स्थितिः । नाद्ये इति व्यापकताघटकसंबन्धेनैव व्यापकस्यानुमितिरित्याकारकेण
र्थः उक्तनियमभङ्गाभावेऽपि पक्षतावच्छेदकताघटकसंबन्धेनैव पक्षतावच्छेदकस्य पक्षमानमिति नियमभङ्गो दुर्वार एवेत्यस्वरसादा
ह इत्याहुरिती दीधितावभिप्राय इति मूलकृतोऽभिप्राय इत्यर्थः तेनानुभवसंदेहेऽपि स्वस्य कचित्संशयानुमितेरपीष्टतया लाघवाद्गुमि

533

तावुपनीतभानसिद्धाविशेषायमात्मत्वेनैवाभावेन पूर्वापरविरोधित्वाघातादनुमितावव्यवच्छेदकत्वसमानेदुर्वारमिति स्वाभिप्रायस्सूचितः॥ ॥इ
ति महादेवविरचितायां भवानंदीव्याख्यायां सर्वोपकारिण्यां हेत्वाभासग्रन्थः॥ ॥ईश्वरवादेनैवेति अत्रैवं मूलग्रन्थसंदर्भः एवमनुमानेनेनि
रूपितेन तस्मान्न गन्धिमत्तु पुरुषधौरेयसिद्धिरित्यादिना ग्रन्थेन क्षित्यादिकं कर्तृजन्यं कार्यत्वाद्घटवदितीश्वरसाधकानुमानं प्रपंचितं तत्र तथा
पि क्षित्यादिकं न कर्तृजन्यं शरीराजन्यत्वात् गगनवदिति सत्प्रतिपक्षोऽस्त्वित्येवेति पूर्वपक्षे अस्य प्रसिद्धकर्तृजन्यत्वाभावविषयत्वादि
त्यादिना समाधानमभिधाय अपि च शरीराजन्यत्वात् गगनवदिति सत्प्रतिपक्षो नास्ति येदिति पूर्वपक्षे अस्य प्रसिद्धकर्तृजन्यत्वा व्यर्थ
विशेषणत्वं लाघवेनाजन्यत्वस्यैव साध्यत्वादिति समाधानांतरमुक्तं नीलधूमादाविव व्यर्थविशेषणत्वेन हेतुना शरीराजन्यत्वे कर्तृज
न्यत्वाभावव्याप्यभावसाधनात्सत्प्रतिपक्षसंभवरतिनदर्थः तदनंतरं ननु निष्प्रयोजनविशेषणत्वमप्रसिद्धमित्यादि पूर्वपक्षग्रन्थघटके
अपि च व्यभिचारवारकविशेषणवत्त्वस्यैव व्याप्यत्वहेत्वप्रयोजकत्वे सहचारदर्शनादित्वेन तदभावेन व्याप्यग्रहाविलंबादित्यादिना अ
व्यभिचारस्यानौपाधिकत्वस्य वा निश्चयेन नीलधूमादौ सत्त्वेन नव्यतिरेकसाधने बाधादित्यंतेन ग्रन्थेन नीलधूमावच्छिन्नव्याप्तौ निरुपाधि
त्वादित्यनुमानेन नीलधूमे व्याप्तिसिद्धेर्व्यर्थविशेषणत्वेन व्याप्यत्वाभावसाधने बाध इत्युक्तेऽनंतरं नंतरं न व विशेषणमुपाधिः साधनव्याप

कत्वादिति ग्रंथः सत्प्रतिपक्षेऽप्युपाधिनिरसनपरः विशेष्यं अजन्यत्वमिति अत्र साधनव्यापकत्वानुपपत्त्या साध्यस्येति शेष इति
दीधितिग्रंथ एवमवतारयति व्याख्यायां न त्विति तन्मते न्मतमिति तन्मतसिद्धकार्यकारणाभावरूपानुकूलतर्कमित्यर्थः कर्तृजन्यत्वेऽमिति तन्मतेऽ
न्यादिः तेन तादृशकारणत्वस्यासिद्धत्वेनानुपपत्तिरपि नेति कर्तृजन्यत्वस्येति पाद व्याप्याभावस्य व्यापकाभावव्यापकत्वेन कर्तृजन्य
त्वाभावरूपसाध्यस्य शरीराजन्यत्वरूपसाधनव्यापकत्वमक्षतमिति भावः अस्य अजन्यत्वस्य दीधितौ साध्याव्यापकं साध्याव्यापकत्वेन गृहीतं
साध्यव्याप्यसाधनाव्यापकत्वेन साध्याव्यापकत्वस्य साधनादिति भावः व्याख्यायां नीलधूमादिः मिश्रमतेन येनादिग्रंथस्य नीलधूमे व्या
प्तिसाधकानुसारेण स्वरूपासिद्धिनिरसनपरत्वात्तदनुसारेणोक्तं व्याख्यानं। पक्षे नीलधूमेऽपि विशेष्यत्वस्य सत्वेन तस्य साधनाव्यापकत्वासंभवा
दुपाधित्वशंकाया असंभवादाह व्याप्तिग्रहविशेष्यत्वमिति व्याप्तिग्रहविशेष्यत्वस्यापि तत्र संभवात् दृष्टान्तादवस्यादाह विशिष्येति नी
लविशिष्टे धूमे वेत्यर्थः विशेष्यत्वं व्याप्तिग्रहविशेष्यत्वेन संभवतीति विशेषयोः सामान्याधिकरण्याभावेन तद्घटितव्याप्तेरसंभवेन वि
शेष्य एव तत्संभवेन व्याप्तिग्रहविशेष्यत्वस्य विशेष्य एव सत्वेन विशिष्टे संभव इति भावः विशेष्यत्वस्य व्याप्तिग्रहविशेष्यत्वस्य सत्वे
नेति निरुपाधित्वस्यापि व्याप्तित्वादिति भावः साधनव्यापकत्वादिति तथा च साधनाव्यापकत्वाभावात्तस्योपाधित्वं संभवतीति भावः या

535

दी·

माद्दिकत्वादिति नाद्यात्म्येन विशेष्यस्यैवोपाधित्वशंकासंभवेन विशेष्यत्वपर्यंतानुसरणस्यानौचित्यादित्याशयः तेन धूमादिकत्वे मानाभा
वद्दूत्यार्शंकायाश्च नवकाशः तत् · मिश्रव्याख्यानं अत्र नोपाधिरितिपर्यंतमेव दीधितिग्रंथः क्वचित्तु एतदग्रे यदि वेत्यादिना पर्यंतमपि
नः पाठोस्ति स च यद्यपि न प्रामाणिकः सांप्रदायिकपुस्तकेषु दर्शनात् अत एव व्याख्यातारस्तं उपेक्षितवंतः तथापि बहूनामुपकाराय व्याख्या
यते · कर्तृजन्यत्वावच्छिन्नं यत्र शरीरस्य कारणत्वेन सर्वसिद्धमित्युक्तरीत्या साध्यस्य साधनव्यापकत्वासंभवेन नोक्तरीत्या विशेष्यस्योपाधि
त्वनिरसनं संभवदुक्तत्वकारणमूलकं किं त्वेत्यादिमूलग्रंथप्रतिवंदिविषयापेक्षयापि तु माह यदि वेत्यादि विधिमाभासेत दूषये · हेतौ · शरी
रजन्यत्वे · विशेषणतोति शरीरजन्यत्वादि · वैयर्थ्यमिति पूर्वमतस्यायुक्तत्वात् दुष्टकल्पं विशेष्याभावेपि जन्यत्वाभावेन्यर्थः विशेष्यं · अजे
न्यत्वं · आर्द्रेंधनप्रभवेतिनच मूलेप्रयपमतः धूमप्रभववह्निरहितत्वहेतुके सौरभविशेषवद्धूमरहितत्वसाध्यकमनुमानमेवोक्तमिति
मध्यमतो · द्वितीयनिर्देशो · संगतइतिवाच्यं द्वितीयानुमानस्य प्रसिद्धत्वेन प्राथम्येन निर्देशात् रहितत्वादित्येनेति आदिना धूमप्रभव
वह्निरहितत्वपरिग्रहः निर्धूमत्वादावित्यादिना सौरभविशेषवद्धूमरहितत्वपरिग्रहः इत्याहेति पाठः स्पष्ट आहेति पाठस्त्वार्तः अ
भिप्रायात् अभिमतार्थमाहेत्यर्थः मूलो · सिद्धिवारकस्येव विशेषणस्य स्वीकारात्तत्वेतिरेव कारो · व्यर्थगंधस्यैवेत्येवकारव्यत्यवं

राम०

धातिरिक्ताव्यंजकत्वघटितहेतोर्गंधाव्यंजकघ्राणरूपपक्षे प्रसिद्धिवारकस्यापि रूपादिषु पंचसु मध्ये इति समभिव्याहारलभ्यरूपाद्यव्यंजक-
त्वस्य विशेषणत्वांगीकारादित्यर्थः अनुमानं च घ्राणं पार्थिवं रूपादिषु मध्ये गंधस्यैव व्यंजकत्वात् कुंकुमगंधाभिव्यंजकगोघृतवदित्याकारकं
बोध्यं तस्यासिद्धिवारकतया न सार्थकता किंतु व्यभिचारवारकतयैवेत्याशयेनाह दोषिणोनान्विति व्यभिचारवारकत्वादिति वैयर्थ्यभ्रमस्य
नुषंगेणान्वयः तथा च रूपासिद्धिवारकस्यापि व्यभिचारवारकस्यैव यथार्थ्यमिति भावः नन्वेवमपि रूपादिषु मध्ये गंधस्यैव व्यंजकत्वादित्य
त्र रूपादिषु मध्ये इत्यस्य व्यभिचारवारकत्वाद्वैयर्थ्यं दुर्वारमेवेत्यत आह रूपादिष्वित्यादि गंधव्यंजकत्वहेतोः तन्मात्रहेतोः व्यभिचारः आत्मा
दौ व्यभिचारः शुद्धेनैवकारार्थेनेति रूपादिषु मध्ये इत्यसमभिव्याहृतैवकारार्थेनेत्यर्थः तस्येति शुद्धैवकारार्थस्येत्यर्थः समभिव्याहारेति
षष्ठ्यंतगंधपदव्यंजकपदयोः समभिव्याहारवशादित्यर्थः व्यंजकत्वरूपस्य। तत्पर्यवसन्नस्य। असत्वेनेति गंधव्यंजकस्यापि घ्राणेन्द्रि
यस्य गंधातिरिक्तगंधव्यंजकत्वेन घ्राणेन्द्रियरूपपक्षे। सत्वेनेत्यर्थः विशेषणत्वेनेति विशेष्ये गंधव्यंजकत्वे सामानाधिकरण्येनेत्या
दिः विशेष्यमात्रस्यात्मादौ व्यभिचारेणाविशेषणत्वाभावे इष्टापत्त्यसंभवादिति भावः अतः गंधातिरिक्ताव्यंजकत्वमात्रस्याविशेषणत्वा
योगात् रूपाद्यंतर्गतेति रूपादिषु मध्ये इति समभिव्याहारबललभ्यमित्यादिः रूपाद्यंतर्गतेति यद्गंधातिरिक्तं तदव्यंजकत्वमित्यर्थः रूपरस

537

238

स्पर्शशब्दाव्यंजकत्वमिति यावत् गंधातिरिक्तत्वनिवेशप्रयोजनाभावात् नच रूपरसस्पर्शशब्दाव्यंजकत्वेच व्यभिचारेति आत्मादावि
त्यादि तत्रगंधव्यंजकत्वरूपविशेष्यासत्त्वेपि रूपाद्यव्यंजकत्वरूपविशेषणाभावेन विशिष्टहेत्वसत्त्वेन व्यभिचारवारणासंभवादि
ति भावः ननु जन्याभावेन सामाभावशरीरजन्याभावेन सामाभावयोः सामान्याभावत्वेन प्रत्येकमेकत्वात् द्वित्वाभावाभावेन पात्वित्याद्ययम
मसंगतमत आह यद्वेत्यादि इत्यादि इत्यादि यावत्सामान्याभावस्य विशेषाभावकूटात्मकतानतु तद्भिन्नत्वमिति मतानुसारेणेव यद्वेत्या
दि मतमतो नासंगतिरिति भावः वह्न्यभावे तीनिरुद्धं यमत्वेपि रोधाभावाद्वह्निव्याप्यत्वादिति पाठमभिप्रेत्य वह्निवदिति केचिदिति घटमी
सामाभावस्यापि जन्याभावसामाभावानन्तर्गतत्वादिति भावः अन्यदिति केचिदित्याद्यनभावानां शरीरजन्याभावसामाभावानन्तर्गतत्वादिति भा
वः नच पृथिवीत्वस्य पृथिवीत्वाभावरूपतया योग्यत्वमत आह अपृथिवीत्वमिति नच तत्र पृथिवीसामान्याभावस्यैक
तया वह्नित्वाभावेन हेतुतासंगतिरत आह सर्वेति तत्र यदिति शेषः विशेषाभावेतितत्वया सामान्याभावस्य विशेषाभावसमुदायात्म
कत्वस्वीकारादिति भावः ननु यत्तु वादिमते जन्यत्वाभावस्यापि विशेषाभावसमुदायात्मकतया नैकत्वमिति किंच नन्वेय वह्न्या
न्याभावापेक्षया जन्यत्वाभावस्यैव व्याप्यतास्यादेकत्वादिति प्रत्येकं योः संगतत्वाशयेनाह जन्यत्वेत्यादिः अप्रयुक्तवमात्रे

रामः

योऽधिकार्मात्रं न तु सम्पगीत्पर्थः असम्पत्तौ हेतुस्वयमेवाह जन्पत्वस्पेति अखंडस्प सकलजन्पाद्यनैः विरहे शेति अनन्प
यासिद्धिनियतोत्तरवर्तित्वरूपजन्पत्वस्प जन्पभेदेन भिन्नत्वादिति भावः तुल्पनयाजन्पान्योन्याभावस्यानीयपुक्ते स्फल्पनया अ
न्पथ्याजन्पान्योन्याभावस्पाप्येकत्वेन बहुत्वकल्पनासंगतेरितिभाव: जन्पान्योन्याभावस्पाव्याप्यत्वमाशंक्य नेयद्यपीत्पादिनातथा
त्वं· व्याप्यत्वं इह जन्पान्योन्याभावस्पत्वेन या· ग्रपेकं व्याप्यत्वं · व्यभिचारित्वादितिसकर्तृकत्वाभाववति घटादौ हेपटादिजन्पत्वस्पा
न रभेदसत्वेन व्यभिचारित्वादितिभावः तथा चोक्तरीत्याप्रसक्तव्यभिचारवारणाय जन्पान्योन्याभावसमुदायस्प व्याप्यत्ववक्तव्ये तथा
सत्याहतथा चेति समुदायनिवेशाव श्यकत्वेचेत्पर्थः क्षित्यादीति शरीराजन्पानां जन्पानामंकुरादीनामन्योन्याभावानामित्यर्थः
न निवेशाइति तथा च शरीरजन्पान्योन्याभावानामेवाल्पत्वाज्जन्पान्योन्याभावानामेव बहुत्वाज्जन्पान्योन्याभावस्प न व्याप्यत्वमि
ति यत्तु वादिमते सम्पगेवेति भावः अतिरिक्तत्वे चेति सामान्याभावत्वं ये सामान्याभावस्पविशेषाभावसमुदायात्मकत्वस्प
दूषितत्वेनातिरिक्तत्वमितिभावः तत्र जन्पान्योन्याभावशरीरजन्पान्योन्याभावयोः इत्पत्रेति एतादृशाहृषराद्यर्थः तास

टी.

र्थमिति विरोधाभावादित्यादिमूलग्रन्थस्य तात्पर्यमित्यर्थः नचैवमप्यापि जन्यत्वस्याखंडस्यैकस्य विरहे गौकार्यजन्यत्वावच्छि
न्नाभावाभावस्यातिरिक्तत्वे त्वक्षिप्रतिवाच्यं अखण्डोपाधिरतिरिक्तपदार्थो वा जन्यत्वमित्याशयान्नचैवमप्यपि तस्य जन्यता
वच्छेदकधर्मसंबंधभेदेन नानात्वात्तद्वच्छिन्नाभावस्यैकत्वासंभव एवेति वाच्यं अखण्डोपाधिरूपे वातिरिक्तपदार्थरूपे वा
वा नानाधर्मसंबंधावच्छिन्नसकलजन्यतासाधारणेन जन्यतात्वेनानुगतीकृतस्य जन्यत्वस्यानुगतत्वसंभवादित्यादिक
महाचार्यस्य सकलभट्टाचार्यसाधारणत्वेनोत्कर्षसंपादकत्वासंभवादाह व्याख्यायामहाचार्यः महाचार्यशिरोमणि
रितीति अत्र टीका शङ्कोग्रन्थसमाप्तौ ॥ ॥ भवानन्दवचोव्याख्या महादेवेन निर्मिता सर्वोपकारिणीनाम्ना संपूर्णास
दनुग्रहात् १ भवानन्दवचोव्याख्या समुत्सुकैः श्रमैर्मम सिद्धेश्वरीजगन्मातानामीरागानुसाधिवाम्यताम् २ विद्वद्वरेषु
कृतारवं पितरं प्रणामाम्यहं यदीयसुकृतेनैव संपूर्णीयाकृतिर्मम ३ श्रीकेदारात्मजैर्गोमि गुरुं गोतमसंस्थिरं येनचू
रीकृतनामस्यद्योविदुषांगर्वपर्वताः ४ भवानन्दीयव्याख्यापर्यालोचनेच्छायस्य विधयते तेनोपायसहस्रेणासंग्राह्येयंकृतिर्म राम०

186

540

९८

२१

म ५ महीयस्तुतिमुत्तमामपि नवा प्रार्थये यो तिनीं विलोक्य सुहृन्मामुपाधद्दिसतो बुधानां गणाः तदा भवन्ति निर्दयाविमि
हवालिप्तानां शतैर्विधुः कुवलये क्षितो न हि तन्निषिद्धनेतामसेः ६ स्तुतिर्महीयाय यद्दिवेन सहीहिंसातस्यां किलास्या श्रुरितार्थ्यनिव
कस्तूरिकाः वितजनैर्विमुक्ता गुरागात्तलोकाहृतः स्तुतार्था ७ विज्ञापयामि सुहृदो बुधान् स सप्रज्ञापिनः स्तुपासंभवत हृक्षोषा
वीस्तुरतीयाद्युतिर्मम ८ प्रकाशको स्तु मोपुत्रो पुत्रीं सर्वोपकारिणीं बुद्धिपद्मामलौकिकां महादेवो स्य भावयन् ९
लौकिकं वालौकिकं पद्मामलौकिकां पद्मामलौकिकं उमापादाब्जपद्मभजन्महादेवः स्तुतार्थ्यतां १० ॥ ॥इति श्री काशीवासि
महाराष्ट्राचार्यसेमन्तपुरोपस्तंभकरोपनामक श्रीमन्मुकुंदपंडितात्मज■महादेवपंडितविरचिता ऽनुमानमणिदीधिति
व्याख्या भवानंदी व्याख्या सर्वोपकारिणी संपूर्णा॥ ॥ ॥शुभमस्तु॥ ॥मंगलं चास्तु॥ ॥श्रीरस्तु॥ ॥

1867

541

रामः

न्यायशास्त्रम्

श्लो० ६०००

अनुमानमनीदीधतीटीपनी
६४००

542

२०७